A.C. Joshi Library
P.U. Chandigarh

MSS No. 349 Subject Religion

Name of MSS ब्रह्मामृत वर्षिणी वेदान्त सूत्रवृत्ति

Author

Period Folios 116

Script Devnagiri Source Prithipal Singh

Missing Folios NIL

649

...amritvarshini

...ntamrit varshini

...dan

Sutan Brit

12

Brahmamritvarshini
Brahmamritvarshini
Vedant Sudhavritti
By Hridayaram

349

349

ब्रह्मामृत वर्षिणी वेदान्त सूत्रवृत्ति
११६ पत्रक ॥ ल० अ० १४ पं० प्र० पृ०

ह० ल०

अ॰ सू॰ वे॰ 1
वृ॰ अ॰ द्वि॰
१

ॐ श्रीगणेशाय नमः ॥ ॐ नमः शिवाय ॥ अतिदेशाधिकरणे प्रधानवदशब्दत्वं परमाण्वादीना
मपीत्युक्तं संप्रति प्रधानस्य वैदिकशब्दवत्वाभावेपि स्मृतिरूपशब्दवत्त्वमाशंक्य परिहरति स्मृ
त्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् प्रथमाध्याये सर्वज्ञे सर्व
शक्तौ जगज्जन्मादिकारणे सर्वेषां वेदांतानां समन्वयः प्रतिपादितः अशब्दत्वादिहेतुभिः प्र
धानादिकारणवादाश्च निराकृताः इदानीं द्वितीयेध्याये प्रथमपादे सांख्यादिस्मृतितर्काभ्या
मपदे विरोधः परिह्रियते द्वितीये पादे सांख्यादिमतानां दुष्टत्वं प्रतिपाद्यते तृतीये पादे पूर्वा
र्धभागेन पंचमहाभूतश्रुतीनां परस्परविरोधः परिह्रियते द्वितीयभागेन जीवश्रुतीनां च
चतुर्थपादे लिंगशरीरश्रुतीनां विरोधपरिहारः क्रियते इत्येवमयमध्याय आरभ्यते. तदुक्तं द्वि
तीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता भूतभोक्तृश्रुतेर्लिंगश्रुतेरप्यविरुद्धतेति उक्ते
समन्वये स्मृत्यादिविरोधे तन्निरसनमनेन क्रियत इत्यनयोरध्याययोर्विषयविषयिभावः संबं
धः निर्विषयकविरोधपरिहारायोगाद्विषयभूतसमन्वयस्यादौ विचारः कृतः विषयिभूत
विरोधपरिहार इदानीं क्रियत इत्युपक्रमेण तस्याऽध्यायस्य पूर्वोऽध्यायानंतर्यं श्रौतसमन्वये
विरोधपरिहारत्वादस्य पादस्य श्रुत्याऽध्यायसंगतिः सर्वत्र पूर्वोत्तरपक्षयोः विरोधाऽवि
रोधौ फलमिति विवेकः तत्र प्रथमं स्मृतिविरोधपरिहारः अत्र संशयः उक्तसमन्वयः किं सां

१ शिव

ख्यादिस्मृत्या विरुध्यते नवेति विरुध्यत इति प्राप्तं सर्वज्ञकपिलादिप्रणीतत्वेन प्रामाण्यात् श्रुति
रपि कपिलमुनिमप्रतिहतज्ञानं दर्शयति ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्त्ति जायमानं
च पश्येदिति यस्तावदग्रे सर्गादौ जायमानं कपिलनामानमृषिं स्थितिकाले च प्रसूतं भूतभविष्य
द्वर्त्तमानविषयकज्ञानैः बिभर्त्ति पुष्णाति तमीश्वरं पश्येदिति योजना तस्मान्न ब्रह्मणः कारणे
समन्वयः महर्षिप्रणीतप्रधानकारणवादिस्मृतीनामनवकाशरूपदोषप्रसंगात् न च जगत्का
रणे सिद्धे वस्तुनि विकल्पो युज्यते तस्मात्प्रधानानुगुणतया श्रुतयो नेया इति चेदिति तस्त्रावय
वार्थः परिहरति नेति कुतः अन्यस्मृत्यनवकाशदोषप्रसंगात् तथाहि चेतनं प्रकृत्य तस्माद
व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेति स्मृतिरव्याकृतनामरूपप्रपंचस्य ब्रह्मजन्यत्वमाह तथा भ
गवद्गीतास्वपि अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति चेतनकारणत्वं स्मर्यते तथा च प्रधा
नकारणवादे एतत्स्मृतीनामनवकाशो दोषः प्रसज्येत अतः स्मृतिद्वयविरोधे श्रुत्यविरुद्धा स्मृ
तिः प्रमाणमितरा प्रमाणं सांख्यस्मृत्या न विरोधः श्रुतिश्चैतदन्यकपिलविषया कपिले वेदप्रमा
णाभावादिति॥ इतश्च सांख्यस्मृतेरनवकाशो न दोष इत्याह इतरेषां चानुपलब्धेः सांख्यस्मृतिसि
द्धानां प्रधानादितरेषां महदहंकारादीनां तत्त्वानां लोके वेदे चानुपलब्धेः च सांख्यस्मृतेरप्रामाण्येन
दोषः तथा च तदेकदेशप्रधानस्मृतेरप्यप्रामाण्यमिति भावः एतेन योगप्रत्युक्तः अनिदं पाता

त्वरथक्संगतत्वापेक्षा योगास्मावत्तमेश्वरादत्वेनावकपिलमताद्विशेषः प्रधानादिप्रक्रियासमे
व तथाच कापिलमतनिरासेनैव पातंजलमतेनिरस्तं भवतीत्यर्थः नचातिदेशवैयर्थ्यं ज्ञानसा
धनत्वेन श्रुतिसिद्धयोगप्रतिपादकत्वेन प्रामाण्याशंकायामतिदेशसार्थकत्वात् नह्यंशमात्रे
कथंतस्मात् योगः प्रमेतिचेत् उच्यते यद्यं विषयभूतार्थेऽप्रामाण्यं दृष्टं तत्र प्राप्रामाण्यमाव
इति यथाकापिलस्मृते नहियोगस्मृतेः प्रधीतैनात्पर्यं येनाप्रामाण्यं भवेत् किंतु योगए
वसचौधितः श्रुतिसिद्धत्वात् किंचिदालंब्ययोगः प्रतिपादनीय इति परप्रसिद्धप्रधानादिकमालंब
नत्वेनगृहीतं तत्रापि प्रामाण्याशंकायामतिदेश इत्यविरोधः एवं यदंशे सांख्यस्मृतेरविरोधः॥
तदंशे प्रामाण्यमित्यधिकरणद्वयदितात्पर्यं योगस्य कथं श्रौतत्वं इति चेत् न तदास्माभिः श्वेताश्वत
रोपनिषदि त्रिरुन्नतं स्थाप्य समं शरीरमित्यादिना योगप्रपंचः कृतः त्रीणि कायस्योग्रीवा शरीरं
सिउन्नतानि यस्मिन् तच्छरीरं समं संस्थाप्य युंजीतेति योजना तथा काठकेपि तां योगमिति म
न्यंते स्थिरामिंद्रियधारणामिति विद्यामेतां योगविधिं च कृत्स्नमिति इंद्रियाणां स्थिरामेकाग्रलक्षणं
धारणां योगविदो योगं मन्यंते यद्योक्तमेव परमं तपइति विकृत इति शादः एतां ब्रह्मविद्यां योगप्रकारं
च समस्तं मृत्योः सकाशान्नचिकेता लब्ध्वा ब्रह्मप्राप्तोऽभूदित्यर्थः नचिलक्षणत्वादसात् यावचं चशब्दो
तु स्मृतिविरोधः परिहृतः इदानीं न्यायविरोधः परिह्रियते यद्यपि सापेक्षः तर्केणनिरपेक्ष

2
वे.सू.द्द
२
वा॰
श्रा.
शि

श्रुतिसमन्वयस्य न विरोधस्तथापि साक्षात्कारस्य मोक्षसाधनत्वेन प्राधान्यात्तर्कस्य दर्शनसारेणार्थ
समर्थकत्वेनापरोक्षार्थविषयकत्वाच्छ्रुत्या न साक्षात्कारस्याविषयत्वात्तरंगात् तर्कः शब्दस्तु परोक्षार्थक
बोधनस्वभावो बहिरंगमिति बलवत्तर्केण विरुध्यत इत्याक्षेपो युक्तः पूर्वं वेदविरुद्धस्मृतेः मूला
भावात् अप्रामाण्यमुक्तं तर्हि तर्कस्य व्याप्तिपक्षधर्मतयोर्मूलत्वेन लोकसिद्धत्वात्तेन विरोधश्रुति
दे५ प्रसंगादाहरणसंगत्यायमाक्षेपः आकाशादिकं न चेतनप्रकृतिकं द्रव्यत्वात् घटवदिति तर्केण
समन्वयो विरुध्यते न वेति संदेहे विरुध्यत इत्याह न विलक्षणत्वादिति जगच्चेतनप्रकृतिकमिति
यदुक्तं तन्न कुतः विलक्षणत्वात् अस्य जगतस्त्वत्वाद्विलक्षणत्वात् चेतनं ब्रह्म शुद्धं जगदचेत
नं परिच्छिन्नमशुद्धमिति विलक्षणे यद्विलक्षणं न तत्तत्प्रकृतिकं यथा तंतुविलक्षणो घटो
न तंतुप्रकृतिक इति ननु ब्रह्मजगतोर्वैलक्षण्यं कुत इत्यत आह तथात्वं च शास्त्रादिति तथात्वं
वैलक्षण्यं विज्ञानं चाविज्ञानं चाभवदित्यादिश्रुतितोऽवगतमित्यर्थः ननु ब्रह्मवज्जगदपि चेतनं श्रू
यते ते हीमे प्राणा अहंश्रेयसे विवदमाना मृदमब्रवीत् आपोऽब्रुवन् ते ह वाचमूचुस्त्वं न उद्गा
येत्यादिश्रुतिभिरित्यत आह अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् उक्तशंकानिरासार्थस्तु
शब्दः उक्तश्रुतिभिर्न जगतश्चेतनत्वं प्रत्येतव्यं यतो मृदाद्यभिमानिनां देवतानां तत्र व्यपदे
शो भवति न मृदादिमात्रस्य इदं कुतः विशेषानुगतिभ्यां कौषीतकीब्राह्मणे एता ह वै देवता अ

3

२ वे. सू.

हं श्रेयसे विवदमाना इति बृहदारण्यके प्राणसंवादे श्रुतं प्राणानां देवताशब्देन विशेषितत्वाच्च प्राण-
इंद्रियाणि किंतु तदधिष्ठानदेवता इति नेन्द्रियादिजगतश्चेतनत्वं अग्निर्वाग्भूत्वा मुखं प्राविशदित्या
दिमंत्रार्थवादादिषु सर्वत्र तदभिमानीदेवतानामनुगतेः अवगमाच्च न चेतनं जगत् ते ह वाचमूचुरित
त्यादौ ते ह देवा वागभिमानिनीं देवतामूचुः किमिति त्वं न उद्गायेति भोगमस्मभ्यं संपादयेत्यर्थो बोध्यः
तस्मादचेतनस्य जगतो वैलक्षण्यान्न चेतनप्रकृतिकत्वमिति प्राप्ते राद्धान्तसूत्रं दृश्यते तु पूर्वपक्ष-
निरासार्थस्तुशब्दः यदुक्तं चेतनविलक्षणं जगन्न प्रकृतिकमिति तन्न चेतनात्पुरुषात् तद्विलक्षण-
णानां नखलोमादीनां अचेतनानां चेतनाच्च गोमयाच्चेतनवृश्चिकस्योत्पत्तिर्यतो दृश्यतेऽयमर्थः
प्रकृतिविकारयोरत्यन्तसादृश्ये प्रकृतिविकारभावानुपपत्त्या यत्किंचित्सादृश्यं वाच्यं तच्च प्रकृते-
ऽपि जगति सत्त्वलक्षणं यदनुवृत्त्या समानमिति भावः किंच ब्रह्मण्युपनिषद्व्यतिरिक्ततर्कादेः प्रमाण-
त्वप्रवेशाभावान्न तेन विरोधः समन्वयस्य तथा च श्रुतिः नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव
सुज्ञानाय प्रेष्ठेति कोऽद्धा वेद क इह प्रवोचत्तत् इयं विसृष्टिर्यत आबभूवेति ब्रह्मविषया मतिरेषा
तर्केण नापनेया न प्रापणीयेत्यर्थः यदा एषा कुतर्केणानापनेया तिरस्या न भवति किंत्वन्येनैवाचा-
र्येण वेदविदा प्रोक्ता सती सुज्ञानाय फलावसायिसाक्षात्काराय भवति हे प्रेष्ठ प्रियतम नचिके-
तं प्रति मृत्योर्वचनं कोऽद्धेति ब्रह्मव्यवहारभूमौ अद्धा साक्षात् इदं को वा तत्प्रवोचत् प्रावोचदित्य

३

र्थः छांदसो दीर्घलोपः यतः आत्मनः सकाशादादियं विविधासृष्टिर्बभूव स एव स्वरूपं वेदनाय
इति मंत्रप्रतीकयोरर्थः असदिति चेन्न प्रतिषेधमात्रत्वात् ननु चेतनस्य नामादिहीनस्याचेत
नतामादिमज्जगद्धेतुत्वे उत्पत्तेः पूर्वं जगदसदेव स्यादिति चेन्न कुतः प्रतिषेधमात्रत्वात् अ
सत्स्यादिति योयं प्रतिषेधः तत्प्रतिषेधमात्रेण तत्र तस्य प्रतिषेध्यमस्तीत्यर्थः अयं भावः नहि
कार्यसत्ता कारणमन्तरेण दृश्यते किं तु कारणमेवस्थितिदशायामपि जगतस्तत्वाद्ब्रह्मैव तथा च ब्रह्मा
त्मकजगतः सत्वमुत्पत्तेः पूर्वमप्यविशिष्टमिति नासज्जगदिति आक्षिपति तद्वत्प्रसंगादस
मंजसं ननु शुद्ध्यादिगुणकं ब्रह्म जगदुपादानमित्यसमंजसं कुतः अपीतौ तद्वत्प्रसंगात्तन
अपीतौ प्रलयसमये जाड्याशुद्ध्यादिगुणकं जगद्ब्रह्मणि लीयमानं स्वनिष्ठजाड्यादिभिर्धर्मैः
ब्रह्म दूषयेत् यथा शाकादौ लीयमानं हिंग्वादिकं स्वनिष्ठगंधादिभिः शाकादिकं दूषयति त
द्वत् तथा च कार्यवत्कारणस्यापि ब्रह्मणोऽशुद्ध्यादिप्रसज्येतेत्याक्षेपसूत्रार्थः परिहर
ति न तु दृष्टांतभावात् तुरेवार्थः पूर्वोक्तमसमंजसं नास्त्येवेत्यर्थः कुतः दृष्टांतभावात्॥
कार्यं कारणे लीयमानं स्वधर्मेण न दूषयतीत्यस्मिन्नर्थे शतशो दृष्टांतानां सत्वात् इत्यर्थः॥
यथा घटशरावादिकं कार्यं मृदि लीयमानं मृदं स्वनिष्ठधर्मेण न दूषयति यथा वा स्वप्नप्रबोधौ यो
न स्वधर्मैः कारणमात्मानं दूषयतः तथा मायिकजगदुत्पत्तिस्थितिलयात्मावस्थात्रय

४ वे॰सू॰ वृ॰

साक्षिणं परमात्मानं न जगत्स्वनिष्ठजाड्यादिभिर्धर्मैर्दूषयेत परमात्मनोवस्थात्रयासंबंधे हेतुर्द्रस
मतिरपि अनादिमायया सुप्तो यदा जीवः प्रबुध्यते अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदेति
अनादिमायया वृतस्वस्वरूपो जीवो यदाचार्यप्रतिपादनावस्थापास्तस्वरूपज्ञानभाक् भवति तस्या
अद्वैतं बुध्यत इति योजना अजमित्युक्त्यवस्थायाः संबंधाभाव उक्तः अनिद्रमिति लयावस्था
याः अस्वप्नमिति स्थित्यवस्थाया इति भेदाः किंच कार्यस्य कारणात्मकत्वेपि न कारणे
कार्यात्मकमिति न कार्यधर्मैर्दूषणं कारणस्येति समंजसं वेदान्तशास्त्रमिति स्वपक्षे दोषा
श्च ये दोषाः विलक्षणत्वात्प्रकृतिविकारभावानुपपत्तिरूपास्तेः प्राक्जगतोऽसत्वप्रसंगोऽ
पीत्येतदसमंजसमिति सांख्येनोद्भावितास्ते सांख्यपक्षेपि समानाः शब्दादिहीनं प्रधानसकाशा
च्छब्दादिमतो विलक्षणस्य जगतउत्पत्त्यंगीकारादित्यर्थः वस्तुतः प्रपंचसत्यत्ववादिनः
सांख्यस्यैवैते दोषाः न ममानिर्वचनीयवादिन इति भावः तर्काप्रतिष्ठानादप्यन्यथानुमे
यमिति चेदेवमप्यविमोक्षप्रसंगः केवलस्य तर्कस्याप्रतिष्ठानादपि अप्रतिष्ठितत्वाच्च॥
न तेन समन्वयविरोधाशंकेत्यर्थः एकेन तार्किकेण यत्नेनानुमितोऽप्यर्थो अन्येन श्रेष्ठतरे
णान्यथानीयते एवमन्येन श्रेष्ठतमेनान्यथानुधनमिति तर्कस्याप्रतिष्ठानं बोध्यं ननु तर्क
मावस्याप्रतिष्ठितत्वे महाजनानां तर्कवर्ज्यर्थिप्रवृत्त्यनुपपत्तिः वाक्यार्थसंदेहे तर्केणामि

४

णीयप्रसंगश्च किंच तर्काप्रतिष्ठानादित्ययमपि तर्कोऽप्रतिष्ठित एवेति न तेन परमनिराका
णस्मात् तस्मात्कस्यचित्तर्कस्याप्रतिष्ठितत्वेपि कस्यचित्प्रतिष्ठितत्वसंभवात्तेन समन्वय
विरोधाशंकायुक्तेत्यादियति अन्यथानुमेयमिति चेदित्यंतेन अप्रतिष्ठिततर्कादन्येन
प्रकारेण प्रतिष्ठिततर्केण समन्वयविरोधादिकमनुमेयमिति शंकार्थः तर्कस्य क्वचि
त्प्रतिष्ठितत्वमंगीकृत्य समाधत्ते एवमपीति अन्यत्र तर्कस्याप्रतिष्ठितत्वेपि प्रकृते लिं
गादिहीने ब्रह्मणि वेदनिरपेक्षस्य तर्कस्याऽप्रतिष्ठितत्वदोषादनिर्मोक्षप्रसंग एवेति समा
धानार्थः यद्वा महतां कपिलकणादीनां परस्परविप्रतिपत्त्या एकमनिरस्य तैस्तर्कैस्तत्व
निर्णयाभावादनिर्मोक्षप्रसंग इत्यर्थः तस्मादागमविरोधे न तर्कः प्रमाणमिति निगमेन विरो
ध इति सिद्धं॥ एतेन शिष्टाऽपरिग्रहा अपि व्याख्याताः अतिदेशत्वाच्च पृथक्संगत्याद्यपे
क्षो ब्रह्म न जगदुपादानं विभुत्वात् व्योमवदित्यनेन वैशेषिकाद्यनुमानेन ब्रह्मकारणवा
धकः समन्वयो विरुध्यते न वेति संदेहे विरुध्यत इति प्राप्तं कुतः अबाधितत्वात् तस्मा
दर्पणवदुपादानमिति प्राप्तेऽतिदिशति एतेन मन्वादिभिः शिष्टैः केनचित्सत्कार्यवादाद्यंशे
न परिगृहीतप्रधानकारणवादनिराकरणप्रकारेण शिष्टापरिग्रहाः शिष्टैः केनचिदप्यंशे
न अपरिगृहीता अण्वादिकारणवादा व्याख्याता निरस्ता द्रष्टव्या इत्यर्थः तर्कस्य वेदबाधि

5

वे॰ सू॰
ज॰ ५ ह॰

तत्स्यादिति भावः भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् अद्वितीयाद्ब्रह्मणो जगत्सर्गं ब्रुवन् सम
न्वयः प्रत्यक्षादिना विरुध्यते न वेति संदेहे ब्रह्मणस्तर्कस्याऽप्रतिष्ठितत्वेपि तद्गम्ये दृष्टे तस्य प्र
तिष्ठितत्वाद्विरुध्यत एवेति प्रत्युदाहरणेनाक्षेपः भोक्त्रापत्तेरविभागश्चेदिति अद्विती
यब्रह्मणो जगदुपादानत्वे भोक्तृभोग्यप्रपंचस्य ब्रह्मानन्यत्वेन भोग्यपशाद्वा भोक्त्रात्मकत्वापत्तेः
भोक्तृत्वभोग्यात्मकत्वापत्तेः प्रसिद्धः परस्परविभागो न स्यादिति प्रत्यक्षविरोधः समन्व
यस्य भोक्तृभोग्यप्रपंचेनादिमीयोपादानकः परस्परं भिन्नत्वात् व्यतिरेके ब्रह्मवदित्यादितर्क
विरोधः श्चविपदेदेतच्छिन्निर्वायकेति शंकार्थः समाधत्ते स्याल्लोकवदिति एकब्रह्मोपादान
कत्वेपि भोक्तृभोग्यप्रपंचस्य परस्परं विभागः स्यात् लोकवत् यथा मृदात्मनाऽभिन्नानां घटश
रावादीनां परस्परं भेदोऽस्ति यथा वा एकरज्जूपादानकानां दण्डसर्पादीनां परस्परं भेदः तद्व
दित्यर्थः कल्पितभेदसत्त्वाच्च प्रत्यक्षाविरोधः वेदादौ व्यभिचाराच्च तर्कः प्रमाणमिति मत
त्वं ननु ब्रह्माभेदं जगतोऽंगीकृत्य लोकदृष्टान्तेन विरोधः परिहृतः न तस्य ब्रह्माभेद एव कु
तो न स्यादित्याशंक्य जगतोऽनिर्वचनीयस्यात्र ब्रह्मव्यतिरेकेणासत्त्वमाह तदनन्यत्वमारंभण
शब्दादिभ्यः पूर्वं परिणामवादमालंब्यापाततः स्याल्लोकवदिति समाधानमुक्तं इदानीं विव
र्तवादमाश्रित्य परमं समाधानमुच्यते इत्येकफलकत्वं संगतिः संदेहः पूर्ववत् तस्माद्ब्रह्म

प्र॰ शि॰

णः प्रपंचस्यानन्यत्वं पृथक्सत्ताराहित्यं कुतः आरंभणशब्दादिभ्यः एकविज्ञानात्सर्वविज्ञानप्र
तिज्ञासिद्ध्यर्थं दृष्टांत उपन्यस्तः यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं वि
कारो नामधेयं मृत्तिकेत्येव सत्यमिति तत्र मृत्पिंडज्ञाने कथं घटादिविज्ञानमित्याशंक्य वि
कारो घटादिर्वाचालंबनमात्रं यतो नामधेयं विकारः न तु नामातिरेकेण विकारोऽस्ति स्तु
क्तो मृत्तिकामात्रमेव विकारस्य पारमार्थिकं स्वरूपमिति तस्मिन् ज्ञाते तत्स्वरूपतो घटादिर्ज्ञातो
भवतीत्युक्ता विकारो मिथ्या कारणं तु सत्यमित्ययमर्थो दृष्टांतवाक्ये सिद्धः तथा दार्ष्टांतिकेऽ
ब्रह्मव्यतिरेकेण प्रपंचसत्ता नास्तीति तदनन्यत्वं सूत्रस्यादिशब्देन ब्रह्मैवेदं सर्वमित्यादि त
दनन्यत्वप्रतिपादकं गृह्यते तदनन्यत्वे हेत्वंतरमाह भावे चोपलब्धेः भावपदं कारणस
त्तावाचकं तदुपलब्ध्युपलक्षणार्थं एवमुपलब्धिपदं कार्योपलब्धिवाचकं सत्वोपलक्षणार्थं तेन
याचायं प्रयोगः विकारः कारणादनन्यः कारणसत्वोपलंभानुविधायिसत्वोपलंभवत्वात्॥
यो यस्माद्भिन्नः न स तत्सत्वोपलंभानुविधायिसत्वोपलंभवान् घटात्पट इति दृष्टांतानुपलंभ
पदद्वयत्यागे वह्निसत्वाऽनुविधायिधूमे व्यभिचारः स्यात् तद्वारणाय तदुद्दहणं सत्वपदद्वय
त्यागे यथा स्वनस्त्रेचालोकसत्वोपलंभानुविधायिज्ञानवतिरूपे व्यभिचारः अतस्तदर्थं त
द्ग्रहणमिति यद्वा भावाच्चोपलब्धेरिति सूत्रं न केवलं शब्दादेवाकार्यकारणयोरनन्यत्वं किं तु प्र

6

वे.सू.
वृ.

सत्त्वोपलब्धेर्भावाच्चानन्यत्वमित्यर्थः नहि तंतुव्यतिरेकेण पटो नाम कश्चिदुपलभ्यते किंतु सं
योगविशेषावच्छिन्नास्तंतव एव पटव्यवहारविषयाः प्रत्यक्षमुपलभ्यंते अतो नान्यत्वं विका
रस्य. सत्वाच्चावरस्य अवरस्य कार्यस्योत्पत्तेः प्राक्कारणात्मनाऽनन्यत्वेन सत्वश्रवणाद्दृष्टत्वाच्च नेतर
मनन्यत्वसिद्धमित्यर्थः ब्रह्म वा इदमग्र आसीदित्यादौ प्रपंचोपस्थापके पदस्य ब्रह्मसामाना
धिकरण्यात्तदनन्यत्वं अन्यथा ब्रह्मात्मना पूर्वं प्रपंचस्याऽसत्वे ततउत्पत्त्यनुपपत्तेः नहि
सिकतात्मनाऽविद्यमानं तैलं ताभ्यो जायते इति असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषा
त् नन्वसद्वा इदमग्र आसीदित्यादिना प्रागुत्पत्तेरसत्वव्यपदेशान्न कार्यस्य कारणात्मना पूर्वं स
त्वमिति चेन्न असत्ताऽसत्वाऽभिप्रायेणायमसत्वव्यपदेशः किंतु व्याकृतत्वरूपधर्मोऽपेक्षया
अव्याकृतत्वं धर्मांतरं तेन धर्मांतरेणायमसत्वव्यपदेशः कुतः वाक्यशेषात् तत्सदासीदि
ति वाक्यशेषः पूर्वं असत्त्वं तावत्सतो ग्रहणेनावाध्यते असदेवेदमित्यत्रासत्वं किंतु कं किंवा सदेवान्
भिव्यक्तनामरूपमिति संदेहे अनभिव्यक्तनामरूपं असत् न तु तुच्छमिति निश्चीयते असीदित्यतो
तत्कालसंबंधोक्तेश्च नभूमिति तस्माद्व्याकृतं सदित्युच्यते अव्याकृतं चासदिति सिद्धं कारणान
न्यत्वं कार्यस्य युक्तेः शब्दांतराच्च कारणानन्यत्वमुत्पत्तेः प्राक् सत्वं चेति शेषः युक्तेरेवं घटो जाय
त इति प्रतीत्या घटस्य तावदुत्पत्तिकर्तृत्वं प्रतिभाति न हि उत्पत्तेः प्रागसत्वे घटस्याऽसत्वे तत्कर्तृ

६

त्वंयुक्तं तस्मात्कारणात्मनासत्त्वेव घटः उत्पत्तिकर्त्ता किंच सदात्मना पूर्वं घटस्य असत्वेऽसद्देव घटा
र्थिना नोपादीयेत असत्वाविशेषात् किंचिदेवोपादीयेन्नेत्येवमाद्यायुक्तिरूह्या एवं सत्वंउदाहृता
मृत्खण्डहेतोरेः सदेव सोम्येदमग्र आसीदित्यादौ विद्यमानस्य खण्डस्तस्मादपि कारणादनन्यत्व
पूर्वमुत्पत्तेः सत्वं चेत्यर्थः युक्तेरित्येतत् प्रपंचयति पटवच्च ननु सत घटाभिन्नो विलक्षणप्रति
तीविषयत्वात् घटापटवदित्युक्ते तस्य हेतोर्व्यभिचारमाह पटवच्चेति यथासंवेष्टितप्रसारि
तपटस्य विलक्षणप्रतीतिविषयत्वेपि न भेदः एवं मृद्घटयोरित्यर्थः न विलक्षणकार्यकारित्वम
पि हेतुः व्यभिचारादित्याह यथा च प्राणादि यथा प्राणायामादिना निरुद्धप्राणनादिः जी
वः न मात्रं कार्यं निर्वर्त्तयति अनिरुद्धस्त्वाकुंचनप्रसारणादिकं कार्यं करोति न तावता तस्य
प्राणस्य भेदोऽस्ति तस्मात्कार्यकारणयोरनन्यत्वं सिद्धं तदनन्यत्वाच्चैकविज्ञानात् सर्ववि
ज्ञानप्रतिज्ञासिद्धा भवति इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः एवं कार्यस्य कारणा
दनन्यत्वमेव विज्ञानप्रतिज्ञासिद्धये समर्थितं तर्हि तेनैव न्यायेन जीवब्रह्मणोरप्यभेदाज्जीव
धर्मा हिताकरणादयः ब्रह्मणि प्रसज्येरन्नित्याक्षेपात् संगतिः जीवाभिन्नं ब्रह्म जगदुपादान
मिति वचनसमन्वयो विषयः तत्किं यदिताहक ब्रह्म जगज्जनयेत् न तर्हि स्वानिष्टं जनयेदि
ति तर्केण विरुध्येत न वेति संदेहे पूर्वपक्षमाह इतरव्यपदेशादिति इतरस्य जीवस्य तत्त्वम

7 वे॰ सू॰ वृ॰

मीत्यादिना ब्रह्मत्वव्यपदेशात् इतरस्य ब्रह्मणो वाऽनेनं जीवात्मनाऽनुप्रविश्यत्यादि शारीर
त्वव्यपदेशाद्ब्रह्मणः स्वस्रष्टृत्वं जीवस्यैव स्रष्टृत्वं स्यात् तथा च हिताकरणादिदोषप्रसक्तिर्ब्र
ह्मणः न नत्वभ्यासेन अहितरोजमरणादिबहुविधानर्थकरणरूपः दोषस्य प्रसक्तिरित्य
र्थः आदिपदेन जीवस्य जरादिकं मया सृष्टमिति ज्ञानं स्यात् तत्संहर्तृत्वं च स्यादिदोषाग
ह्यंते तस्मात् जीवाभिन्नब्रह्मणो नानिष्टप्रपंचजनकत्वं अभ्यान्तचेतनत्वादिभिन्नचेतनोपादा
नकं जगदित्याद्धेपसत्त्वार्थः समाधत्ते अधिकं तु भेदनिर्देशात् तु शब्दः पक्षव्यावृत्त्यर्थः यतः
शारीरदधिकं अन्यत् सर्वज्ञं सर्वशक्ति ब्रह्म जगदुपादानकारणं चेति ब्रूमः अतो न हिताकरणा
दिदोषप्रसक्तिः कुतः भेदनिर्देशात् आत्मा वा अरे द्रष्टव्यः सता सोम्य तदा संपन्नो भवतीत्या
दिना कल्पितस्य भेदस्य व्यपदेशादित्यर्थः न हि ब्रह्मणो नित्यमुक्तस्य हितमहितं वा किंचिदस्ती
ति न हिताकरणादिदोषप्रसक्तिः कल्पितभेदमादायैव सर्वोऽसौ कार्योपपद्यतेति तात्पर्यार्थः न
नेकरूपब्रह्मणो जगत्कारणत्वे कार्यवैचित्र्यं न स्यादिति दोषं दृष्टान्तेन परिहरति अश्मादिवच्च
तदनुपपत्तिः यथा लोके एकपृथिवीजन्यानामश्मनां वज्रवैडूर्येन्द्रनीलपद्मरागादिभेदेन
वैचित्र्यं एवं ब्रह्मकार्याणां स्वरूपवैचित्र्यं युज्यते ननु एकब्रह्माश्रितकार्येषु कथं धर्मवैचित्र्यं क
थं वा अर्थक्रियावैचित्र्यमित्याशंकानिरासार्थं आदिवच्चेत्युक्तं तस्यार्थः यथा एकपृथिव्याश्रि

शि॰ 6

तानां वीजानां वहुविधपत्रपुष्पफलगंधरसादिवैचित्र्यं यथा एकस्मान्नस्य केशनखादिविचित्रा
र्यक्रियाकारित्वं तद्वत्सर्वमुपपद्यत इति तदनुपपत्तिः उक्तदोषाऽनुपपत्तिरित्यर्थः उपसंहा
रदर्शनान्नेति चेत् क्षीरवद्धि असहायात् ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विषयः स किं ब्रह्म
णोपादानं कर्तृ वा असहायत्वात् समन्तवदिति न्यायेन विरुध्यते न वेति संदेहे पूर्वमौपाधिकजी
वभेदाद्धिताकरणादिदोषो नास्तीत्युक्तं संप्रत्युपाधिनोपि विभक्तब्रह्मणः प्रेरकाविकं नास्ति व
स्तुनानात्वाभावादिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते उपसंहारेति लोके कुलालस्य कर्तृत्वं दंडच
क्राद्युपसंहारदर्शनात्स्वदेवाउपादानस्य स्वभिन्नकुलालादिसहायदर्शनात्तदुभयविलक्षण
स्य ब्रह्मणो न जगत्कर्तृत्वमुपादानत्वं वा संभवतीति चेति शंकार्थः समाधत्ते क्षीरवदिति हि श
ब्दो हेत्वर्थः तथा लोके क्षीरं वाह्यसाधनान्यनपेक्ष्य दध्याकारेण परिणमते तद्वत्ब्रह्मापीत्यर्थः
न चौष्ण्यतापेक्षत्वं क्षीरस्यास्तीति वाच्यं औष्ण्यस्य दधिभावत्वरामात्रनिमित्तत्वादिति श्रुतिरप्य
सहायस्य ब्रह्मणः कार्यकारित्वं दर्शयति न तस्य कार्यं कारणं च विद्यते न तत्समश्चाभ्यधिकश्च
दृश्यते पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानवलक्रिया चेति ननु चेतनत्वे सत्यसहाय
त्वं हेतुः अतो न क्षीरे व्यभिचार इत्याशंक्य चेतनदृष्टांतेन तस्य व्यभिचारमाह देवादिवदपि लो
के लोकातेप्यनेनेति लोकः शास्त्रो मंत्रार्थवादेतिहासादिस्तस्मिन्यथा देवाः पितरः ऋषयः इमे

वमादयश्चेतनाः स्वतः सिद्धसामर्थ्याः साधनांतरं वाह्यमनपेक्ष्य संकल्पमात्रेणैव नानाविधकार्य
कर्त्तार उपलभ्यंते तद्वत्सापीत्यर्थः अयं भावः कुलालस्याव दंडाद्यामांतरं च संकल्पादिकं अपेक्ष्य
कार्यकर्त्ता भवति देवादयस्तु साधनांतरं संकल्पमात्रमपेक्ष्य कार्येषु समर्थाः तथा च यथैकस्य
कार्यजननसामर्थ्यं तथैवान्यस्येति नियमाभावात् दृष्टांतेन प्रत्यवस्थानमिति निरवयवाद्ब्र
ह्मणो जगत्सर्गं ब्रुवन्त्समन्वयः सावयवस्यैव नानाकारेण परिणामदृष्टिन्यायान विरुद्धनेनवे।
क्षीरादिदृष्टांतकथनेन ब्रह्मणः परिणामित्वभ्रमोऽस्यास्संदेहे कार्यकारणभावसंगत्या।
पूर्वपक्षयति कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा पूर्वाधिकरणस्य भ्रमोत्पादकत्वेन का
रणत्वेनैतस्य कार्यत्वमिति बोध्यं ननु ब्रह्म निरवयवं वा परिणमते उत सावयवं वा आद्ये कृ
त्स्नस्य ब्रह्मणः कार्याकारेण परिणामप्रसक्तिः ततश्च कार्यव्यतिरिक्तं ब्रह्म न स्यात् तदुक्तानत्व।
श्रुतिविरोधश्च कार्यस्य प्रत्यक्षत्वात् द्वितीये कृत्स्नप्रसक्तिर्नास्ति एकांशे परिणामेपि अपरां
शस्थितिसंभवात् तथापि निष्कलमित्यादिनिरवयवत्वशब्दकोपः उभयस्मिन्पक्षे अनित्यत्व
प्रसंग इति ब्रह्मणः परिणामित्वभ्रममूलकः पूर्वपक्षः सिद्धांतयति श्रुतेस्तु शब्दमूलत्वा
त् न तावद्दोषनिरासं ब्रूते न तावत्कृत्स्नप्रसक्तिरस्ति कुतः श्रुतेः यथा जगदुपादानत्वं ब्रह्मणः
श्रूयते न एवं कार्यव्यतिरेकेण ब्रह्मणः सत्त्वं श्रूयते एतावानस्य महिमेत्यादौ तथा च श्रुत्यैव वि

रा.८

वर्त्तवादः स्फुटीकृतः नहिपरिणामवादेकार्यव्यतिरेकेणसत्वंसंभवति तस्मात्कार्याव्यतिरे
केणब्रह्मणोऽवस्थानश्रुतेर्नोक्तदोषइत्यर्थः ननुश्रुतिर्वाकथंकार्याऽव्यतिरेकेणब्रह्मणः
सत्वंबोधयेत् उक्तयुक्तिबाधितत्वादित्यतआह शब्दमूलत्वादिति ब्रह्मणः शाब्दैकप्रमाण
कत्वात् यथाशाब्दंकार्योपादानत्वं तदतिरेकेणसत्वंचाविरुद्धमित्यर्थः जगतोब्रह्मविवर्त्त
त्वेनस्वप्नप्रपंचवन्मायिकत्वात्तदुपादानत्वेपिब्रह्मणोनकृत्स्नप्रसक्त्यादिदोषः स्वप्नसाक्षि
वदित्याह आत्मनिचैवंविचित्राश्चहि एवंब्रह्मणीवहियस्माद्धेतोरेकस्मिन्नात्मनिस्वप्नद
शिनिरवयवेविचित्राः सृष्टयः श्रूयंते नतत्ररथानरथयोगानपंथानोभवंत्यथरथान् र
थयोगानपथः सृजत इत्यादौ स्वप्नेरथादीनामभावेकथंतदुपलब्धिरित्याशंक्योक्तंश्रुतिवा
क्येत्यादि सूत्रेचशाब्देनमायाविदृष्टांतंसमुच्चिनोति यथालोकेमायाविस्वरूपानुपमर्द्दे
नैवहस्त्यश्वादिविचित्राः सृष्टयोदृश्यंतेतथाब्रह्मण्यपिविविधसृष्टिरित्यर्थः यश्चोभयो
समोदोषइतिन्यायेनकृत्स्नप्रसक्त्यादीनामडंभ्याव्यत्वंदर्शयति स्वपक्षदोषाच्च सांख्याद
योऽपिनिरवयवंप्रधानंजगत्परिणामीसंगीचक्रुः तथाचकृत्स्नप्रसक्त्यादिदोषाः सर्व
समानाः अणुवादिनोऽपिपरमाणुद्वयसंयोगेनद्व्यणुकादिसृष्टिमंगीचक्रुः ससंयोगः किं
व्याप्यवृत्तिरव्याप्यवृत्तिर्वा आद्येदृष्टविरोधः कर्मप्राथम्यानुपपत्तिर्द्वितीयेसावयवत्वं

विनाऽवयवाप्यवृत्तिसंयोगानुपपत्तिर्निरवयवत्वव्याकोपश्चेत्यादयो दोषाः समानाः ब्रह्मवादे ते
दोषान्संतीव तस्माद्दूषितं तत्त्वमुपपन्नः रमात्मकारणवादः एकस्यापि ब्रह्मणो विचित्रकार्यश
क्तिमत्वमुक्तं तत्समर्थयति सर्वोपेता च तद्दर्शनात् मायाशक्तिमतो ब्रह्मणो जगत्सर्गं ब्रुवन्
समन्वयोः शरीरस्य नु मायेनिमायेन विरुध्यते नवेति संदेहे पूर्वोक्तशक्तिमत्त्वविषयकशंका
निराकरणेन तत्समर्थनात्मकत्वात् विषयविषयीभावसंगत्या विरुध्यत इति पूर्वपक्षे राद्धांतः
सर्वोपेता सर्वशक्तियुक्ता परा देवता कुतस्तद्दर्शनात् तस्य सर्वशक्तियोगस्य श्रुतौ दर्शनात् दि
व्यर्थः सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तः इत्यादिश्रुतिर्दृष्टव्यः विकरण
त्वान्नेति चेत्तदुक्तं सर्वशक्तियुक्तानामपि देवादीनां चक्षुरादिकरणवतामेव विचित्रकार्यकर्तृ
त्वमवगम्यते अचक्षुष्कमश्रोत्रमित्यादिना ब्रह्मणो विकरणत्वावगमान्न कर्तृत्वमिति चेत् य
त्रोत्तरं वक्तव्यं तत्सर्वमेव न विलक्षणत्वादेवादिवदपि लोके इत्यादावुक्तं श्रुत्यैक समधिगम्यत्वा
च्च न तर्केण विरोधाशंका यथा एकस्य तथैवान्यस्येति नियमाभावादित्यादिकमित्यर्थः ब्रह्म
णो जगत्कर्तृत्वे दैवांतरेणाऽऽक्षिपति न प्रयोजनवत्त्वात् अवाप्तसकलकामात् ब्रह्मणो
जगत्सर्गं ब्रुवन् समन्वयो ब्रह्मविनाफलेन न संगच्छते अभ्रांतचेतनत्वात् समनवद्वितियाये
न विरुध्यते नवेति संदेहे पूर्वोक्तकर्तृत्वादेपसंगत्या पूर्वपक्षः ब्रह्मणो जगत्कर्तृत्वं न संभ

वर्त्तिनिमित्तत्वेन प्रयोजनाभिसंधिरहितत्वात् प्रेक्षावत्प्रवृत्तेः प्रयोजनवत्तावश्यमादिति अत्र
राद्धांतः लोकवत्तु लीलाकैवल्यं तदुक्तशंकानिरासकः यथा लोके राजतदमात्यादीनांपफलं
विनैव लीलारूपाः प्रवृत्तयो दृश्यंते यथा वोच्छ्वासादयः स्वभावादेवोत्पद्यंते एवं ब्रह्मणोपि विचि
त्रकार्यरचना लीलाकैवल्यं केवललीलामात्रेण फलसापेक्षं कथं चिद्रुजादीनां लीलायां फ
लासंभवेपि नित्यतृप्तस्य ब्रह्मणो लीलामात्रमेतदित्यभिप्रायः विधांतरेण ब्रह्मणः कारण
त्वमाक्षिप्य समाधत्ते वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति निरवद्याद्ब्रह्मणो जगत्स
र्गं ब्रुवन् समन्वयो यो विषयस्तद्विषयकत्वोक्तसावद्य इति स्यात्तेन विरुध्यते नवेति विशये पूर्वमाया
मप्या लीलाया ब्रह्मणो यत्स्रष्टृत्वमुक्तं तस्याऽत्राक्षेपात्संगतिसिद्धौ पूर्वपक्षः ब्रह्म किं प्राणि
कर्मसापेक्षं जगत्कर्तृ निरपेक्षं वा नाद्यः अनीश्वरत्वप्रसंगात् द्वितीये वैषम्यनैर्घृण्यप्र
सज्येयातां कांश्चित्तिर्यगादीनत्यंतदुःखिन उत्पादयति कांश्चिन्मनुष्यादीन्सुखदुःखसाधार
णान् कांश्चिद्देवादीनत्यंतसुखिन इति वैषम्ये सर्वसंहर्तृत्वाच्च नैर्घृण्यं तत्र तस्य सावद्यत्वप्रसंगे
वतस्मान्निरवद्यस्येश्वरस्य न जगत्कर्तृत्वमिति शंकानिरासमाह वैषम्यनैर्घृण्ये न स्यातां क
स्मात्सापेक्षत्वात् प्राणिकर्मसापेक्षत्वात् कर्मानपेक्षत्वे हि वैषम्यादिः स्यान्न सापेक्षत्वे तस्य

10
वे॰ सू॰
१० प्र॰

र्थः नच सापेक्षत्वे ऽनीश्वरत्वं भृत्यादिसेवाऽनुसारेण फलदातृराज्ञोऽराजत्वादर्शनात् ईश्वरस्य
पर्जन्यवद्दृष्टव्यः यथा तत्तद्बीजस्यापि न पर्जन्यं विनाऽङ्कुरोत्पत्तिस्तद्वदिति कर्मणो वोप
पत्तौ किमर्थमीश्वरस्वीकार इति वाच्यं श्रुत्याप्रवाक्तनमित्यादिभाष्ये दूषितत्वात् नन्वीश्वरस्य
कर्मसापेक्षत्वं कुत इत्यत आह तथाहि दर्शयतीति श्रुतिः स्मृतिश्चेत्यर्थः एष ह्येव साधु कर्म का
रयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते इ
ति पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्याद्या श्रुतिः यमुन्तिनीयते ऊर्ध्वं नेतुमिच्छतीश्वर
स्तं साधु कर्म कारयति पूर्वजन्मकृतसुकृतवशादिति योजना पुण्यः सुखी पापो दुःखी स्यादिति स्मृत्ये
यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्याद्या द्रष्टव्या न कर्माविभागादिति चेन्नानादित्वात्॥
सदेव सोम्येदमग्र आसीदेकमेवाऽद्वितीयमित्यादिना सृष्टेः प्रागविभागावधारणात्तदानीं
कर्माऽभावात्ततः कर्मापेक्ष्य याविषमा सृष्टिरित्यसंगतमिति चेन्न अनादित्वात्संसारस्य बीजा
ङ्कुरवद्धेतुहेतुमद्भावोपपत्तेरित्यर्थः पूर्वसृष्टौ संपादितधर्माप्रपंचस्याऽत्यन्तिकनाशाभावात्प्र
लयोत्तरसृष्टेन किंचित्तद्बाधकमिति भावः ननु संसारस्याऽनादित्वं कुत इत्यत आह उपपद्यते
चाप्युपलभ्यते च संसारस्याऽनादित्वमुपपद्यते च अन्यथा अकस्मादेव सृष्टिस्वीकारे मुक्तस्या

शि॰ १०

पिपुनर्जन्मप्रसंगात् सर्वस्य सृष्टिसादृश्यानुपपत्तेश्चेत्युक्तिः स्यात्तयोः संसारस्याऽनादित्वमुपलभ्यते च अनेन
जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति प्राणधारणनिमित्तेन जीवशब्देन सृष्ट्यादौ शारीर
मभिलपन् प्राणधारणादि संसारस्याऽनादित्वं दर्शयतीति धाता यथापूर्वमकल्पयदित्याद्याश्रुति
रपि पूर्वकल्पसद्भावं दर्शयति स्मृतिरपि संसारस्यानादित्वमाह न रूपमस्येह तथोपलभ्यते नान्तो न
चादिर्न च संप्रतिष्ठेति स्मृत्यर्थस्तु अस्य संसारवृक्षस्य कल्पितस्य रूपं पारमार्थिकं स्वरूपं ब्रह्मतया
घटादिवत् इदम्प्राकृते व्यवहारभूमौ नोपलभ्यते न चान्तोऽवधिरस्य संसारस्य विना ब्रह्मविद्यामुपलभ्य
ते नाप्यादिः अनिर्वचनीयत्वादेव नाऽपि संप्रतिष्ठा मध्यमिति इदानीं परपक्षप्रतिषेधप्रधानं पाद
मारब्धुकामः स्वपक्षनिर्दुष्टतामुपसंहरति सर्वधर्मोपपत्तेश्च पूर्वाधिकरणे कर्मवशादीश्वरस्य
विषमसृष्टिहेतुत्वमुक्तं तेन वस्तु विषमसृष्टिप्रयोजकं कर्मणः सत्वात् तद्वत् उपादानत्वप्रयोजक
न गुणत्वस्याऽभावान्नोपादानत्वमिति प्रत्युदाहरणे नास्यारंभः निर्गुणाद्ब्रह्मणो जगत्सर्गं ब्रुवन्
समन्वयो पन्निर्गुणत्वेनोपादानं यथा गंधवत्तेति न्यायेन विहन्यते नेन वेति संदेहे विरुध्यत इति प्राप्ते ब्रू
मः सर्वधर्मोपपत्तेश्चेति सर्वजगत्कारणत्वसर्वज्ञत्वादयः कारणधर्माः ये विद्यन्ते तेषां पूर्वोक्तप्र
कारेण ब्रह्मण्युपपत्तेर्ब्रह्मैव जगत्कारणमिति औपनिषदं शास्त्रं निर्दोषमित्यर्थः अयं भावः य
न्निर्गुणं तन्नोपादानमिति व्याप्तौ किं परिणामित्वाभावो व्यापकः उत विवर्त्तोपादानत्वाऽभावः ना

वे॰ र॰ ११

यः इष्टत्वात् नहितीयं आरोपितानित्यत्वोपादानेऽज्ञानजामादौ व्यभिचारात् तस्मान्निर्गुणत्वे ब्रह्म
णो विवर्त्तजगदुपादानत्वमविरुद्धमिति तस्मान्न कथमपि समन्वयस्य विरोध इति सिद्धं इति द्विती
याध्यायस्य प्रथमः पादः इयता प्रबंधेन मुमुक्षूणां सम्यक्कृत्तानोत्यन्तयेवाक्यानां समन्वयः प्र
तिपादितः तस्मिन्न समन्वये परपरिकल्पितदूषणनिरासेन स्वपक्षः स्थापितः इदानीं स्वपक्ष
मद्वैतशास्त्रे निर्विचिकित्सप्रवृत्तिसिद्ध्यै परमतदूषणप्रधानः पाद आरभ्यते रचनानुपपत्तेश्च
नानुमानं सांख्यमतं स्वशिष्टपरिगृहीतत्वेनाभ्यर्हिततमत्वात् तदादौ निराक्रियते एवमीक्षतेर्नाशब्दमि
त्यादिना प्रधानपरत्वेन वेदान्तानां व्याख्यानानां निरस्तत्वेऽपि प्रधानसाधकवेदनिरपेक्षयुक्तीनामाभा
सत्वमुच्यते इति न पौनरुक्त्यं अत्र सांख्यादिमतनिरासेन समन्वयस्य तन्मतविरोधनिरासद्वा
रा दृढीकरणादस्य पादस्य शास्त्राध्यायसंगतिर्बोध्या समन्वये विरोधनिरासेन स्वपक्षस्थापनपर
प्रथमपादेनास्य पादस्योपजीव्यभावः संगतिः स्वपक्षस्थापनं विना परमतनिरासायोगात् स्व
सिद्धान्तस्थाने द्वैतवादात् एवं पादस्योपजीव्यत्वं बोध्यं परमतनिरासपरत्वादेव सर्वेषामधिकरणा
नां पादसंगतिः सर्वधर्मोपपत्तेश्चेत्यनेन ब्रह्मणि कारणधर्माणामुपपत्तिरित्युक्तं तेषां प्रधान ए
वोपपत्तिः किं न स्यादित्याक्षेपस्यात्र निरासात् अनयोरधिकरणयोराक्षेपलक्षणावान्तरसंगतिः फलं तु
पादसमाप्तिपर्यन्तं परमतयुक्तिविरोधाविरोधाभ्यां समन्वयासिद्धितत्सिद्धी इति विवेकः तत्र प्रधानं

रा॰ ११

अचेतनं जगदुपादानमिति सांख्यसिद्धान्तो विषयः संदिग्धमानस्यैवाधिकरणविषयत्वात् स
च सिद्धान्तः संदिह्यते किं प्रमाणमूलो वेति तत्र प्रमाणमूल एवेति युक्तं तथा हि बाह्याध्यात्मिकं ज
गत्सुखदुःखमोहात्मकसामान्योपादानकं भवितुमर्हति तदन्वितत्वात् यद्यदन्वितं तत्तदुपादान
कं यथा मृदन्वितं घटादिकं मृदुपादानकमिति तथा च यदेवं सुखदुःखमोहात्मकं किंचित्सिद्धं तदे
व सत्त्वरजस्तमोगुणात्मकं प्रधानमिति प्रामाणिकः सांख्यसिद्धान्तः इति प्राप्ते ब्रूमः उक्तेन मानसि
द्धं प्रधानेन जगदुपादानं कुतः रचनानुपपत्तेः चेतनाप्रेरितात्स्रष्टव्यज्ञानशून्यात्प्रधानादने
कविधविचित्रजगद्रचनानुपपत्तेरित्यर्थः लोके विचित्रप्रासादादिरचनायां बुद्धिकुशलशिल्पि
दिकार्यत्वदर्शनादिति भावः सूत्रे चशब्देन हेतोः स्वरूपासिद्धिं समुच्चिनोति सुखादीनामान्तरत्वप्र
तीतेस्तदन्वितं जगतोऽसिद्धं तस्मादप्रमाणिकः सांख्यसिद्धान्तः इति १ प्रवृत्तेश्च २ साम्याव
स्थापन्नगुणादिप्रधाने साम्यावस्थायां च न किंचित्कार्यं जायते किंतु साम्यावस्थाप्रच्यवेन गुणा
नामङ्गाङ्गीभावे जाते कार्यस्योदय इति प्रक्रिया सांख्यानामुक्ता लोकेऽचेतनरथादिप्रवृत्तेश्चेतनाधी
नत्वदर्शनात् प्रधानस्य साम्यावस्थाप्रच्युतिरूपप्रवृत्तेश्चेतनप्रेरणं विनानुपपत्तेरित्यर्थः २।
पयोम्बुवच्चेत्तत्रापि ३ नन्वचेतनस्य स्वयं प्रवृत्तिरपि दृश्यते यथा क्षीरं वत्सविवृद्धये स्वयमेव प्रव।
र्तते यथा वा जलं स्वयमेव स्यन्दते तथा पयोम्बुवत्प्रधानं स्वयमेव प्रवर्तत इति चेन्न पत्रत्रापि परमा

12
वे. सू.
अ. १२ हं.

त्वात्प्रेरकः श्रूयते योऽप्सु तिष्ठन्नित्यादिना तथा च पक्षत्वान्न व्यभिचारः पयोम्बुनोरिति भावः ३
व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ४ अपि च न स्वतन्त्रं प्रधानं जगदुपादानं कुतः व्यतिरेका
नवस्थितेः स्वतन्त्रस्य तस्य कारणत्वे सर्वदा कार्यप्रसक्तौ कदापि कार्यव्यतिरेकस्यावस्थित्य
भावप्रसंगादित्यर्थः तदपि कुतः अनपेक्षत्वात् स्वतन्त्रस्य प्रधानस्य चेतनादिसहकार्यन्तरा
नपेक्षत्वाभ्युपगमादित्यर्थः ४ अन्यत्राभावाच्च न तृणादिवत् ५ ननु तृणोदकादिकं निमि
त्तान्तरानपेक्षमेव क्षीराकारेण परिणमते तद्वत्प्रधानमपीति चेन्न कुतः अन्यत्राभावात् धेन्वादे
रन्यत्र बलीवर्दादौ तृणादेः क्षीरभावस्याभावादित्यर्थः तथा च धेन्वादिसापेक्षमेव तृणादिकं क्षी
रीभवति निरपेक्षत्वे बलीवर्दादावपि क्षीरीभावप्रसंग इति भाव ५ अभ्युपगमेऽप्यर्थाभावात् ६ प्रधा
नस्य स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्यापेक्षाभावप्रसंगादित्यर्थः न चेष्टापत्तिः प्रधानमचेतनं
चेतनस्य पुरुषार्थं साधयितुमेवं प्रवर्त्तत इति स्वाभ्युपगमविरोधादिति भावः यद्वा अर्थाभावात्प्र
योजनाभावादित्यर्थः तथा हि न तावत्प्रधानप्रवृत्तिः पुरुषस्य भोगार्थानमात्रत्वादनिर्मोक्षप्रसं
गात् नाप्यपवर्गार्थो भोग्याभावप्रसंगात् प्रधानस्याप्रवृत्तिः प्रसंगाच्च पुरुषस्य स्वरूपेणाव
स्थितिलक्षणस्य मोक्षस्य प्रधानाप्रवृत्त्यैव सिद्धेस्तस्मात्प्रयोजनाभावान्न प्रधानस्य जगद्धेतुत्वं ६
पुरुषाश्मवदिति चेत्तथापि ७ ननु पुरुष एव प्रधानस्य प्रवर्तकः ननु स्वयं प्रवर्तमानः क

यं परं प्रवर्तयेदिति चेत्पुरुषाश्मवदिति ब्रूमः लोके यथा पंगुः पुरुषः स्वयमवर्तमानोंधं प्रव
त्तिशक्तिमंतं प्रवर्तयति यथा वायस्कांतोश्मा सन्निधिमात्रेणायः प्रवर्त्तयति एवं पुरुषः प्र
वर्तक इति चेन्न यतस्तथापि दोषाणामनिर्मोक्षः तथाहि प्रधानस्य पुरुषप्रेर्यत्वे प्रधानस्वातंत्र्य
मिति स्वाभ्युपगमविरोधः पुरुषप्रवर्तकत्वेऽकर्तृत्वहानिः स्वस्य व्यापारं विना प्रवर्तकत्वायोगात् पं
गोरपि व्यापारस्य स्पष्टत्वात् अयस्कांतस्य तु नित्यसंनिधिरेव व्यापारः प्रधानपुरुषसन्निधेर्नित्यत्वे व्यापा
रत्वायोगः नित्यस्यापि व्यापारत्वे प्रधानप्रवृत्त्यविच्छेदप्रसंग इत्यादयो दोषा द्रष्टव्याः ब्रह्मणस्त्वा
विद्यकं प्रवर्तकत्वमिति न कौटस्थ्यहानिः ७ अंगित्वानुपपत्तेश्च ८ अपि च गुणत्रयसाम्यावस्था
प्रकृतिः प्रच्युतसाम्यानां गुणानामंगांगिभावो महदाद्युत्पत्तिरिति वदता सांख्येन वक्तव्यं प्रकृतिः किं कूट
स्थाऽउत विकारिणी आद्ये परस्परानपेक्षाणां गुणानां साम्यावस्थायाः प्रच्युत्या अंगांगिभावानुपपत्तेः
कार्यानुदयप्रसंगः प्रच्युतत्वांगीकारे स्वरूपहान्यापत्तेः द्वितीये किं स्वतः प्रच्युतिः उतान्यतः नाद्यः
सदा कार्यप्रसंगात् न द्वितीयः पुरुषस्योदासीनत्वाभ्युपगमहानेश्च अतः प्रच्युत्यभावेनांगां
गिभावानुपपत्तेः कार्याभावप्रसंग इत्यर्थः ८ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ९ न
ननपेक्षास्वभावाः कूटस्थाश्च गुणाः नानुमीयंतेऽस्माभिः किं त्वन्यथा प्रकारांतरेणैव यथा का
र्योत्पत्तिसंभवः तथानुमीयंते कार्यानुमेयत्वात् प्रधानस्यांगांगिभावसंभवात् कार्योत्पादः ॥

13

वे॰
सू॰
वृ॰

संभवतीतिचेन्न तत्र शक्तिवियोगात् गुणानां ज्ञानशक्तिरहितत्वादित्यर्थः अयंभावः अचेतनानां गु
णानां साम्यावस्थाप्रच्युत्यादियोग्यत्वेपि प्रच्युतेर्निमित्ताऽसंभवात् किंचिन्निमित्तं वक्तव्यं तथाचा
न्यस्य निमित्तस्याऽसंभवेन स्वतो वैषम्ये सर्वदा वैषम्यं स्यात् स्वतोप्यवैषम्ये सदा साम्यप्रसंग इत्यंगां
गित्वानुपपत्तिस्तदवस्थेति कार्यानुत्पादोपि तदवस्थ इति ९ प्रतिषेधाच्चासमंजसम् १० सां
ख्यादिषु क्वचिन्महतः पंचतन्मात्रसर्गं ब्रुवंति क्वचिदहंकारात् क्वचिदेकादशेंद्रियाणि क्वचि
त्सप्तेंद्रियाणि त्वगिंद्रियेंतर्भाव्य सप्तेंद्रियाणीति स्थापयंतीति तथाच परस्परविप्रतिषेधादसमं
जसं सांख्यमतमित्यर्थः तस्मात्सांख्यमतस्य भ्रांतिमूलत्वात्तदीययुक्तिविरोधः समन्वयस्य
नास्तीति सिद्धम् १० ननु प्रपंचस्य ब्रह्मोपादानकत्वे ब्रह्मवच्चैतन्यं स्यात् कारणगुणस्य कार्ये
वश्यंभावादित्याशंक्य तन्नियमं तदीयप्रक्रियया व्यभिचारयति महद्दीर्घवद्वा ह्रस्वपरिमंडला
भ्याम् प्रपंचस्य प्रधाननिष्ठावृत्त्यादिगुणानन्वयात् प्रधानोपादानकत्ववद्ब्रह्मगुणचेतन
त्वानन्वयात् ब्रह्मोपादानकत्वं न स्यादिति दृष्टांतसंगत्याऽस्यारंभः यद्यपि स्वपक्षे दोषनिरासा
त्मकस्य अस्याधिकरणस्य नात्र संबंधः किंतु स्मृतिपाद एव तथाप्युक्तार्थांतरसंगतिर्लोभा
दिह लिखितमिति मंतव्यम् अत्र चेतनाद्ब्रह्मणो जगत्सर्गोऽयुक्तः समन्वयो विषयः स किंका
रणगुणाः कार्ये स्वसमानजातीयगुणारंभका इति न्यायेन विरुध्यते न वेति संदेहे विरुध्यत

इति प्राप्ते व्यभिचारान्न विरोध इति राद्धान्तः सूत्रे वाशब्दश्चार्थोऽनुक्तार्थसमुच्चयं ब्रूते तथा च ह्र-
स्वपरिमंडलाभ्यां द्व्यणुकपरमाणुभ्यां महद्दीर्घाणुवच्चेतनात् ब्रह्मणोऽचेतनं जगद्भवतीति
योजना वैशेषिका हि ह्रस्वादणोश्च द्व्यणुकान्महद्दीर्घं च त्र्यणुकं जायते द्व्यणुकगतह्रस्व-
त्वाणुत्वे त्र्यणुके स्वसमानजातीयह्रस्वत्वाणुत्वे नारभेते किं तद्द्व्यणुकगतं त्रित्वसंख्या त्र्य-
णुके महत्त्वादिकमारभत इति वदन्ति एवं परिमण्डलात्परमाणोः द्व्यणुकं जायते परमाणुगत-
पारिमाण्डल्यं तु द्व्यणुके पारिमाण्डल्यं न जनयति किं तु परमाणुगतद्वित्वसंख्या द्व्यणुकेऽणु-
त्वादिकमारभत इति प्रक्रियां दर्शयन्ति एवं दर्शयतां वैशेषिकाणां कारणगुणाः कार्ये स्वसमा-
नजातीयगुणारम्भका इति नियमाभासं वदतां कथं लज्जा न भवेत् व्यभिचारस्य स्फुटत्वादिति तात्प-
र्यं एतेन शिष्टापरिग्रहा अपि व्याख्याता इत्यस्यायं प्रपञ्च इति न तेन पौनरुक्त्यं शंकनीयमिति॥
११ इदानीं प्रकृतं परमतनिरासमुपक्रमते उभयथापि न कर्मातस्तदभावः १२ प्रासंगिका-
व्यवहितेनास्य संगतिर्नापेक्षितेति व्यवहितेनोच्यते ननु प्रधानस्याचेतनानधिष्ठितत्वात्कार-
णत्वाभाव तर्हि चेतनाधिष्ठिताः परमाणवः कारणं जगत इति प्रत्युदाहरणेनास्यारंभः अत्र
परमाणुप्रक्रियया जगदुत्पत्तिरिति वैशेषिकसिद्धान्तो विषयः स किं मानमूलो भ्रान्तिमूलो
वेति विशये मानमूल इति प्राप्ते ब्रूमः वैशेषिकाः खलु कर्मणा सृष्टेः पूर्वं निश्चलयोः पर-

14

वे॰ सू॰ वृ॰

माण्वोः संयोगे द्व्यणुकाद्युत्पत्तिरिति वदंति तस्य कर्मणः किंचिन्निमित्तमभ्युपगम्यते नवा आद्ये
कर्मनिमित्तं तेन प्रसिद्धं जीवप्रयत्नाभिघातादिकमंगीकर्तव्यं न हि तत्संभवति सृष्ट्यंतरकालीन
त्वात्तस्येति द्वितीये कर्मानुत्पत्तिः अतः उभयथापि न कर्म अतः कर्माभावात्तदभावः द्व्यणुका
१८ दिक्रमेण सृष्ट्युत्पादाभाव इत्यर्थः यद्वा जीवादृष्टवशादाद्यं कर्म परमाणुष्विति तन्निद्दोतः॥
तथा च तददृष्टं किं जीवनिष्ठं वा परमाणुनिष्ठं वा उभयथापि न कर्मेत्यदृष्टस्याचेतनस्य कर्मा
भिमुख्यायोगात् तथात्वे सर्वदा सृष्टिप्रसंगात् न च जीवोऽदृष्टस्य प्रेरकः तदानीं तस्य ज्ञानव
त्त्वाभावात् न च वैशेषिकाभिमत ईश्वरः प्रेरक इति वक्ष्यते अतः सर्गाभाव इत्यर्थः यद्वा पर।
माण्वोः संयोगात् तैः सृष्टिः विभागोत्पत्तौ च प्रलयः तयोः संयोगविभागयोः कर्मैव हेतुरिति
तन्निद्दोतः तथा च संयोगहेतुः कर्म नास्तीत्युक्तं एवं विभागहेतुकर्म नास्ति निमित्तस्यादृष्टस्य
नोदनादेरसंभवात् अदृष्टं च भोगार्थमेव न प्रलयार्थमित्युभयथापि न कर्म अतः संयोगवि
भागहेतुकर्माभावात् तयोः सृष्टिप्रलययोरभाव इत्यर्थः तस्मादनुपपन्नः परमाणुकार
णवादः १२ समवायाभ्युपगमाच्च साम्यादनवस्थितेः १३ तदभाव इत्यनुषंगः तस्य पर
माणुकारणत्वादस्याऽसंभव इत्यर्थः कुतः परमाणुद्व्यणुकयोः समवायाभ्युपगमात् अ
भ्युपगमे को दोषस्तत्राह साम्यादनवस्थितेरिति यथा द्व्यणुकं परमाणुभ्यामत्यंतं भिन्नं त

१४

समवायमपेक्षते एवं समवायोपि समवायिभ्यामत्यंतं भिन्नः स्वान्येन समवायेन समवायिभ्यां
संबंध्येत भिन्नत्वसाम्यात् असंबद्धस्य संबंधत्वादर्शनात् तथा च तस्याऽपि भिन्नत्वसाम्यात्सम
वायांतरमित्यनवस्था स्यादित्यर्थः स्वरूपस्य संबंधत्वे समवायलोपप्रसंग इति वाच्यम् तथा च स
मवायासिद्धौ समवेतद्व्यणुकादिसृष्टिसिद्धिः स्यादिति भावः १२ नित्यमेव च भावात् १३ परमा
णूनां प्रवृत्तिस्वभावत्वे प्रवर्त्तेर्नित्यमेव भावात्प्रलयाभावप्रसंगः निवृत्तिस्वभावत्वे निवृत्तेर्नित्यमेव
भावात्सृष्ट्यभावप्रसंग इत्यर्थः १४ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् १४ चतुर्विधाः परमा
णवो रूपरसस्पर्शादिमन्तो नित्याश्च एव चेति वैशेषिकसिद्धान्तः स नोपपद्यते तथा हि परमा
णवो नित्याः स्थूलाश्च यवितुमर्हन्ति रूपादिमत्त्वात् घटादिवत् घटादि रूपादिमत्त्वात्स्वकारण।
तेत्वपेक्षया स्थूलो नित्यश्च तद्वज्जगत्कारणस्यापि रूपादिमत्त्वे अनित्यत्वप्रसक्तौ स्वकारणापे
क्षया स्थूलत्वं स्यादिति न जगत्कारणस्य रूपादिमत्त्वमिति तात्पर्यं सूत्रार्थस्तु भवन्मते जगत्का
रणस्य रूपादिमत्त्वात् अणुत्वनित्यत्वविपर्ययः स्थूलत्वमनित्यत्वं च प्रसज्येत लोके रूपादि
मतः घटादेस्तथा दर्शनादिति १५ उभयथा च दोषात् १६ रूपरसगंधस्पर्शात्मिका पृथि
वी स्थूला दृश्यते रूपरसस्पर्शात्मिका आपः सूक्ष्माः रूपस्पर्शात्मकं तेजः सूक्ष्मतरं स्पर्शा
त्मको वायुः सूक्ष्मतमः इत्यनुभवागमसिद्धा प्रक्रिया तत्र पृथिव्यादिवत्परमाणवोप्युपचि

15 वे.
१५ वे
सू.

तापचितगुणात्मकाः कल्पंतेनवा अथायेअणुत्वव्याघातः उपचितापचितगुणात्मकात्पृथिव्यादेःस्व
रूपोउपचयापचयदर्शनात् गुणानांद्रव्याद्व्यतिरिक्तत्वेपितादृशगुणवत्वेनपृथिव्यादीनांउपचयादर्शनात्॥
अणुत्वव्याघातएवनवागुणगुणिनोर्भेदः संभवति भेदेगवाश्ववत् गुणगुणिभावानुपपत्तेः द्वितीयेन
कार्यपृथिव्यादिषुरूपाद्यनुपलंभप्रसंगइत्युभयथापिदोषात्अनुपपन्नः परमाणुकारणवादः १६ अपरि
ग्रहाच्चात्यंतमनपेक्षा १७ प्रधानवादोहिसत्कार्यत्वाद्यंशेनमन्वादिभिः शिष्टैः परिगृहीतः परमाणुका
रणवादस्तुकेनचिदप्यंशेनकैश्चिदपिशिष्टैः नपरिगृहीतः इतिशिष्टापरिग्रहाच्चअत्यंतमनपेक्षापरमाणु
कारणवादकर्तव्यावेदविद्भिरित्यर्थः सूत्रेचशब्देनवैशेषिकाभिमतषट्पदार्थासंभवः सूचितः सचा
संभवः प्रतिपादितोभगवताभाष्यकृता तस्माद्भूत्यैकमूलवैशेषिकादिमतेननसमन्वयस्यविरोधइति
सिद्धम् १७ समुदायउभयहेतुकेपिनदप्राप्तिः १८ वैशेषिकस्यावयवपरिमाणभेदेनदेहादेरान्तरवि
नाशित्वांगीकारादात्मनः स्यापित्वांगीकाराच्चार्धवैनाशिकः सर्वक्षणिकत्ववादिनस्तुपूर्णवैनाशिका
इत्यार्धवैनाशिकवैशेषिकमतनिराकरणानंतरं पूर्णवैनाशिकमतबुद्धिस्यपिदानींनिराक्रियतइत्य
वांतरसंगतिर्दृष्टव्या तत्रतावद्बुद्धमुनिना आगमउपदिष्टः सचागमोवैभाषिकसौत्रांतिकविज्ञानवादि
सर्वशून्यवाद्याख्यचतुर्विधशिष्यप्रतिपत्तिवैचित्र्याच्चतुर्विधोभवति तत्रवैभाषिकसौत्रांतिकयोर्ज्ञानेत
द्व्यतिरिक्तपदार्थाश्चसर्वेक्षणिकाः सत्यभूतः संतिदयानयंभेदः वैभाषिकस्यद्व्यदृष्टपदार्थाः प्रत्यक्षाः

सौत्रांतिकस्य तु ज्ञाने घटाद्याकार उत्पन्ने तेनाकारेण प्रत्यक्षेणाप्रत्यक्षस्य घटादेर्योऽनुमीयते संवेदनगतो
विषयाकारप्रतिबिंबस्तस्य बिंबविषयबिंबसन्निधानपुरःसरः प्रतिबिंबत्वात् दर्पणादिगतमुखादिप्रतिबिंबव
दिति नित्यानुमेया विषया इति तत्रादौ वैभाषिकसौत्रांतिकयोर्बाह्यार्थास्तित्वाविशेषात्तयोर्मतमेकीकृत्य
तन्मतप्रमाणमूलं भ्रांतिमूलं वेति संदेहे प्रमाणमूलमिति प्राह तथाहि पृथिव्यप्तेजोवायवश्चत्वारि भू
तानि चतुर्विधपरमाणुपुंजस्वरूपाणि एवं भौतिकानि रूपादिविषयेंद्रियाणि परमाणुपुंजस्वरूपा।
णि न हि परमाणुसमूहव्यतिरेकेणाऽवयवि नाम किंचित्कार्यमस्तीति परमाणुहेतुकः पृथिव्यादिस
मुदायो बाह्यः आध्यात्मिकश्च समुदायः स्कंधहेतुकः तथाहि रूपविज्ञानवेदनासंज्ञासंस्काराख्यपं
च स्कंधाः तत्र रूपस्कंधः सविषयेंद्रियाणि विषयाणां रूपादीनां आध्यात्मिकत्वमाध्यात्मिकेंद्रियसंब
धात्तद्द्रष्टव्यं अहमित्यालयविज्ञानप्रवाहो विज्ञानस्कंधः सुखादिप्रत्ययो वेदनास्कंधः गौरश्वइत्यादि
नामादिविशिष्टवस्तुविषयकसविकल्पकप्रत्ययः संज्ञास्कंधः रागद्वेषमोहधर्माधर्माः संस्कारस्कंधः
तत्र विज्ञानस्कंधश्चित्तमित्यात्मेति च गीयते इतरे स्कंधाश्चैत्ताः एतेषां चित्तचैत्तानां स्कंधानां समुदायः स
र्वव्यवहारास्पदः आध्यात्मिकश्च स्कंधहेतुक इति सर्वक्षणिकत्ववादिनोर्वैभाषिकसौत्रांतिकयोर्मतं॥
तन्निराकरोति समुदाय उभयहेतुकेपि तदप्राप्तिरिति उभयहेतुकेपि समुदाये परमाणुहेतुके बाह्यस
मुदाये स्कंधहेतुके चाध्यात्मिकसमुदाये च तदप्राप्तिः तस्य समुदायस्याप्राप्तिरित्यर्थः अचेतनानां प

16 ब्र॰ वे॰ स॰
१६

रमाणूनांस्कंधानांचस्वतः समुदायायोगादन्यस्यचस्थिरस्यचेतनस्यसमुदायकर्तुरनभ्युपगमादिति
सूत्रवाक्यशेषः १८ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् १९ ननुसंहंतुश्चेतन
स्याभावेपिसंघातउपपद्यते तथाहिअविद्यासंस्कारोविज्ञानंनामरूपंषडायतनंस्पर्शोवेदनेत्येवंजा
तीयकानामविद्यादीनामितरेतरप्रत्ययत्वादितरेतरकारणत्वात् घटीयंत्रवत् अनिशमावर्त्त
मानेष्वविद्यादिष्वर्थादाक्षिप्तः संघातउपपद्यतेइतिशंकार्थः कार्यंप्रत्ययतेजनकत्वेनगच्छतीति
व्युत्पत्त्याप्रत्ययशब्दःकारणवाचि ततः अविद्यादीनामयमर्थः क्षणिकेषुस्थिरत्वनित्यत्वादिभ्रांतिर
विद्या तस्यांचविषयेषुरागाद्यात्मकसंस्कारहेतुः सचसंस्कारोगर्भस्थाद्यविज्ञानंजनयति तस्माच्चा
लयविज्ञानात्पृथिव्यादिचतुष्टयं शरीरस्यसमुदायस्यकारणभूतंजायतेतदेवनामाश्रयत्वात्
नामेत्युच्यते तच्चनामसितासितादिरूपंतच्छरीरंजनयति गर्भभूतस्यदेहस्यकललबुद्बुदाद्यव
स्थानामरूपशब्दार्थइतिपर्यवसन्नं पृथिव्यादिचतुष्टयंनामरूपंचशरीरंविज्ञानधातुश्चेति
षडायतनानि यस्येंद्रियजातस्यतत्षडायतनंनामरूपेंद्रियाणांमिथः संबंधः स्पर्शः त
तःसुखादिकावेदनाततःपुनरविद्यादयः इतिनिराकरोति नेति कुतःउत्पत्तिमात्रनिमित्तत्वा
त् अयमर्थःद्विविधोहिकार्योत्पादः तत्राभिमतःहेत्वधीनः कारणसमुदायाधीनश्चेति तत्र
हेत्वधीनोयथाबीजादंकुरः अंकुरात्पत्रं पत्राकांडमित्यादौ कारणसमुदायाधीनोयथापृथि

१६

ध्यात्मे जीवाद्यात्मना कालविशेषाणां भेदानेस्मृतितेभ्य उपकृतात् बीजादंकुरो जायते एवमध्यात्मिकः
कार्योत्पादे विशेषवहिर्विषयः तत्राद्यो हेत्वधीनः कार्योत्पाद अविद्यादीनां द्वितीयस्तु पृथिव्यप्ते
जोवाय्वाकाशालयविज्ञानानां समुदायात्कार्योत्पाद इति कार्येंकुरादौ काठिन्यनिहपाकादीनां
दर्शनात्पृथिव्यादीनां कारणत्वमूह्यते उभयविधेपि कार्योत्पादे न चेतनापेक्षेति तत्राद्यमंगीकृ
त्य द्वितीयं कार्योत्पादहेतुसमुदायाधीनं दूषयति उत्पत्तिमात्रनिमित्तत्वादिति अविद्यादीनामि
तरेतरकारणत्वेप्युत्पत्तिमात्रनिमित्तत्वान्न हेतुसंघाताधीनः कार्योत्पादः संभवति संहंतुः स्थिर
स्य चेतनस्यानंगीकारादित्यर्थः १९ सर्वेषुं क्षणिकत्ववादिनां हेत्वधीनोपि कार्योत्पादो न संभवतीत्या
ह उत्तरोत्पादे च पूर्वनिरोधात् २० कार्यकाले विद्यमानस्यैव मृदादेः कारणत्वं दृश्यते न तु नष्ट
स्य भवन्मते तूत्तरस्य कार्यक्षणस्योत्पादे पूर्वस्य कारणक्षणस्य निरोधान्नाशांगीकारान्न हेत्वधी
नोपि कार्योत्पादः संभवतीत्यर्थः २० ननु निर्हेतुक एव कार्योत्पादोस्तु तथा च नोक्तदोषः इत्या
शंक्याह असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा २१ असति हेतौ कार्योत्पत्त्यंगीकारे पूर्वं ज्ञा
नचक्षुरालोकविषयेषु चतुर्षु हेतुषु सत्स्वेव कार्यं नीलादिज्ञानं जायते इत्युक्तायाः प्रतिज्ञाया उप
रोधः स्यात् अन्यथा कार्यं सहेतुकमित्यंगीकृत्य कार्यपर्यन्तं हेतोः स्थित्यंगीकारे हेतुफल
योः यौगपद्यं एकस्मिन्काले स्थितिः स्यादित्यर्थः तथा च क्षणिकत्वप्रतिज्ञाहानिरिति भा

17

वः २१ प्रतिसंख्याप्रतिसंख्याप्राप्तिरविच्छेदात् २२ वैनाशिकाः खलु बुद्धिपूर्वकनाशो भावानाम बुद्धि
पूर्वकनाशश्चाकाशं चेति त्रयमप्यवस्तु सन्निरूपोऽयं निर्हेतुक तुच्छमिति वदंति तत्राकाशस्य निरू
पाख्यत्वमुत्तरसूत्रे निरसिष्यते अत्र तु बुद्धिपूर्वकनाशा बुद्धिपूर्वकनाशरूपनिरोधद्वयं निराक्रि
यते प्रतीपा प्रतिकूला संततघटमसंतं करोमीत्येवमारिका संख्या बुद्धिः प्रतिसंख्या तत्पूर्वको निरो
धो नाशः प्रतिसंख्यानिरोधः अतत्पूर्वको नाशोऽप्रतिसंख्यानिरोधः तयोर्निरोधयोः संतानिषु सं
तानेवाप्राप्तिरसंभव इत्यर्थः कुतः अविच्छेदात् नतावन्निरोधद्वयस्य संतानस्याविच्छेदात् संता
नविच्छेदो हि चरमसंतानिविच्छेदाद्वक्तव्यः स च न युक्तः चरमसंतानिनः कार्यांतरजनकत्वे संता
नस्याविच्छेद एव अजनकत्वे चरमसंतानिनोऽर्थक्रियाकारित्वरूपसत्त्वाभावेनासत्त्वात्तत्पूर्वसंता
निनां सर्वेषामसत्त्वतापरिशेषापत्तिः अर्थक्रियाया अभावात् नापि संतानिप्रतियोगिकत्वं निरोध
द्वयस्य संतानिनो घटादीनां क्षणिकत्वेन बुद्धिपूर्वकनाशायोगात् नाप्यबुद्धिपूर्वकः स्थूलनाशस्त्व
दभ्युपगमः संभवति स्थूलस्य घटादेः प्रत्यभिज्ञायमानत्वात् तस्मान्निरोधद्वयस्यानुपपत्तिः २२
उभयथा च दोषात् २३ स्थिरत्वादिभ्रांतिरूपाविद्यायाः किं सम्यक्ज्ञानाद्विनाशः उत स्वतो वा नाद्यः
निर्हेतुकनाशाभ्युपगमहानिप्रसंगात् द्वितीये सम्यक्ज्ञानोपदेशानर्थक्यमित्युभयथापि दोषा
त् असंगतं सौगतमतमित्यर्थः २३ आकाशस्य निरूपाख्यत्वं दूषयति आकाशे चाविशेषात् २४

आत्मनः आकाशः संभूत इति श्रुत्या प्राप्तगुणकत्वेन चाकाशस्यापि पृथिव्यादिवद्वस्तुत्वप्रतिपत्तेरविशे
षात् न निरूपाख्यत्वमित्यर्थः २४ आत्मनः क्षणिकत्वं दूषयति अनुस्मृतेश्च २५ अनुभवमनु
अनंतरं उत्पद्यमाना स्मृतिरनुस्मृतिः तद्बलादात्मनोनुभवितुर्न क्षणिकत्वमित्यर्थः अन्यानुभू
तेऽन्यस्य स्मरणायोगादिति भावः २५ नासतोदृष्टत्वात् २६ क्षणिकात्कार्योत्पत्तिमिच्छतां पूर्वादेभा
वान्निरूपाख्यादेव कार्योत्पत्तिमंगीकृतेति प्रतिभाति पूर्वक्षणनाशं विना कार्यक्षणोत्पत्तेरयोगात्
मांतादभावात् भावोत्पत्तिः स्वग्रंथे दर्शिता च तथा चासतः अभावान्निःस्वरूपात्कार्यक्षणोत्प
त्तिर्न युक्ता कुतः अदृष्टत्वात् निरूपाख्याच्छशविषाणादेः कार्योत्पत्तेरदृष्टत्वादित्यर्थः दृ
ष्टत्वादिति वा पदच्छेदः सतएव मृदादेः कार्योत्पत्तेः दृष्टत्वादित्यर्थः २६ उदासीनानामपि चै
वं सिद्धिः २७ किंच एवमभावाद्भावोत्पत्त्यंगीकारे उदासीनानां तत्तत्कार्यसाधनेषु कृष्यादिषु
प्रवर्तमानानां स्वर्गदेहत्वलीनस्य पविष्टानामपि प्रेमास्वस्वाभिमतस्य कार्यस्य सिद्धिः स्यादित्यर्थः
तस्माद्भ्रमैकमूलेन वैभाषिकसौत्रांतिकयोः बाह्यार्थवादिनोर्मतेन न समन्वयस्य विरोध इति सि
द्धम् २७ नाभावउपलब्धेः २८ एवं क्षणिकबाह्यार्थवादनिराकरणे कृते तन्निराकरणमुपजी
व्य क्षणिकविज्ञानमात्रसत्यत्ववादी प्रत्यवतिष्ठते उत्पन्नयोरुपजीव्योपजीवकभावः संगतिः
विज्ञानवादिनो बौद्धस्यायं सिद्धांतः विज्ञानातिरिक्तस्य बाह्यपदार्थस्याभाव इति सोस्यापि

करणस्य विषयः स किं मानमूलो भ्रांतिमूलो वेति संदेहे मानमूल इति प्राप्ते तथाहि नीलादिवि
ज्ञानस्य स्वरूपतः सर्वार्थान्यविशिष्टत्वाद्बाह्यार्थवादिनापि तस्य नीलादिज्ञानत्वस्य सिद्धये नी
लाद्याकारत्वमंगीकरणीयं तथा च तेनैवाकारेण सर्वव्यवहारोपपत्तौ किं बाह्येन नीलादिना वध्या(?)
यमानेन तथा च स्वप्रकाशनीलादिविज्ञानस्य क्षणिकत्वात्साकारत्वाच्च स्यापि निराकारविज्ञानात्
ब्रह्मणो जगत्सर्गं प्रवदन् समन्वयो न सिध्यतीति प्राप्ते ब्रूमः विज्ञानव्यतिरिक्तानामर्थानामभावो
न संभवति कुतः उपलब्धेः विज्ञानातिरिक्तानामर्थानां घटः पट इत्याद्यनुभवसिद्धत्वादित्यर्थः ॥
न च विज्ञानाकारेणानुभवस्यान्यथासिद्धिः बाह्यार्थं विना तत्साकारत्वात्मकाऽऽकारस्य ज्ञानेऽप्रसिद्धेः
एवं च प्रतीयमानो बाह्यार्थ एवेति न ज्ञानस्य साकारत्वेनापि क्षणिकत्वमानाभावात् अनुमानस्य पक्षा
द्यनेकज्ञानसाध्यतया स्याधिन(?) मनुमातारं विनानुदयादिति स्याधिन(?) एकार(?) ब्रह्मणः समन्वयो
न विरुध्यत इति २८ ननु जाग्रदवस्थायामप्यन्यत्वन्त्राः(?) सर्वे प्रत्ययाः निरालंबनाः प्रत्ययत्वात्स्वप्नगं
धर्वनगरमायाविनिर्मितमायादिवत् इत्याशंक्य दृष्टांते बाधितविषयत्वमुपाधिरित्याह वैधर्म्या
च्च न स्वप्नादिवत् २९ स्वप्नादिदृष्टप्रत्ययस्य जाग्रत्प्रत्ययस्य चान्योन्यं बाधितविषयत्वाबाधित।
विषयत्वरूपवैधर्म्यात् स्वप्नादिदृष्टांतेन निरालंबनत्वं जाग्रत्प्रत्ययस्येत्यर्थः चशब्देन दृष्टांते
साध्यवैकल्यं सूचितं स्वप्नदावपि प्रातिभासिकविषयाणां सत्वादिति २९ किंच बाह्यार्थानाम

भावे घटज्ञानं पटज्ञानमित्यादि वैचित्र्यं ज्ञानेन स्यात् नच पूर्वपूर्वज्ञानादि विचित्रवासनावशाद्वा
ह्यार्थवैचित्र्यं स्यादिति वाच्यम् बाह्यार्थाभावे वासनानामभावादित्याह नभावोनुपलब्धेः ३० वा
सनानां न भावो न संभव इत्यर्थः कस्मादनुपलब्धेः त्वत्पक्षे बाह्यार्थानामनुपलब्धेरित्यर्थः वा
सनानां बाह्यानुभवव्याप्यता ज्ञापकाभावे व्याप्याभाव इति बाह्यार्थानुभवस्य वासनां प्रति कारणत्वा
त् कारणाभावे कार्याभाव इति वा तात्पर्यं किंच वासनानां संस्काराभिधानानां त्वत्पक्षे आश्रयासंभ
वादनुपपत्तिः ३० ननु ह्यालयविज्ञानमेवाश्रय इत्यत आह क्षणिकत्वात् ३१ आलयवि
ज्ञानस्य क्षणिकत्वांगीकारान्नाश्रयत्वं संस्काराश्रयत्वे वा न क्षणिकत्वं संस्कारसमानकालीनस्य
वा संस्कारकालेऽसत्त्वाद्वा आश्रयत्वायोगादिति भावः ३१ सर्वथानुपपत्तेश्च ३२ यच्छून्यनातिष्ठते सा
ध्यपशाद्वप्रयोगात् ग्रंथतोऽपपन्नमिदं वेदबाह्यानां मतं उक्तप्रकारेणार्थतोऽप्यनुपपन्नमिति सर्व
थानुपपत्तेर्नादरणीयं श्रेयोऽर्थिभिः सौगतमतमित्यर्थः दर्शनमिति वक्तव्ये पश्यपनेत्यपशब्दः
स्थानमिति वक्तव्ये तिष्ठनेत्यपशब्दः इह शेत्तिष्ठतेऽश्र्यातोःशिति प्रत्यये पश्यतिष्ठादेशो भ
वतः नपुनः प्रत्यये तस्माशितादिति बोध्यम् ननु बाह्यार्थवादस्य केवलविज्ञानमात्रवादस्य चो
क्तरीत्याऽसंभवात् कथं निःस्वरूपमेव प्रपंचतत्त्वं किं न स्यादिति शंकायां पुनर्नाभाव उपलब्धे
रित्यादीनि सूत्राणि शून्यमतनिरासपरत्वेन योज्यंते प्रपंचशून्यत्वस्य सर्वप्रमाणबाधितत्वे

नतेन्द्रियासापदृष्टयकृप्रयत्नानपेक्षणात् तथाहि सतां नार्थयोर्नाभावः प्रमाणेनोपलब्धेरित्यर्थः॥
वैधर्म्याच्चेति सूत्रं पूर्ववद्व्याख्येयं प्रपंचस्त्ववाध्य एवाधिष्ठानं सत्यं किंचिद्वक्तव्यं निरधिष्ठानवाधायोगात्
तस्य चाधिष्ठानस्य सत्वमनेन भावः न सत्वं प्रमाणतस्तदनुपलब्धेरिति सूत्रार्थः क्षणिकत्वाच्चेति सू
त्रे विभक्तेः पूर्वमुपदेशोऽनध्याहारः तथा च कश्चित् तार्थानंगीकृत्य तेषां क्षणिकत्वोपदेशात् पूर्वोप
देशाद्व्याहतार्थबोधकः सुगत इत्यर्थः अत्रत्यसूत्रं कृतव्याख्याने तस्माज्ज्ञानैकशरणबौद्धमते
न तस्य मतस्य विरोध इति सिद्धम् ३२ नैकस्मिन्नसंभवात् ३३ एवं भुक्तकक्षाणां बौद्धानां मतेति नि
रस्ते विवसनानां जैनानां मतं सत्वबुद्धिस्थबुद्धिसन्निधिलक्षणसंगमयानि राक्रियते तत्र संशयः
किं दिगंबरमतं मानमूलं भ्रांतिमूलं वेति विशये मानमूलमिति प्राप्तं तथाहि स्यादस्ति १ स्यान्ना
स्ति २ स्यादस्ति नास्ति च ३ स्याद्वक्तव्यः ४ स्यादस्ति चावक्तव्यः ५ स्यान्नास्ति चावक्तव्यः ६ स्या
दस्ति नास्ति चावक्तव्यः स्व ७ इत्येवंरूपं भंगनयमस्तित्वनास्तित्वादिविरुद्धधर्मद्वयमादाय सर्वे
ष्वपदार्थेषु योजयंतो विवसनाः पदार्थमात्रस्यानेकरूपत्वमाचक्षते उपादानादिव्यवहारसि
द्धये यत्रन्यथा वस्तुन एकरूपत्वे सर्वात्मनास्तित्वे नास्तित्वे वावक्तव्यमिति प्राप्यात्मनापि सत्वाद्व
स्तुप्राप्त्यर्थमुपादानादिव्यवहारो न स्यात् अतः केनचित् घटादिरूपेणास्ति केनचित् प्राप्या
दिरूपेण नास्तीत्यनेकरूपत्वमेव वस्तुनः सप्तभंगनयो नाम सत्वास्तित्वादिषु वक्ष्यमकृत्र

विविधरूपभंगः तत्रयोनययोर्युक्तिः स्यादित्यर्थः स्यादस्तीत्यादेरयमर्थः स्यात्पदंकथंचिदित्यर्थकं
वस्तुनोऽस्तित्वविवक्षायामाद्योभंगः असत्त्वविवक्षायांद्वितीयोभंगः क्रमेणोभयवाञ्छायांतृ
तीयोभंगः युगपदुभयवाञ्छायांअस्तित्वनास्तित्वयोः युगपद्वाच्यावक्तुमशक्यत्वादवक्तव्यत्वं
वस्तुनइतिचतुर्थोभंगः आद्यचतुर्थयोभंगयोः क्रमेणवाञ्छायांपंचमोभंगः इतिद्वितीयचतु
र्थयोर्विवक्षायांषष्ठोभंगः आद्यद्वितीयचतुर्थानांवाञ्छायांसप्तमोभंगः इतिएवमेकत्वानेक
त्वनित्यत्वाऽनित्यत्वादिविरुद्धधर्मद्वयमादायोक्तनययोजनीयः तस्माद्वस्तुमात्रस्यसत्त्वमस
त्त्वंचेत्येवमादिविरुद्धानेकधर्मवत्त्वमेवत्वनेकरूपत्वंस्यात्समन्वयोनसिध्यतीतिप्राप्तेब्रूमः नैकस्मिन्न
संभवादिति एकस्मिन्परमार्थरूपेवस्तुनिविरुद्धधर्माणामसंभवाद्वस्तुनोनेकरूपत्वंनास्तीत्यर्थः
यदस्तितदस्त्येवननास्तियन्नित्यंतन्नित्यमेवनाऽनित्यंयथाप्रमाणात्मावस्तुभूतः एवंप्रपंच
स्यापितन्मतेवस्तुभूतत्वात्तत्रानेकरूपत्वसंभवः अस्मन्मतेतुप्रपंचोनसन्नाप्यसत्किंत्वनि
र्वचनीयएवतेनसर्वव्यवहारसंभवइतिभावः २३ एतेषामार्हतानांदेहपरिमाणएवात्मेतिम
तंदूषयति एवंचात्माकार्त्स्न्य २४ यथाएकत्रविरुद्धधर्मासंभवोदोषस्तेषामार्हतानांमतेएवमा
त्मनोऽकार्त्स्न्यंपरिच्छिन्नत्वंदोषान्तरंस्यात्जीवस्यदेहपरिमाणत्वांगीकारादित्यर्थः तथाचपरिच्छिन्न
त्वादात्मनोघटादिवदनित्यत्वंस्यादितिभावः किंचात्मनोदेहपरिमाणत्वेमनुष्यात्मनः कर्मवशा

वे॰ सू॰ वृ॰
२०

४०

कुंजशरीरे हस्तित्वे प्रवेशो न स्यात् पुत्तिकाशरीरे वा हस्तिस्यात्मनः प्रवेशो न स्यात् ३४ ननु जीवस्य
सावयवत्वांगीकारात्पर्यायेण गजादिशरीरप्राप्तौ केचिदवयवा आगच्छंति सूक्ष्मपुत्तिकाशरीरप्रा
प्तौ च केचिदपगच्छंतीति न महत्त्वात्मनः स्थूलसूक्ष्मशरीरप्राप्तिविरोध इत्याशंकां निराकरोति ॥
न च पर्यायादप्यविरोधो विकारादिभ्यः २५ पर्यायादपि अवयवागमनाभ्यामपि तत्तत्स्थूलसू
क्ष्मशरीरपरिमाणत्वस्यात्मन्यविरोध इति न चेत्यर्थः कुतः विकारादिभ्यः आत्मनः सावयव
त्वे नतत्तच्छरीरप्राप्त्या वृद्धिह्रासवत्वांगीकारे विकारवत्वप्रसक्तौ प्रदीपादिवदनित्यत्वं स्यात् ॥
अनित्यत्वे च बंधमोक्षाभ्युपगमो बाध्येत जलतुंबिकान्यायेन संसारसागरे मग्नस्य बंधविच्छेदान्त
तनोर्ध्वगमनं मुक्तिर्भवतीति तद्याभ्युपगमादिति यद्वा पूर्वसूत्रे परिच्छिन्नत्वादात्मनोऽनित्यत्वं
स्यादित्युक्तमयुक्तं अनित्यत्वेपि बौद्धवत् संतान रूपेण नित्यत्वस्यात्मन्यविरोध इति न चेत्यर्थः
कुतः विकारादिभ्यः संतानस्य संतानिव्यतिरिक्तस्यासत्वे तस्य च संतानिजन्यत्वाद्विकारवत्वे
स्यादेव असत्वे नैरात्म्यवादप्रसंग इत्यर्थः ३५ किंच अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः
३६ मुक्तात्मनो यत्परिमाणं तदंत्यं तच्च नित्यमप्यपरत्वाद्यन्यंतमपरिमाणत्वेन व्यवस्थितं
चेति जैनसिद्धांतः तथा चांत्यस्य परिमाणस्य नित्यत्वेनावस्थितेः तद्दृष्टांतेनात्मपरिमाण
त्वेन हेतुनोभयोराद्यमध्यमपरिमाणयोर्नित्यत्वप्रसंगात् त्रयाणां माद्यमध्यमांत्यपरि

२९ शि॰

माणानाञ्चविशेषः साम्यं स्यादित्यर्थः नित्यपरिमाणानां त्रयाणामेकत्रासंभवात् नित्यत्वमा
पाद्यतेन साम्यमापादितमिति द्रष्टव्यं परिमाणसाम्ये स्थूलस्य सूक्ष्मशरीरप्राप्तौ परिमाणवैषम्यं
न स्यादिति भावः यद्वा सर्वदैकमेव परिमाणं स्यादित्यापाद्यं तथाहि अंत्यपरिमाणस्य जन्य
त्वे नित्यत्वविरोधादाद्यमध्यमकालावस्थाने अक्रममिति यदंत्यपरिमाणं महद्वा नद्वै
कं सर्वदा स्यान्नामत् तथाचात्मस्य परिमाणस्यावस्थितेरणुत्वाद्यन्यतमत्वेन नियतत्वा
दाद्यमध्यमकालयोरुभयोरंत्यस्य परिमाणस्य नित्यत्वात् एकत्वादविशेषः जीवोणुश्चेद
णुरेव महांश्चेन्महानेव स्यादित्यर्थः तथाच शरीरपरिमाणानियमः इति भावः तस्मादयुक्तं विवस
नमतेन न समन्वयस्य विरोध इति सिद्धम् ३६ इदानीं केवलनिमित्तकारणमेवेश्वरो नोपादान
मिति येषां सेश्वरसांख्यपातंजलशैवकणभुगादीनां मतं तदीयं दूषयति पत्युरसामंजस्यात् ॥
३७ पूर्वं सत्त्वासत्त्वयोरेकत्राविरोधादसंभवः इत्युक्तं तर्हि तद्वदुपादानकर्तृत्वयोरेकत्रविरोधादसं
भव इति दृष्टांतसंगमान्निमित्तोपादानोभयात्मकब्रह्मसमन्वयासंभव इत्याक्षेपसिद्धांतः पत्युरीश्व
रस्य जगदुपादानप्रधानादिप्रेरकत्वेन जगन्निमित्तत्वमात्रं न संभवति कुतः असामंजस्यात् ईश्व
रस्य जगत्सर्जने प्रवृत्तौ रागद्वेषादिप्रसंगात् असामंजस्यस्यात् प्रवृत्तेः रागद्वेषादिपूर्वकत्वेन लो
के दृष्टत्वात् दृष्टानुसारित्वात्कल्पनायाः अस्माकं तु श्रुत्यनुसारित्वादनिर्वचनीयवादित्वाच्च न दो

21
वे·सू·टी·
२१

ष इति भावः ३७ संबंधानुपपत्तेश्च ३८ प्रेर्यप्रधानादिभिः प्रेरकस्येश्वरस्य संबंधो वाच्यः असंबद्धस्य प्रेर
कत्वायोगात् न च संबंधः संभवति निरवयवत्वात् प्रतसिद्धत्वाच्च संयोगसमवाययोरनुपपत्तेरित्य
र्थः सिद्धांते तु विद्यादिप्रेरकत्वे कल्पिततादात्म्येनोपपद्यत इति भावः ३८ किंच कुंभकारस्य मृदादिप्रेरकत्वे
दृष्टांते नेश्वरस्य प्रधानादिप्रेरकत्वं कल्पनीयं न हि तत्संभवति प्रधानस्य रूपादिहीनत्वेन दृष्टमृदादिवैल
क्षण्यात्प्रधानादिविषयकप्रेरणायाः ईश्वरस्यानुपपत्तेरित्याह अधिष्ठानानुपपत्तेश्च ३९ अधिष्ठानोप्रे
रणा सिद्धांते तु न दृष्टापेक्षा श्रुत्येकशरणत्वादिति भावः ३९ करणवच्चेन्न भोगादिभ्यः ननु करणानींद्रि
याणि प्रत्यक्षाण्यपि यथा जीवेन प्रेर्यंते एवं प्रधानादिकमप्रत्यक्षमपीश्वरेण प्रेर्यत इति चेन्न कुतः भोगा
दिभ्यो दोषेभ्यः जीवो हींद्रियग्रामं भोगार्थं प्रेरयति न दृष्टांतेनेश्वरस्य प्रेरकत्वे तद्वद्भोगादयः प्रसज्येरन्नि
त्यर्थः ४० यद्वास्मच्छरीरस्येव प्रेरकत्वदर्शनादीश्वरस्य च शरीरानुपपत्तेर्न प्रेरकत्वमित्याह अधिष्ठा
नानुपपत्तेश्च भोगाधिष्ठानं शरीरमधिष्ठानशब्दार्थः करणवच्चेन्न भोगादिभ्यः करणवत् इंद्रियाधि
ष्ठानं शरीरमित्यर्थः तदीश्वरेंगीक्रियत एवेति चेन्न शरीरवत्त्वे भोगादिप्रसंगात् ईश्वरत्वमेव न स्या
दित्यर्थः अंतवत्त्वमसर्वज्ञता वा ४१ किंच प्रधानजीवेश्वराणां यासंख्या यच्च परिमाणं तदुभयमीश्व
रेण परिच्छिद्यते न वा आद्ये परिच्छिन्नसंख्यावत्त्वात्परिच्छिन्नपरिमाणवत्त्वाच्च त्रयाणां प्रधानजीवेश्वरा
णां घटादिवदंतवत्वे विनाशित्वं स्यात् द्वितीये ईश्वरस्यासर्वज्ञत्वं स्यादित्यर्थः तस्मादसंगतेन नार्किक

परिकल्पितेश्वरकारणवादेन निमित्तोपादान ब्रह्मसमन्वयविरोध इति सिद्धम् ४१ उत्पत्त्यसंभवात्
४२ एवं केवलाधिष्ठातेश्वर इति वेदासंमतं निरस्य निमित्तं प्रकृतिश्चेश्वर इति भागवतमतस्य वेदसं
गतार्थत्वात् तदंगीकृत्य जीवोत्पत्त्यंशेऽपि प्रमाणमूलत्वं स्यादिति प्रत्युदाहरणसंगत्यास्यारंभः तद्भागवत
मते प्रमाणमूलं भ्रांतिमूलं चेति संदेहे प्रमाणमूलमिति प्राप्ते तथाहि वासुदेवः खलु परमात्मा पर
मार्थतत्त्वं जगदुपादानं निमित्तं च तस्माद्वासुदेवात्संकर्षणाख्यो जीव उत्पद्यते तस्माज्जीवात्प्रद्युम्ना
ख्यं मनो जायते तन्मनसश्चानिरुद्धाख्योऽहंकार इति तथा च जीवाभिन्नाद्ब्रह्मणो जगत्सर्गं ब्रुवतः समन्व
यस्याविरोध इति प्राप्ते वेदविरुद्धांशमंगीकृत्य वेदविरुद्धजीवाद्युत्पत्त्यंशं दूषयति उत्पत्त्यसंभवादिति प
रमात्मनो वासुदेवाज्जीवस्योत्पत्तेरसंभवात् तन्मतस्याप्रामाणिकत्वमित्यर्थः अन्यथा जीवस्योत्पत्त्यंगीकारे घटा
दिवदनित्यत्वापत्त्या भवबन्धनिवृत्तिरूपमोक्षस्य तदभ्युपगमकस्य स्यादिति भावः ४२ न च कर्तुः करणं ४३
लोके कर्तुः देवदत्तादेः सकाशात्करणस्य कुठारादेरुत्पत्त्यदर्शनात् जीवात्कर्तुः करणं मनो जन्यत इत्ये
तत्र युक्तमिति मतस्य तन्मतमसंगतमित्यर्थः अयं भावः किं जीवो मनः करणांतरमासाद्य जनयति॥
अनासाद्य वा आद्ये तत्करणांतरं जीवेन जन्यं न वा आद्येऽनवस्था आद्यविकल्पावतारासंभवात् द्विती
ये तदेव मनोऽस्त्विति न मनसो जीवजन्यत्वं आद्यद्वितीये करणरहितस्यैव जीवस्य कार्यजननसामर्थ्या
ङ्गीकारे किं मनःकल्पनयेति ४३ न तु संकर्षणादयस्त्रयो न जीवादिरूपाः किं तु वासुदेववद्विज्ञानस्व

22
वे.सू.वृ.
२२

रूपा ईश्वरा एवेत्याशंक्याह विज्ञानादिभावे वा तदप्रतिषेधः ४४ संकर्षणादीनां त्रयाणां वासुदेव
वद्विज्ञानादिभावे वा विज्ञानैश्वर्यबलवीर्यदोषनिरवद्यस्वरूपत्वेपि तदप्रतिषेधः तस्योत्पत्त्यसंभवरू
पदोषस्य प्रकारांतरेण प्रतिषेधः इत्यर्थः तथाहि नतावच्चतुर्णां वासुदेवादीनां ईश्वराणां किंचित्प्र
योजनमस्ति एकेनैव कार्यसिद्धेः भगवानेवैको वासुदेवः परमार्थतत्त्वमिति त्वत्सिद्धांतहानिश्च न
वेश्वराणां संकर्षणादीनां त्रयाणां वासुदेवसमत्वानामेव वासुदेवादुत्पत्तिरभ्युपगम्यत इति नो
क्तदोष इति चेत्तर्ह्यागत उत्पत्त्यसंभवदोषः संकर्षणादीनामीश्वरत्वाविशेषे वासुदेवस्य ततोऽतिशया
भावेन त्रयाणां वासुदेवेन जन्यत्वानुपपत्तेरिति ४४ विप्रतिषेधाच्च ४५ क्वचिज्ज्ञानैश्वर्यशक्तिबलवी
र्यतेजांसि आत्मान एव गुणा इति प्रतिपादयति क्वचिच्च उक्ता गुणा एवात्मानो वासुदेवा भगवंत इत्यभेदं गु
णगुणिनां वर्णयति तथा च परस्परविप्रतिषेधाच्चासंगतमिदं भगवन्मतमित्यर्थः तस्मान्निरव
द्यो ब्रह्मणि वेदांतानां समन्वय इति सिद्धम्॥ छ ॥इति श्रीब्रह्मसूत्रवृत्तौ द्वितीय
स्याध्यायस्य द्वितीयः पादः २ ॥ ॥ ॥न वियदश्रुतेः १ पूर्वस्मिन्पादे स्मृ
तिविरुद्धत्वात्परपक्षाणामप्रामाण्यमुक्तं तर्हि श्रुतीनामप्यन्योन्यविरुद्धत्वात् ब्रह्मकारणवा
दस्याप्यनुपपन्नत्वं स्यादिति शंकानिरासार्थं परं पादद्वयमारभ्यते पादद्वयस्यापि श्रुतीनामन्योन्य
विरोधनिरासेन समन्वयदृढीकरणात् अध्यायसंगतिः पूर्वपादेनास्य प्रासंगिकी संगतिः

२२

संकाव्याजेन दर्शिता तत्र तावदादौ सृष्टिवाक्यानामविरोधं प्रतिपादयितुमाकाशमाश्रित्य विचार्यते ॥
आकाशस्य किमुत्पत्तिरस्ति उत नास्तीति यद्यस्ति तर्हि विरोधः तथाहि छांदोग्ये आकाशवायू वि
नात्त तेजोऽसृजतेति तेजआदिका सृष्टिः श्रूयते तैत्तिरीयके तस्मात्मानात्राकाशः संभूत इ
त्याकाशादिका तथा चानयोर्वाक्ययोर्विरोध इति पूर्वपक्षः आ व्याघातपूर्वपक्षे श्रुतीनां मिथो
विरोधादप्रामाण्यं फलं सिद्धान्ते विरोधाभावात्प्रामाण्यमिति वैषम्यम् एवं प्राप्ते एकदेशिमतेन
समाधत्ते न वियदश्रुतेः वियन्नोत्पद्यते कुतः अश्रुतेः विषयत उत्पत्तिवाक्यस्याऽश्रवणादि
त्यर्थः यद्यप्यात्मनः आकाशः संभूत इति श्रुतिरस्ति तथापि सा गौणीति गूढोऽभिसंधिस्तथा
न तथा च आकाशस्योत्पत्तेरनभ्युपगमादेव न विरोध इति गूढोऽभिसंधिमजानानः शंकते अस्ति तु
रतु याह: पदांतरपरग्रहे छांदोग्ये आकाशोत्पत्तिश्रुत्यभावेऽपि सा श्रुतिस्तैत्तिरीयके अस्तीत्य
र्थः तथा च विरोधस्तदवस्थ इति शंकितुरभिप्रायः २ एकदेशी स्वाभिप्रायं प्रकटयति गौ
ण्यसंभवात् २ न ह्याकाशस्योत्पत्तिश्रुतिर्मुख्या किंतु गौणी कुतः असंभवात् आकाशो
त्पत्तौ समवायिकारणादिसामग्र्यभावाद्विभुत्वेन नित्यत्वानुमानाच्चाकाशोत्पत्तेरसंभवादि
त्यर्थः ३ शब्दाच्च ४ वायुश्चान्तरिक्षं चैतदमृतमित्याकाशे अमृतशब्ददर्शनादाकाशस्योत्पत्ति
रित्यर्थः ४ न चात्मनः आकाशः संभूत इत्यादिवाक्ये संभूतशब्दस्याकाशे गौणत्वं तेज-

श्रावीत मुख्यत्वमित्येतद्धि न दृष्टं एकस्मिन्वाक्ये एकशब्दस्य गौणमुख्यत्वादर्शनादित्यत्राह स्याच्चैकस्य
ब्रह्मशब्दवत् ५ यथा एकस्मिन्नेव प्रकरणे अन्नं ब्रह्मेति व्यजानादित्यादावन्नादिषु ब्रह्मशब्दो गौ
णः आनंदो ब्रह्मेत्यत्र मुख्यः विषयभेदात् एवं प्रकृतेपि विषयभेदादेकस्य संभूतशब्दस्य गौण
त्वं मुख्यत्वं च स्यादित्यर्थः ५ इदमेकदेशिमतं दूषयन्सिद्धांतयति प्रतिज्ञाहानिरव्यतिरेका
च्छब्देभ्यः ६ विज्ञेयाद्ब्रह्मणः कृत्स्नस्य वस्तुजातस्याव्यतिरेकात् आत्मैकविज्ञानात्सर्वज्ञानप्र
तिज्ञायाश्च हानिर्भवति ब्रह्मभिन्नसत्ताकस्य नित्यस्याकाशस्याभ्युपगमे तस्याः प्रतिज्ञाया बाधेन त
स्मादाकाशस्योत्पत्तिमंगीकृत्य ब्रह्माधीनसत्ताकत्वाद्ब्रह्मणि ज्ञाते सर्वमाकाशादिकं ज्ञातं भवतीति
सा प्रतिज्ञा समर्थनीयेत्यस्याकाशस्योत्पत्तिरित्यर्थः किंच प्रतिज्ञायाः समर्थनं कार्यकारणाभेदपरे
भ्यः शब्देभ्यो भवति तथाहि कार्यकारणाभेदप्रतिपादनपरैर्मृदादिदृष्टांतैः प्रतिज्ञां संसाध्य तत्सा
धनायैव सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजत ऐतदात्म्यमिदं सर्वमि
त्यादिशब्दैः कार्यजातं प्रदर्श्य तस्य ब्रह्माव्यतिरेकं दर्शयंति इदं सर्वमाकाशस्याकार्यत्वे बाधितं स्या
दिति ननु एवमप्यस्मिन्मते सिद्धे पूर्वोक्तविरोधपरिहारः कथमिति चेदुच्यते छांदोग्ये हि तेजःसृष्टि
मात्रं श्रूयते नान्यत्किमपि तैत्तिरीयके तु आकाशाद्वायुः वायोरग्निरिति तेजस्तृतीयत्वं श्रूयते तथा
च तयोर्वाक्ययोरेकवाक्यत्वादनवकाशात्तैत्तिरीयश्रुत्यनुसारेणाकाशं वायुं च सृष्ट्वा तद्ब्रह्म तेजोऽसृ

जेति छांदोग्येश्रुतिः परिणामइतिनानायोर्वाक्ययोर्विरोध इति ६ यदुक्तं तैत्तिरीयके वियदुत्पत्तिश्रुतिर्गौ
णीसामग्ग्रभावादिभूतेनेनित्यत्वान्नसंभवेति तन्न श्रौतस्य ब्रह्मणएव वियत्स्रष्ट्रीत्वादित्यभिप्रेत्य तदीया
नुमानमनुमानेनैव दूषयति यावद्विकारं तु विभागो लोकवत् ७ तु शब्दः आकाशोत्पत्त्यसंभवाशंका
व्यावृत्त्यर्थः यतो यावद्विकारं जातं विभागो दृश्यते नत्वविकारे ब्रह्मणि विभागादर्शनात् लोके च
टादेर्विकारस्यैव विभक्तत्वदर्शनादित्यर्थः तथा चायं प्रयोगः आकाशकालदिङ्मनः परमाणवः
पराधीनसत्ताकाः स्वसमानसत्ताकविभागवत्वात् घटशरावादिवत् आकाशोत्पत्तिवादंनप्रतिविभुत्व
हेतोः परोक्तस्यासिद्धिरपि बोध्या आकाशे अमृत शब्दप्रयोगस्त्वापेक्षिकः अमृतादिवा इतिवदिति सि
द्धं ब्रह्मकार्यं वियदिति ७ ननु छांदोग्ये वायोरुत्पत्तिर्न श्रूयते तैत्तिरीये तु श्रूयते तथा च पूर्ववदनयोर्वा
क्ययोर्विरोधपरिहारार्थं वायूत्पत्तिर्गौणीति वाच्यं किंच सैषानस्तमिता देवता यद्वायुरिति वायोर्ल
यप्रतिषेधाच्च नित्यत्वमित्याशंकामतिदेशेन निराकरोति एतेन मातरिश्वा व्याख्यातः ८ एतेन वि
यदुत्पत्तिमत्वव्याख्यानेन वायुरपि वियदवच्छिन्नब्रह्मजन्यत्वेन व्याख्यात इत्यर्थः वायोर्नित्यत्वे ए
कविज्ञानप्रतिज्ञाहान्यादेः समानत्वादिति भावः वायोर्लयप्रतिषेधस्त्वापेक्षिक अतिदेशत्वात् नपृथ
क्संगत्यपेक्षेतिमंतव्यम् ८ असंभवस्तु सतोनुपपत्तेः ९ एवमसंभावितोत्पत्तिकयोरपि वियत्
पवनयोरुत्पत्तिरस्ति श्रुतिबलादित्युक्तं तद्वदेव ब्रह्मापि जन्यं नरकार्यमस्तु कार्यकारित्वाद्वियदादिव

सन्नुमानानुगृहीतयाज्ञातो भवति वियतो मुखं इत्यादि ब्रह्मजन्मश्रुत्या ब्रह्मणोप्युत्पत्तिरस्त्विति दृष्टांतसं
गत्या इत्यारभ्यते तत्र ब्रह्मणो नित्यत्वप्रतिपादकश्रुतीनामनुमानानुगृहीतश्रुत्या विरोधोस्ति न
वेति संदेहे अग्नेर्विस्फुलिंगोत्पत्तिवत् ब्रह्मांतरात् ब्रह्मोत्पत्तिहेतुश्रुतिबलादस्त्येवेति विरोध इति प्रा
प्ते ब्रूमः सतः सदात्मकस्य ब्रह्मण उत्पत्त्यसंभवः कुतः अनुपपत्तेः सत्सामान्यात्सत्सामान्यस्योत्पत्तेर
नुपपत्तेः विशेषस्यैव घटादेः सामान्यजन्यत्वदर्शनात् ब्रह्मणश्चाविशेषत्वेन जन्यत्वे यत्तज्जनकं सा
मान्यं तदेव नो ब्रह्म ब्रह्मणः कार्यत्वेऽप्यसत्त्वेन जगदधिष्ठानत्वानुपपत्तेश्च तस्यार्थः जन्मश्रुतिस्त्वौ
पाधिकविषया न चास्य कश्चिज्जनितेत्यादिबहुश्रुतिविरोधादिति न विरोधः ९ तेजोतस्तथाह्याह १०
तत्तेजोसृजतेति छांदोग्ये ब्रह्मजत्वं तेजसः श्रूयते तैत्तिरीयके तु वायोरग्निरिति वायुजन्यत्वमित्यन
योर्वाक्ययोर्विरोधोस्ति न वेति संदेहे सामान्यात्सामान्यस्योत्पत्तिर्माभूत् सामान्याद्वायोर्विशेषस्य ते
जस उत्पत्तिसंभवति एवं श्रुतिबलात्सर्वोपादानब्रह्मजत्वमयोग्यमस्ति विरोध इति प्रत्युदाहरणसंग
त्या पूर्वपक्षे पूर्वं ब्रह्मणः कार्यत्वे जगदुपादानत्वनसंभवतीत्युक्तं तद्वद्वायोरपि कार्यत्वात्तेजः प्रत्युपादा
नत्वं नास्त्येवेति ब्रह्ममात्रजत्वं तेजस इत्यविरोधः वायोरग्निरिति पंचमी क्रमार्था न हेत्वर्थेत्येकदेशि
नासिद्धांतः कुतः तं दूषयति तेजोतस्तथाह्याहेति अतो मातरिश्वतः सकाशात्तेजो जायत एवं हि
यतस्तथा वायुजत्वं वायोरग्निरिति श्रुतिराह न चेयं पंचमी क्रमार्था वायोरनंतरं तेज इति पदांतरक

त्मनाप्रसंगात् किंच आत्मनः आकाशः संभूत इत्यादौ पृथिव्या ओषधयः इत्यंते च पंचम्याः दर्शि
तान्मध्ये अकस्मात् कमार्थ्यं पंचमीस्यसंमतमेव नैवैवं कचित् ब्रह्मजन्यत्वं हु विहाय जन्यत्वमि
ति विरोधः वायोर्ब्रह्मानन्यत्वेन वायुभावापन्नब्रह्मजन्यत्वस्य छांदोग्ये वाक्यार्थस्यैव वायोरग्निरिति वा
क्यस्याप्यर्थत्वेनाविरोधादिति ९ आपः ११ अत्र तल्याख्याहेतनवर्तते तेजोनंतरभावित्वात् अप्पृ
थिव्योरिति तेजसो वायुजन्यत्वकथनानंतरं तयोरप्पृथिव्योः क्रमेण वुद्धिस्थत्वात् वुद्धिसंनिधि
लक्षणसंगत्या क्रमेणाधिकरणद्वयमारभ्यते तदयोऽसृजतेत्यादिवाक्यस्यापां ब्रह्मजन्यत्वप्रतिपाद
कस्याग्नेरापइतिवाक्येन विरोधोस्ति नवेति संदेहे पूर्ववद्विरोधोस्तीति पूर्वपक्षे अपामग्निदाह्यत्वात्त
ज्जन्यत्वं नास्त्येवेति अविरोध इति एकदेशिसिद्धांतं दूषयति आप इति आपोतस्तेजसो जायंते
हि यस्मात्तथा तेजोजन्यत्वमग्नेराप इति श्रुतिराह इत्यर्थः त्रिवृत्कृतयोरप्तेजसोर्दाह्यदाहकभावेप्य
त्रिवृत्कृतयोर्न विरोधः छांदोग्ये तेजोवन्नब्रह्मतत्त्वदृष्ट्यर्थ इति पूर्ववद्विरोधपरिहारो वोध्यः ११ अवनं
तरभाविपृथिवीमाश्रित्य विचारयति पृथिव्यधिकाररूपशब्दांतरेभ्यः १२ ताआपऐक्षंत बह्व्यः स्या
मः प्रजायेमहीति ता अन्नमसृजंतेति श्रूयते तत्र संशयः किमन्नशब्देनौदनादिकमुच्यते किंवा पृथि
वीति तत्रान्नशब्दस्यौदनादौ प्रसिद्धत्वादोदनादिकमेवान्नशब्देनोच्यते तथाच व्रीहियवादेरन्न
स्योदनस्य च योगेन तच्चाचान्नशब्दवाच्यस्य कचिद्वर्णसमतं कचित्पृथिव्या ओषधय ओषधीभ्यो

त्वमितत्र पृथिव्यादिजन्यत्वमित्यनयोः श्रुत्योर्विरोध इति प्राप्ते ब्रूमः पृथिव्येवात्रान्नशब्देनोच्यते
नव्रीह्यादिकं कुतः अधिकाररूपशब्दान्तरेभ्यः तत्तेजोऽसृजत तेति महाभूतोत्पत्त्यधिकाराद्यत्कृष्ण
तदन्नस्येति कृष्णरूपस्यान्नशब्दवाच्यपृथिवीरूपतापकस्य श्रवणात् समानप्रकरणे अद्भ्यः पृथि
वीतिच तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभवदितिच पृथिव्या एवावजन्यत्वप्रतिपादकश्रु
तेरन्तरस्याश्चेत्यर्थः तत्र सृष्टिकालेऽपां यः शरो घनीभावः आसीत् तत्समहन्यत घनीभावः स
त्यात्मना परिणतस्त्रासीत्सैवापां कठिनाकारपरिणामरूपा पृथिव्यभवदित्यर्थः तथाचव्रीह्या
द्यनकत्वं किं तु पृथिव्या उपादानकत्वमेवेत्यविरोध इति सिद्धम् १२ तदभिध्यानादेव तल्लिंगात्सः १३
एवं तावत्सृष्टिक्रममहाभूतश्रुतीनामविरोधः प्रतिपादितः इदानीं तानि भूतान्याश्रित्याश्रया
श्रयीभावसंगतान्यपि हि चार्यते किं महाभूतानि मान्येव देवताः स्वतंत्रा एव भौतिकोत्पादने प्रव
र्त्तंते उत तेष्वराधिष्ठिता इति विशये आकाशाद्वायुरित्यादिना तत्तत्कार्योत्पत्तौ स्वातंत्र्यश्रवणात्स्वतं
त्रा एवेति ब्रह्मणः सर्वसृष्टिकर्तृत्वप्रतिपादकश्रुत्या भूतसृष्टिश्रुतीनां विरोध इति प्राप्ते ब्रूमः स
परमात्मा तत्तत्कार्यगोचरेक्षणात्मकाभिध्यानादेवद्वितां तत्कारणाधिष्ठाता सर्वकार्यं सृजति के
स्मात्तल्लिंगात् तस्य परमात्मनः सर्वनियन्तृत्वरूपलिंगस्य यः पृथिव्यां तिष्ठन्नित्यादिश्रुत्यर्थः
पृथिव्यां तदभिमानिदेवतायां अयं भावः आकाशादिघटानां भूतमात्रेहेटत्वादेवतापरत्वलद

एणपतेर्नभूताभिमानिदेवतानांत्वातेऽस्मादाकाशाद्वायुरित्यादौश्रुतौ नचतान्यापरोद्धंतेत्सेद्वादिप
दानांदेवतापरत्वेलिंगंतेदीयेलक्षस्यतद्वष्ठित्वब्रह्मनिष्टत्वादितिनदेवतानांस्वातंत्र्यंकिंचिन्मानमि
ति १३ विपर्ययेणतक्रमोतउपपद्यतेच १४ एवंभूतानांमुत्पत्तिक्रमेचितितेलयक्रमोबुद्धिस्थः
प्रसंगसंगत्याविचार्यते एतस्यविचारस्यप्रयोजनमद्वैतब्रह्मध्यानेप्रासंगिकत्वादेवतस्मिन्स्यादे
ऽसंगतिरासंकनीया तत्रकिंभूतानांश्रुतौत्पत्तिक्रमेणैवलयक्रमः उतसोपानपरंपराहढस्य
व्युत्क्रमेणावरोहणवत् व्युत्क्रमेणैवलयक्रमइतिसंदेहः श्रुतौत्पत्तिक्रमेणैवेतिप्राप्तेब्रूमः
अतउत्पत्तिक्रमाद्विपर्ययेणैवलयक्रमः स्वस्वकारणेकार्याणांलयस्यदर्शनादाकाशादीनांचो
त्तरोत्तरभूतंप्रतिकारणतयोक्तत्वात् किंचव्युत्क्रमेणैवलयक्रमउपपद्यते अन्यथाउत्पत्तिक्र
मेणैवलयांगीकारेसतिकार्यकारणस्यनाशइतिस्यात्तच्चायुक्तमित्यर्थः १४ भूतोत्पत्तिलय
विचारस्यप्रयोजनमद्वैतब्रह्मध्यानंतत्प्रयोजनकं करणोत्पत्तिक्रममेकप्रयोजनकत्व
संगत्याविचारयति अंतराविज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाविशेषात् १५ पूर्वोक्तं।
भूतोत्पत्तिक्रमइंद्रियोत्पत्तिक्रमेणविरुद्धतेनवेति संदेहे विरुध्यतइत्याह अंतरेति एतस्मा
ज्जायतेप्राणोमनःसर्वेंद्रियाणिच खंवायुर्ज्योतिरापश्चपृथिवीविश्वस्यधारिणीतिवाक्यंतल्लिं
गपाठेनोच्यते विज्ञायतेऽनेनेतिव्युत्पत्याविज्ञानशब्देनबुद्धिरिंद्रियाणिचगृह्यंते निश्चया

त्मकमंतःकरणं बुद्धिः संशयात्मकं च मनः सर्वे इति भेदः तानींद्रियबुद्धिमनांसि भूतानामात्मन
श्चांतराले तल्लिंगात्तस्याः सृष्टेर्गमकाद्वाक्यात् क्रम्यंते तथाचात्मनः इंद्रियबुद्धिमनांसि तेभ्यश्च
भूतानीत्यनेन क्रमेणात्मनः आकाशः संभूत इत्यादिक्रमस्य बाध इत्यनयोर्वाक्ययोर्विरोध इति चे
न्न अविशेषात् इंद्रियमनोबुद्धीनां भौतिकत्वेन भूतोत्पत्तिक्रमादिंद्रियाद्युत्पत्तिक्रमस्याविशेषाद्ये
न क्रमेण भूतोत्पत्तिस्तेनैव क्रमेण भौतिकोत्पत्तिरित्यविरोध इत्यर्थः एतस्माज्जायते प्राण इत्यादिश्रुति
श्च सर्वेषामात्मनः सकाशादुत्पत्तिमात्रं ब्रूते न क्रममित्यर्थः अतो न केनापि वाक्येन भूतसृष्टि
वाक्यानां विरोध इति सिद्धम् १५ एवं तत्पदार्थस्य सर्वोपादानत्वसमर्थितोपादेयभूतकरणश्रुतिविरोधो नि
रस्तः इदानीं त्वंपदार्थसिद्धौ जीवविषयश्रुतिविरोधो निरस्यते पादसमाप्तिपर्यंतं तत्र जीवोत्पत्ति
नाशनिमित्तकजातेष्ट्यादिशास्त्राणां जीवनित्यत्ववादिशास्त्रस्य च विरोधोस्ति न वेति संदेहे देव
दत्तो जातो मृतश्चेति लौकिकव्यपदेशानुगृहीतजातकर्मादिशास्त्रविरोधोस्त्येव यथा करणोत्प
त्ति श्रुत्या भूतश्रुतेर्न विरोधः तथा जीवोत्पत्तावपि भूतश्रुती विरोधस्याभावो वाच्यः स न संभवति
उक्तयुक्त्या जीवोत्पत्तावुक्तभूतोत्पत्तिक्रमभंगस्यावश्यकत्वादिति प्रत्युदाहरणेन पूर्वपक्षे सिद्धांतः॥
चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् १६ यो यं लौकिकस्य योर्जन्ममरण
योर्व्यपदेशो देवदत्तो जातो मृतश्चेति स चराचरव्यपाश्रयः स्थावरजंगमदेहविषयो मुख्यः जीवेत

भाक्तौ गौणः स्यात्कुतः जन्ममरणव्यपदेशस्य तज्जस्वभावि विमादेहोत्पत्तिनाशानुविधायित्वादित्यर्थः दे
हप्रादुर्भावाद्यपेक्षत्वे च जातकर्मादिविनिमितिननेनयाहृणेजीवनित्यत्वशास्त्रस्य विरोध इति भावः
१६ एवं देहोत्पत्तिनाशयोर्जन्मनाशौ माभूतां कस्माच्चेतर्यो जीवस्य जन्मनाशौ किं न स्यातां त्वगीदि
फलकर्मशास्त्रविरोधाभावादिति प्रत्युदाहरणेन विस्फुलिंगादृष्टांतेन एतस्मादात्मनः सर्वे
एत आत्मनो व्युच्चरंतीत्यादेर्जीवात्मनः परस्मात् ब्रह्मण उत्पत्तिवाक्यस्याविकृतस्यैव ब्रह्मणो जी
वभावेन प्रवेशवाक्यस्य च विरोधसंदेहे विरोधोस्तीति प्राप्ते ब्रूमः नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः १७
आत्मा जीवो नोत्पद्यते कुतः अश्रुतेः उत्पत्तिप्रकरणेषु जीवोत्पत्तेरश्रुतेः ताभ्यः श्रुतिभ्यो जी
वस्य नित्यत्वावगमाच्च न जीवो म्रियते स वा एष महानज आत्माऽजोऽमरोऽमृत इत्यादिश्रुते न या
जीवनित्यत्ववादिन्यो दृष्टव्याः यत्तु क्वचिद्विस्फुलिंगदृष्टांतेन परस्मात् ब्रह्मणो जीवोत्पत्तिश्रवणं
तत्कार्यकरणसंघातोपाधिनिमित्तमिति श्रुत्यैव स्फुटीकृतम् विज्ञानघन एवायं जीवः
एतेभ्यः कार्यकरणसंघातापन्नभूतेभ्यः उत्पत्तिर्वद्यः साम्येनोत्थाय तानि भूतानि नश्यंति सति ता
पन्नः स्वयं विनश्यति विनाशानंतरं संज्ञाना स्तीति याज्ञवल्क्येनोक्ते मैत्रेयी प्रपच्छ अत्रैव मा भग
वन्मोहांतमापीपदन्न वा अहमिमं विजानामीति न प्रेत्य संज्ञास्तीति अथ मां प्रति त्वं मोहांतमोहम
यं मोहमापीपदत् अपादितवानसि प्रेत्य नाशानंतरं संज्ञा नास्तीति इदमहं न विजानामि त्वं त

प्रेत्य संज्ञा नास्तीति वदन्मां मोहयसीति प्रश्नार्थः अत्रोत्तरं न वा अरे ऽहं मोहं ब्रवीम्यविना
शी वा अरे ऽयमात्मानुच्छित्तिधर्मेति अविनाशित्वमपरिणामित्वं तत्र हेतुरनुच्छित्तीति मोहं मोहकरं वा
क्यं संज्ञाद्युदासादिविशेषः विज्ञानं नास्तीति मयोक्तं न स्वरूपाभाव इति नाहं मोहवादी भूमात्राप्रयुक्तमे
वास्येत्यादिकं न स्वाभाविकमिति तात्पर्यम् १७ ज्ञोत एव १८ अत्रायं पुरुषः स्वयं ज्योतिरित्यादिस्वप्रका
शत्वबोधकश्रुतेः पश्यंश्चक्षुः शृण्वञ्श्रोत्रमित्याद्यागन्तुककर्तृज्ञानवत्त्वादिश्रुतिभिर्विरोधोऽस्ति न वेति सं
देहे अस्तीति पूर्वपक्षे पूर्वाधिकरणसिद्धजीवानुत्पत्तिमुपजीव्य सिद्धान्तयति ज्ञोत एवेति जीवो ज्ञः स्व
प्रकाशः स्वरूपभूततया एव अनुत्पत्तिमत्त्वादेवेत्यर्थः अनन्तरोदितस्वयंप्रकाशब्रह्मैवोपदिष्टं जीव इत्याया
ति तथा च ब्रह्माभिन्नजीवोपि स्वयंप्रकाश इति भावः पश्यंश्चक्षुरित्यादिश्रुतयस्त्वागन्तुकवृत्त्यभिप्रा
येण स्वप्रकाशत्वाविरोधेन नेतव्या इत्यविरोधे न इति सिद्धं चक्षुर्द्रष्ट्राद्युत्क्रान्तिगत्यागतीनां १९ आ
त्मनो ब्रह्माभेदाद्योग्यत्वाय नित्यत्वं स्वप्रकाशत्वं चोक्तम् इदानीं स्वप्रकाशत्वादिवद्विभुत्वमनवच्छिन्नस्वरू
त्वमणुत्वनिरासेन साधयतीत्यान्तर्बहिर्भावः संगतिः एतेनान्तरभाव्यधिकरणत्रयेणानवच्छिन्नत्वाद्
पि बहिष्कर्तृत्वमणुत्वमात्मनीति प्रतिपाद्यते ततो ब्रह्माभेदयोग्यस्य जीवस्यापारस्याधिकरणे ब्रह्मैक्य
विवक्षत इति आपाद्यमवान्तरसंगतयः अत्रानवच्छिन्नत्वश्रुतीनामेषोऽणुरात्मा चेतसा वेदितव्य
इत्याद्यणुश्रुतिभिर्विरोधोऽस्ति न वेति संदेहे अस्तीत्याह उत्क्रान्तीति जीवस्योत्क्रान्तिगत्यागतीनां

अवर्णादणुर्जीवः स यदास्माच्छरीरादुत्क्रामति स तदा वागादिभिः प्राणैः सहोत्क्रामतीति मरण
समयेउत्क्रांतिः श्रूयते येकेचास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति तस्माल्लोकात्पुनरेत्यस्मै लो
काय कर्मण इति गत्यागती श्रूयेते इदं चात्मनो विभुत्वेन संभवतीत्यणुत्वं परिशिष्यते शरीरपरिमाण।
त्वात्मनो नियमत्वविरुद्धत्वेनासंभवादिति १९ स्वात्मना चोत्तरयोः २० यद्यप्युत्क्रांतिर्देहस्वाम्यनिवृत्तिरू
पा विभुत्वेपि संभवति तथाप्युत्तरयोर्गत्यागत्योः स्वात्मना जीवात्मना संबंधत्वादणुत्वमित्यर्थः २०
नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् २१ ननु नायं जीवोणुः अतच्छ्रुतेः अनणुत्वश्रुतेः स वा एष महा
नज आत्मा सत्यं ज्ञानमनंतं ब्रह्मेत्यादिना महत्वश्रुतेरपि चेन्न इतराधिकारात् इतरस्य ब्रह्मणः सर्वेषु
वेदांतेषु प्रधानतया ज्ञेयत्वेन प्रकृतत्वात्तस्यैव महत्वश्रुतिरित्यर्थः २१ स्वशब्दोन्मानाभ्यां च २२ एषो
णुरात्मा चेतसा वेदितव्य इति स्वस्याणुत्वस्य वाचकशब्दात् जीवोणुः वालाग्रशतभागस्य शतधा क
ल्पितस्य च भागो जीवः स विज्ञेय इत्युन्मानाच्च सर्वेभ्यः स्थूलपरिमाणेभ्य उद्धृत्य मानमुन्मानं अ
नेनापकृष्टपरिमाणमिति यावत्तस्मादित्यर्थः २२ नन्वात्मनोणुत्वे जाह्नवीतोयनिमग्नस्य देहस्या
विशेषोपलब्धिविरोध इत्यत आह अविरोधश्चंदनवत् २३ यथा चंदनबिंदुः शरीरैकदेशस्थः
शरीरव्यापि सुखं जनयति तथा जीवोपि देहव्यापि नशैत्याद्युपलंभं करिष्यतीत्यविरोध इत्यर्थः॥
२३ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि २४ ननु नात्र चंदनदृष्टांतः अवस्थितिवै

षोष्यात् प्रत्यक्षेण चंदनविंदोरेकदेशेऽवस्थितिर्ज्ञायते जीवस्येतन्नैवमित्यनल्पत्वादित्यर्थः तथा
च व्यापिशैत्याद्यफलं भरूपकार्येण महत्वकल्पनं युक्तमिति शंकाभिप्रायः निराकरोति नेति कुतः
अभ्युपगमात् जीवाणुत्वस्य कथमभ्युपगम्यते तत्राह हृदिहीति हृदयतोऽस्य परिमाणे हृदि जीवः
पठ्यते योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्यादौ तस्माज्जीवस्याणुत्वमत्याभ्युपगम
तदित्यर्थः अतो न दृष्टांतवैषम्यमिति भावः २४ गुणाद्वालोकवत् २५ आत्मनोऽणुत्वेऽपि तन्निष्ठज्ञा
नस्य गुणस्य व्यापकत्वांगीकारात् व्यापकगुणाद्वा व्यापिकार्यं भविष्यति लोकवत् व्यापिप्रभागु
णकदीपादिवत् गृहनिष्ठदीपस्याल्पत्वेऽपि प्रभात्मकगुणवशाद्यथा गृहव्यापिप्रकाशादिकार्यं जाय
ते तद्वदित्यर्थः २५ ननु ज्ञानस्य व्यापकत्वेऽणुजीवव्यतिरेकेणावस्थानं वक्तव्यं तदयुक्तं गुणिव्यति
रिक्तदेशे गुणस्यावस्थानादर्शनात् नच दीपप्रभान्यायः प्रभायादीपसंयुक्तद्रव्यान्तरत्वादित्यत आह
व्यतिरेको गंधवत् २६ यथा गुणस्यापि गंधस्य गुणिव्यतिरेकेण वृत्तिः पुष्पपेटिकातो दूरतः स्थित
स्यपुंसो गंधोपलंभदर्शनात् तद्वद्गुणिव्यतिरेको ज्ञानस्येत्यर्थः २६ तथा च दर्शयति २७ अणुत्वा
त्मनस्त्वं तस्य गुणेनैव देहव्याप्तिरिति श्रुतिमाह सूत्रकारः तथा च दर्शयतीति हृदयायतनत्वमणु
परिमाणं चात्मनोऽभिधाय आलोमभ्य आनखाग्रेभ्यः इति चैतन्यगुणेन सर्वदेहव्यापित्वं दर्शयतीति सू
त्रार्थः २७ तत्रैव वक्ष्यमाणं सूत्रं पृथगिति पृथगुपदेशात् २८ प्रज्ञया शरीरं समारुह्येत्या

स्त्तानयोः कर्तृकरणभावेन पृथगुपदेशाद्व्यापिगुणद्वारास्य जीवस्य शरीरव्याप्तिर्गम्यते एतन्मे
वाभिप्रायमनुयोहलयति तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति च कर्तुः शरीरात्पृथग्विज्ञान
स्योपदेशः विज्ञानमिंद्रियाणां ज्ञानशक्तिं विज्ञानेनेन चैतन्यगुणेनादाय शेत इत्यर्थः २८ तथा च व्या
पकं ज्ञानं जीवस्य गुण इति महत्वश्रुतीनां बाध इति प्राप्ते जीवाणुत्व सोपाधिकत्वान्न वा स्यव्यापरिच्छि
न्नत्वश्रुतिबाध इति सिद्धांतयति तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् २९ तुशब्दः कृतपूर्व
पक्षनिरासवाचकः अणुजीवः किं ब्रह्मणस्तत्वांतरं उत विकारः आहोस्वित् ब्रह्माभिन्नः नाद्यः
एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाबाधात् न द्वितीय इत्युक्तं तस्मात्सर्वस्याऽत्मनस्तावत्तृतीयः पक्षः
परिशिष्यते तथा च ब्रह्मणोनवधिकमहत्वावगमात् जीवोप्यनवधिकमहत्ववान् स वा
एष महानज आत्मा योयं विज्ञानमय इति विज्ञानमयस्य जीवस्य महत्वावगमाच्च एषोणु
रात्मा चेतसा वेदितव्य इत्येतन्न जीवविषयं वेदितव्यत्वश्रवणात् किंतु चक्षुराद्यगोचरत्वेन दुर्वि
ज्ञेयब्रह्मविषयं वालाग्रशतभागस्येति वाक्यं तु जीवस्योपाधिकमणुत्वमनद्यसच्चानंत्याय कल्प
त इति वाक्यशेषेणानंत्यमपरिच्छिन्नत्वं बोधयति किंचात्मनोणुत्वे देहव्याप्युपलंभो न स्यात् न
च चंदनबिंदुदृष्टांतः तस्य सावयवत्वेनावयवद्वारा देहव्यापित्वसंभवात् नाऽपि व्यापिज्ञानात्
व्यापिकार्यसंभवः गुणिव्यतिरेकेण गुणस्यावस्थानायोगेन व्यापिज्ञानस्याऽसंभवात् नच

गंधस्यापि न गुणत्वान्न स्वगुणिव्यतिरेकसंगमनं गंधस्याऽपि गुणत्वेन स्वाश्रयस्यैव गमनांगीका
रात् अन्यथा गुणत्वव्याहतेः गंधस्य द्रव्यत्वेन तत् दृष्टांतो भवेत् प्रज्ञया शरीरं समारुह्येत्येतद
पि प्रज्ञया बुद्ध्याख्यांतःकरणेनेति व्याख्येयं कथं तर्हि जीवे अणुत्वव्यपदेशस्तद्गुणसारत्वादिति ब्रू
मः तस्याः बुद्धेर्गुणा अणुत्वोत्क्रांतिगत्यागतिसुखदुःखादयोऽस्य गुणाः सारः प्रधानं यस्य जी
वस्य स तथा तस्य भावस्तत्वं तस्मात्तद्व्यपदेशः अणुत्वादिव्यपदेशः न स्वाभाविकः प्राज्ञवत् प्रा
ज्ञस्य परमात्मनः सगुणोपासनेषु दहरोऽस्मिन्नंतर आकाशः अणीयान् व्रीहेर्यवाद्वेत्यादिरू
पाधिवशाद्यथाऽणुत्वादिकं व्यपदिश्यते तद्वदित्यर्थः २९ ननु आत्मनः अणुत्वादिसंसारस्य बुद्ध्युपा
धिकत्वे कदाचिदात्मनो बुद्ध्या वियोगे संसारी न स्यादित्यत आह यावदात्मभावित्वाच्च न दोषस्तद्द
र्शनात् ३० बुद्धिसंयोगस्य यावत्संसारमात्मभावित्वान्न पूर्वोक्तदोषः संयोगस्य यावदात्मभावि
त्वं कुत इत्यत आह तद्दर्शनादिति देहवियोगेऽपि बुद्धिसंयोगस्य श्रुतौ दर्शनाद्यावदात्मभा
वित्वमित्यर्थः योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसं
चरति ध्यायतीव लेलायतीवेत्यादिका श्रुतिः विज्ञानमयो बुद्धिप्रधानो जीवो बुद्ध्या समानः सन्नि
ममं च लोकममुं च लोकमनुसंचरतीति तदेवाह ध्यायतीवेति बुद्धौ ध्यायंत्यां स्वयं ध्यायतीव चलंत्यां चलती
व न वस्तुतो ध्यानादिरस्तीत्यर्थः भ्रममूलकस्य बुद्धिसंयोगस्य तत्वसाक्षात्कारपर्यंतमवस्थाना

यावदात्मभावित्वमित्यपिद्रष्टव्यम् ३० ननुसुषुप्तौब्रह्मसंपत्तिकार्यनाशयोरभ्युपगमात्तबु
द्धिसंयोगस्य यावदात्मभावित्वमित्यतआह पुंस्त्वादिवत्त्वस्य सतोभिव्यक्तियोगात् ३१ यथा
बालेपुंस्त्वादेः सतएवयौवनेभिव्यक्तिः एवंबुद्धिसंयोगादेः सुषुप्तेस्त्वात्मनास्सतएवाभिव्य
क्तिसंभवाद्यावदात्मभावित्वेनविरुध्यमित्यर्थः ३१ ननुबुद्ध्यपरपर्यायांतःकरणेकिंप्रमाणं
यद्युक्तेसंसारःस्यादित्यतआह नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमोवान्यथा ३२
इदमंतःकरणमवश्यमभ्युपगंतव्यं अन्यथामनसोनभ्युपगमेसर्वेषामिंद्रियाणांस्वस्ववि
षयसन्निधानदशायांनित्योपलब्धिप्रसंगः युगपत्सर्वविषयोपलब्धिप्रसंगः मनोव्यतिरि
क्तेषांतेषांसामग्र्याःसत्वाद्यदिसत्यामपिसामग्र्यांफलाभावस्तदानित्यानुपलब्धिप्रसंगः एक
स्याप्युपलब्धिर्नस्यादित्यर्थः अथवाएकस्योपलब्धिमितरेषामनुपलब्धिमिच्छतातासांसा
मग्रीमध्येऽन्यतरस्यात्मनइंद्रियस्यवानियमःशक्तिप्रतिबंधोवक्तव्यः सनसंभवति निर्धर्म
केष्वात्मनिशक्तेरभावात् नापींद्रियस्यशक्तिप्रतिबंधःप्रतिबंधेकामापायानुतस्याभ्यासंगस्थले
इच्छैवनियामकेतिवक्तव्यम् इच्छाचनात्मनः निर्गुणब्रह्माभिन्नत्वस्यश्रुतिशतेभ्यःप्रतिपा
दनात् कामःसंकल्पइत्यादिश्रुत्यामनोधर्मत्वस्योक्तेदाववगतत्वाच्च तस्माद्व्यासंगस्थलेनि
यामकेच्छान्यथानुपपत्त्याचसिद्धमंतःकरणंतद्युक्तस्यात्मनिसंसारइति ३२ तद्गु

30

वे॰ सू॰ वृ॰
३०

णसारत्वमेवात्मनः कर्तृत्वसाधनेनप्रपंचयति कर्त्ता शास्त्रार्थवत्वात् ३३ अत्रात्मनोऽसगत्वश्रु
तीनांकर्तुरिष्टसाधनबोधकविधिवाक्यैर्विरोधसंदेहे सांख्योक्तबुद्धिकर्तृत्वेबाधितेनेनात्मनए
वकर्तृत्वमत्रसाध्यते तच्चकर्तृत्वमौपाधिकमित्युत्तराधिकरणेवक्ष्यते इतिनविरोधइत्यभिप्रा
येणसिद्धांतयति कर्तेति आत्मैवकर्त्तानबुद्धिः कर्त्तुरपेक्षितोपायबोधकविधिशास्त्रस्याऽ
र्थवत्वात् आत्मनःकर्तृत्वेविधिशास्त्रमर्थवद्भवति अन्यथाबुद्धिःकर्त्री आत्माफलभोक्ते
तिकर्त्तुरपेक्षितोपायबोधकशास्त्रमनर्थकमेवस्यात् तस्मान्नकेवलबुद्धेःकर्तृत्वेकिंत्वात्म

म तो ८ नइति ३३ विहारोपदेशात् ३४ सईयतेऽमृतोयत्रकामम् इति स्वेशरीरेयथाकामंपरि
वर्त्ततेइतिचजीवप्रकरणेस्वप्नावस्थायांविहारस्यसंचरणस्योपदेशाज्जीवस्यकर्तृत्वमित्य
र्थः अकर्त्तुःसंचरणायोगादितिभावः यत्रस्वप्नेऽमृतः सजीवः कामंविषयानीयतेगच्छ
तीत्यर्थः परिवर्त्ततेविहरति किंच उपादानात् ३५ प्राणानांविज्ञानेनविज्ञानमादायेत्या
त्मनोग्रहणशक्त्युपादानश्रवणादकर्तुरुपादानायोगादात्मनःकर्तृत्वमित्यर्थः प्राणानां
मिंद्रियाणांविज्ञानेनमनसानत्वन्यबुद्ध्याविज्ञानंग्रहणशक्तिमादायस्वापेहृदयंगच्छती
तियोजना ३५ व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययः ३६ विज्ञानंयज्ञंतनुतेकर्माणि
तनुतेपिचेति लौकिकवैदिककियायांविज्ञानशब्दवाच्यस्यात्मकर्तृत्वव्यपदेशाच्चात्मनः ३०

कर्तृत्वमित्यर्थः यज्ञसंकल्पं ननु विज्ञानशब्दो बुद्धिपरः न जीवपर इत्यत आह नचेदिति विज्ञान
शब्दो जीवपरो न चेत्तर्हि निर्देशविपर्ययः स्यात् बुद्धेः करणत्वे कर्तृत्वव्यपदेशो विज्ञानं यज्ञं
तनुते इति न स्यात् किं तु विज्ञानेनेति स्यादित्यर्थः ३६ ननु स्वतंत्रस्यात्मनः कर्तृत्वे ऽनिष्टं
न कुर्यात् किं तु इष्टमेव कुर्यादित्यत आह उपलब्धिवदनियमः ३७ यथा उपलब्धौ स्वतंत्रो
प्यात्मा इष्टमनिष्टमुपलभते तद्वदिष्टमनिष्टं च संपादयिष्यतीत्यनियम इत्यर्थः अयं भावः
स्वातिरिक्तकारणानपेक्षत्वरूपं स्वातंत्र्यं तावन्न संभवति ईश्वरस्यापि तदभावात् किं तु स्व
कृतकारकप्रेरकत्वं तथा च तेषु कारकेष्वनिष्टसाधनेष्वपीष्टसाधनत्वभ्रमादनिष्टमपि प्रा
प्नोतीति ३७ शक्तिविपर्ययात् ३८ इतश्च बुद्धिव्यतिरिक्तो जीवः कर्ता न बुद्धिः अन्यथा बुद्धेः कर्तृ
त्वे करणशक्तिविपर्ययो न करणशक्तिर्हीयेतेति यावत् न चेष्टापत्तिः करणस्य हि तस्यैव कर्तृ
त्वे लोके कार्यकारित्वदर्शनात् बुद्धेरपि करणान्तरं कल्पनीयं स्यात् तथा च नाममात्रे विवादो न
वस्तुनि करणव्यतिरिक्तस्यैव त्वयापि कर्तृत्वाभ्युपगमादिति ३८ समाध्यभावाच्च ३९ आ
त्माकारवृत्तिर्विद्यमानाप्यसतीव यत्र भवति स समाधिशब्देनोच्यते न स समाधिरात्मनो ऽक
र्तृत्वे अभावप्रसंगात् समाध्यन्यथानुपपत्त्यात्मनः कर्तृत्वमित्यर्थः समाधिग्रहणं श्रवण
मनननिदिध्यासनानामुपलक्षणं ३९ एवं बुद्धिव्यतिरिक्तात्मनः सिद्धं कर्तृत्वं तच्च न स्वाभावि

31

वे॰सू॰वृ॰
३१

कं किं वौपाधिकमित्याह यथा च तक्षोभयथा ४० सर्वसांख्याभिमतबुद्धिकर्तृत्वनिरासेनात्मनः कर्तृत्वं
समर्थितं तत्किं स्वाभाविकमौपाधिकं वेति संदेहे पूर्वोक्तशास्त्रार्थवत्वादिभिरेव हेतुभिः स्वाभाविकमित्य
स्ति अत्र संगतिश्च श्रुतिविधिशास्त्रयोर्विरोध इति अस्याधिकरणस्य पूर्वपक्षः ननु तस्य पूर्वपक्षस्यैतदधिकरण
निरस्यत्वे पूर्वाधिकरणं व्यर्थमिति चेन्न तस्य बुद्धिकर्तृत्वनिरासेनैतदधिकरणविषयकर्तृत्वप्रतिपादक
त्वान्न व्यर्थतेति तत्रेदमुत्तरं न तावत्कर्तृत्वं स्वाभाविकं क्वचनाप्यौपाधिकत्वेन कर्तृत्वस्य स्फुटीकरणात्॥
तथा हि आकारो विपर्यय ततः रोपनस्यैवात्मनः उपाधिकर्तृत्वं मंत्रप्रजागरितयोः आवश्यितास्तु
सुप्तौ लीनौपाधिकस्य तस्यात्मनः परमानंदेन संपरिष्वक्तस्य स्वाभावं श्रावयति तद्वाऽस्यैतदाप्त
काममात्मकाममकामं रूपं शोकांतरमिति त्वारभ्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य पर
मो लोक एषोऽस्य परम आनंद इत्यंतेन तदेतत्सार्थं ब्रह्मणस्य जीवस्यात्मकामं कामशब्दः कामयितव्य
परः सर्वस्वरूपेण कामयितव्यमित्यर्थः तत्र हेतुराप्तकाममिति आप्तकामत्वे हेतुरकाममिति य
तः परं कामं नास्ति तदकामं अशेषशोषसंसर्गशून्यत्वाद् प्राप्तकामत्वमित्याह शोकांतरमिति शो
कादंतरं भिन्नमित्यर्थः शोकदुःखमंतरयति निवारयतीति वा उक्तस्य सुषुप्तात्मस्वरूपस्य परमपुरु
षार्थत्वमाह एषेत्यादिना एतदेवाभिसंधाय भगवान्सूत्रकारो दृष्टांतेनौपाधिककर्तृत्वमित्याह यथा
च तक्षोभयथेति यथा तक्षा ऽभयथा वास्यादिकरणान्यपेक्ष्य कर्ता दुःखी भवति अनपेक्ष्य तत्स्वरूपेण कर्ता

३१ श्रि॰

ख्यी भवति तथात्मापि बुद्ध्यादीनि करणान्यपेक्ष्य कर्त्ता संसरति अनपेक्षस्तु स्वभावतोऽकर्त्ता परमानंदश्च श
द्धस्त्वर्थः स्वाभाविककर्तृत्वनिरासं कुरुते यथा शास्त्रार्थवत्त्वादिहेतवश्च कर्तृत्वं विनानुपपन्नाः सन्तः साधयन्ति न
तु कर्तृत्वस्य स्वाभाविकत्वमपि तद्विनानुपपत्तेरभावात् यदुक्तं विज्ञानं यज्ञं तनुते इति बुद्धिव्यतिरिक्तात्मनः
कर्तृत्वव्यपदेशादिति तत्र विज्ञानशब्दस्य चिदध्यस्तबुद्धौ रूढत्वात् स एव वाच्य इत्यस्योत्तरोत्तरक्रमो
यद्यन्त इति प्रश्नान्तरे यत्तस्य वाग्बुद्धिजन्यत्वावगमात्तत्रापि यज्ञस्य साधनं विज्ञानं बुद्धिरेवेत्यवधारणा च वित्ते
नध्यात्वावाचा मंत्रो न क्रियायज्ञो जायते तेन चित्तस्य वाचश्च पूर्वोत्तरभावो यस्तद्धि इति श्रुत्यर्थः तस्मादौपाधि
कमात्मनः कर्तृत्वमिति सिद्धम् ४० परात्तु तच्छ्रुतेः ४१ यत्पुनरौपाधिकजीवस्य कर्तृत्वमुक्तं तत्किमीश्व
रायत्तं नवेति संदेहे जीवस्य कारणादिपौष्कल्यादेव कर्तृत्वसिद्धेर्नास्येश्वरायत्तत्वं नेति प्राप्ते न चैष ह्येवसा
धुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते।।
इति श्रुत्या ईश्वरायत्तत्वं कर्तृत्वस्येति वाच्यम् तथा त्वे विधिनिषेधानर्थक्यान्नेश्वर एवाभिषिक्त इति विधिनिषे
धशास्त्रं वैयर्थ्यं स्यादिति प्राप्ते तु शब्देन पूर्वपक्षं निरस्य प्रतिजानीते परादिति परमेश्वरादेव जीवस्य क
र्तृत्वादि संसारस्य मोक्षस्य च सिद्धिर्भवितुमर्हति कुतः तच्छ्रुतेः कर्तृत्वादेरीश्वरायत्तत्वश्रुतेरेष ह्येव
साधु कर्म कारयति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीत्यादिश्रुत्यादेरित्यर्थः ४१ न चात्मेश्वरस्य का
रयितृत्वे धर्ममेव कारयेत् नाधर्मं अन्यथा केनचित्सुमतां धर्मं केनचिदधर्मं कारयतो वैषम्यं निर्दयत्वे

32

·सू·वृ·

३२

स्यातामित्यत आह कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ४२ तुशब्दः शंकानिरासार्थः जीवे
न कृतो यः प्रयत्नो धर्माधर्मलक्षणः तदपेक्ष एवेश्वरो ऽस्मिन्नपि जन्मनि धर्मादिके कारयति तदपेक्षा
सुखादिफलं ददाति तेन वैषम्यनैर्घृण्ये न प्रसज्येते अनादित्वात्संसारस्य पूर्वजन्मकृतधर्माद्यपेक्षा पुन
वमपीश्वरस्य कृतप्रयत्नापेक्षत्वं कुतः इत्यत आह विहितप्रतिषिद्धावैयर्थ्यादिभ्यः इति ईश्वरस्य कर्मसा
पेक्षत्वे एव ज्योतिष्टोमेन स्वर्गकामो यजेत ब्राह्मणो न हन्तव्य इत्यादयोर्विहितप्रतिषिद्धयोरवैयर्थ्यं भवति॥
अन्यथा विधिनिषेधशास्त्रमनर्थकमेव स्यात् धर्मे कृते दुःखमधर्मे कृते सुखं संपादयेदित्यादिदोषप्र
दिशाद्यर्थः तस्मादीश्वर एव पूर्वकृतसुकृताद्यनुसारेण धर्मादिकारयिता तदनुसारेण फलदाता चेति
सिद्धं ४२ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ४३ एवं तावन्नित्यः स्वप्रका
शोऽकर्तात्मेत्युक्तं तस्य सिद्धाभेदयोग्यत्वस्यात्र ब्रह्माभेदः साध्यते अत्र यः आत्मनि तिष्ठन्नित्यादिभेदश्रुति
जातस्य तत्त्वमसीत्याद्यभेदश्रुतिजातस्य च विरोधसंदेहे समबलत्वादस्ति विरोध इति प्राप्ते भेदं विना
पूर्वोक्तस्य जीवेश्वरयोरुपकार्योपकारकभावस्य स्वामिभृत्यवत्तस्य बन्धमोक्षापेक्ष्यस्यानुपपत्तेः अभेदं वि
ना तत्त्वमसीत्यादेरनुपपत्तेरिमनयोः समबलत्वे न चोभयविधश्रुतीनामंशांशिभावांगीकारान्न वि
रोध इति वाच्यमीश्वरस्य निरंशत्वादित्यस्ति विरोध इति प्राप्ते ब्रूमोंश इत्यादिः जीवः ईश्वरस्यांशः शुद्धोंश
ननु स्वाभाविकोंशः ईश्वरस्य निष्कलमित्यादिनिरंशत्वश्रुतिविरोधात् अत ईश्वरस्य कल्पितोंशो जी

३२

वः कुतः पुनर्जीवेश्वरयोः अंशांशिभावः भेदाभेदः श्रुतिभ्यामित्याह नानेत्यादिनैकरसनेनसूत्रेण य
आत्मनि तिष्ठन्नित्यादिना जीवेश्वरयोर्नानाव्यपदेशाद्भेदव्यपदेशात् अन्यथा चाऽपि अनानात्वस्यापि व्य
पदेशादित्यर्थः तथा ह्येके शाखिन आथर्वणिका ब्रह्म दाशा ब्रह्म दाशा ब्रह्मेमे कितवा इत्यादिना ब्रह्मणो
दाशादासकितवादिभावमामनन्ति तस्मादनानात्वस्य भेदव्यपदेश इत्यर्थः दाशाः कैवर्ताः दासाः भृ
त्याः कितवाः द्यूतकृताः धूर्ताः तस्मात्कल्पितासिद्धभेदाऽवादेन श्रुतीनामभेदपरत्वात्कल्पितभेद
वानंशो जीव इति ४३ मंत्रवर्णाच्च ४४ पादोऽस्य विश्वा भूतानीति मंत्रवर्णादपि जीवोंऽश इत्यर्थः भूता
नि स्थावरादयो जीवाः पादोंऽश इत्यर्थः ४४ अपि च स्मर्यते ४५ किंचेश्वरांशता भगवद्गीतासु ममैवां
शो जीवलोके जीवभूतः सनातन इति स्मर्यते तस्मादीश्वरांशो जीवः ४५ न च जीवस्येश्वरांशत्वे जी
वगतदुःखेनेश्वरस्य दुःखित्वं स्यात् पादादिगतदुःखेनांगिनो देवदत्तस्य दुःखित्वदर्शनादित्यत आ
ह प्रकाशादिवन्नैवं परः ४६ यथा जीवो दुःखी नैवं परमात्मा दुःखी प्रकाशादिवत् यथा सौरश्चा
न्द्रमसो वा प्रकाशो नभो व्याप्य वर्तमानो वक्रकाष्ठाद्युपाधिकत्व वक्रभावमापन्नोऽपि न वस्तुतो
वक्रभावमापद्यते यथा वाकाशो घटादिषु गच्छत्सु गच्छन्निव न वस्तुतो गच्छतीति तद्वदित्यर्थः विं
बप्रतिबिंबयोरीश्वरजीवयोर्भेदस्य सत्वान्न जीवदुःखेनेश्वरस्य दुःखित्वं उपाधेरुपहितपदा
पातित्वादिति भावः ४६ जीवदुःखेनेश्वरस्य दुःखित्वाभावं स्मरंतीत्याह स्मरंति च तत्र यः

परमात्मासौ सत्त्वो निर्गुणः स्मृतः न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा कर्मात्मा त्वपरो योसौ मो
क्षबंधैः स युज्यते इत्यादिना व्यासादयो जीवदुःखैर्वशीश्वरस्य स्मरंतीत्यर्थः चशब्देन तयोरन्यः पिप्प
लं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीत्याद्याश्रुतिः सूचिता ४७ ननु नात्मनो तोलि दृष्टास्तत्वोः सम्बतु।
माप्नोति य इह नानेव पश्यतीत्यादिना जीवेश्वरभेदमात्रप्रतिषेधात् सर्वेषु भूतेषु चैतन्यस्याखंडैकरस
त्वात् कथं मित्रं शत्रुः परिहर्तव्यः इत्यादि लौकिकानुज्ञापरिहारौ स्यातां कथं वा ऋतौ भा
र्यामुपेयात् गुर्वंगनां नोपगच्छेदित्यादि वैदिकानुज्ञापरिहारौ संगच्छेते ग्राह्यत्याज्यभेदाभावादि
त्यत आह अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ४८ उक्तौ लौकिकवैदिकौ चानुज्ञापरिहारौ
सर्वेषात्मनः एकत्वेपि शरीरसंबंधात् संगच्छेते देहसंबंधश्च तादात्म्यं तत्तद्देहविशिष्टत्वेनात्मभेदादस्मिन
ग्राह्यत्याज्यभेदः ज्योतिरादिवत् यथा ज्योतिषो वह्नेरेकत्वेपि श्मशानसंबंधी वह्निः परिहार्यः नेतरः
यथा वा सौरप्रकाश एकोप्यमेध्यादिसंयुक्तः परिहार्यो नेतरः एवमात्मापीत्यर्थः ४८ ननु तथा।
पि सर्वशरीरेषु कर्मकर्तृत्वं तस्यैकत्वादेकत्वादेकदेवदत्तशरीरावच्छेदेन कर्मकरणे धर्मादिकं य
ज्ञदत्तशरीरावच्छेदेनापि जायेतेत्यत आह असंततेश्चाव्यतिकरः ४९ परिछिन्नांतःकरणोपाधि
कस्य कर्तुः परिछिन्नस्य देवदत्तात्मनो यज्ञदत्तशरीरेणासंततेः असंबद्धधर्मादेरव्यतिकरैः देवद
त्तस्य यज्ञदत्तशरीरावच्छेदेनापि धर्मादिप्रसंगो नास्तीत्यर्थः ४९ आभास एव च ५० यथा

नेकघटप्रतिजलविंवतीनां सूर्याभासानां मध्ये एकस्मिन्सूर्याभासे कंपमाने सूर्याभासांतरं न
कंपते एवमीश्वराभास एवायं जीवः इति नैकस्मिन्जीवे धर्मादिसंवंधे जीवांतरस्य धर्मादिसं
वंध इत्यर्थः किंच येषां सांख्यादीनां वहवो विभवश्चात्मानः सर्वशरीरसंवंधिनस्तेषामेव धर्मा
सांकर्यं प्राप्नोति तथाहि सांख्यमते नावद्भोगसाधनप्रधानसन्निधानस्य सर्वात्मनामविशि
ष्टत्वादेकस्यात्मनः सुखादिसंवंधे सर्वात्मनां सुखादिसंवंधः स्यात् एवं न्यायमतेपि देवद
त्तात्मनः सुखादिहेतुमनःसंयोगस्याऽऽत्मनः सुखादिसंवंधेनि सर्वात्मनामविशिष्टत्वात् फ
लानियमः स्यादेव ५० नन्वदृष्टनियमात्फलनियम इति चेन्नेत्याह अदृष्टाऽनियमात् ५१
सांख्यमते प्रधानसमवेतमदृष्टं ततश्च प्रधानस्य सर्वसाधारण्याददृष्टस्याप्यनियमात्फला
नियमस्तदवस्थः न्यायमतेप्यदृष्टहेतुमनःसंयोगस्य सर्वात्माविशेषादिदमस्यादृष्टमस्य
नेत्यवस्थापकस्यादृष्टनियमस्याभावात् फलानियम इत्यर्थः ५१ नन्वहमिदं फलं प्राप्नवानि नेदं
परिहारिष्यामीदं करिष्य इदं न करिष्य इत्येवंरूपाभिसंध्यादयः प्रत्यात्मनियताः संतः प्रत्यप्र
योज्यादृष्टनियमहेतवो भविष्यतीत्यत आह अभिसंध्यादिष्वपि चैवं ५२ अभिसंध्यादिष्वपि सा
धारणमनःसंयोगसाध्येष्वस्मद्दृष्टवदतिनियम इत्यर्थः ५२ प्रदेशादिति चेन्नांतर्भावात् ५३ न
न्वात्मनो विभुत्वेपि स्वस्वशरीरावच्छिन्न एवात्मप्रदेशेऽभिसंध्यादिहेतुमनःसंयोग इति भावत्यभि

स्थ्यादिनियमइतिचेन्न सर्वात्मनांसर्वशरीरेष्वेतभीवादस्यात्मनः इदंशरीरमित्यत्रनियामभा
वादस्यात्मनोऽस्मिञ्छरीरेप्रदेशइतिप्रदेशकल्पनानसंभवतीत्यर्थः तस्मादस्मत्पक्षएवसक
लदोषाभावाइतिसिद्धम्॥५३॥ ॥इतिश्रीब्रह्मसूत्रवृत्तौद्वितीयाध्यायस्यतृतीयः पादः
॥३॥ ॥एवंमहाभूतजीवश्रुतिविरोधेपरिहृत्यलिंगशरीरविषयश्रुतिविरोधं
परिहर्तुंपादांतरंकरिष्यमाणः पूर्वाधिकरणेकर्तृस्वरूपावधारणेनबुद्धिस्थानांकर्तृत्वपकरण
नामिंद्रियाणामुत्पत्तिंसाधयति तथाप्राणाः १ अस्मिन्नपिपादेपूर्ववत्पदेश्रुतीनांमिथोविरो
धेनाप्रामाण्याद्ब्रह्मसमन्वयासिद्धिःफलंसिद्धांतेमासामविरोधेनप्रामाण्यात्सर्गनयसिद्धिरिति
वोध्यं तत्रतावदात्मनः आकाशःसंभूतइत्याद्युत्पत्तिप्रकरणेष्विंद्रियाणामुत्पत्तिर्नश्रूयते क्व
चिच्चऋषयोवावतेग्रेसदासीत्केतेऋषयइतिप्राणावाऋषयइत्यत्रसृष्टेःप्रागिंद्रियाणां
सद्भावश्रवणाद्नुत्पत्तिरितिभातिक्वचिदेतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचखंवा
युर्ज्योतिरापःपृथिव्यादावुत्पत्तिरिंद्रियाणांश्रूयतेतासांश्रुतीनांमिथोविरोधोस्तिनवेति।
संदेहेविनिगमकाभावाद्नुत्पत्तिविरोधइतिप्राप्ते सृष्टेःपूर्वमिंद्रियसद्भावश्रवणंदुत्पत्तिश्रुति
गौणीत्वविरोधइत्येकदेशिनासिद्धांतितंतंदूषयति तथाप्राणाइति तथाएतस्माज्जायतेप्रा
णइत्याद्यदाहृतवाक्यस्याकाशादिवत्प्राणादिंद्रियाणिजायंतेउत्पत्तिश्रुतेरविरोधादित्य

त्यर्थः १ यदुक्तं स्रष्टेः प्रागिंद्रियसद्भावश्रवणादुत्पत्तिश्रुतिर्गौणीति तत्राह गौणासंभवात् २
गौणाउत्पत्तिश्रुतेरसंभवो गौणासंभवः तस्मादेकदेशपुक्रमयुक्तमित्यर्थः प्राणानां नित्यत्वे ए
कविज्ञानप्रतिज्ञाबाध्येतेति भावः सद्भावश्रुतिस्तु हिरण्यगर्भात्मकावांतरप्रकृतिरूपप्राण
नाविकारापेक्षया प्राकृतसद्भावं बोधयति अवांतरप्रलये हिरण्यगर्भेंद्रियाणां लयाभावादिति।
बोध्यम् २ इंद्रियाणां मुख्यं जन्म तत्र हेत्वंतरमाह तत्प्राक्श्रुतेश्च ३ तत तत्रैतस्माज्जा।
यते प्राण इत्यादिवाक्ये जायत इति जन्मवाचिपदस्य खवाय्वादिषु मुख्यस्य लोकायपेक्षया प्रावी
नेषु प्राणेंद्रियादिषु श्रुतेरिंद्रियाणां मुख्यं जन्मेत्यर्थः एकस्मिन्वाक्ये एकस्य पदस्य क्वचिद्गौ
णत्वं क्वचिन्मुख्यत्वमित्यस्यासंभवादित्यर्थः ३ उत्पत्तिप्रकरणेषु इंद्रियाणामुत्पत्तिर्न श्रूय
इति यदुक्तं तत्र शंकादोषोऽपेऽनुत्पत्तेः श्रुतत्वादित्याह तत्पूर्वकत्वाद्वाचः ४ ब्रह्मप्रकृतिकानि
तेजोबन्नानि तत्कार्येनोच्यते तथाच प्राणेन मनसा च सहितायाः अन्नमयं हि सोम्य मनः आ
पोमयः प्राणस्तेजोमयी वागित्यतेन तेजोबन्नजन्यत्वाभिधानादस्त्युत्पत्तिश्रुतिरित्यर्थः तस्मा
दुत्पत्तिश्रुतिसद्भावात्स्रष्टेः प्राक्सद्भावश्रुतेश्चान्यविषयत्वादुक्तिश्रुतीनामविरोध इति सि
द्धं ब्रह्मविकारत्वमिंद्रियाणामिति ४ एवमिंद्रियाणामुत्पत्तिं प्रसाध्य तेभ्यो जीवस्य विवार
यतदाश्रितसंख्यां निर्णेतुकामः आश्रयाश्रयीभावसंगत्या पूर्वपक्षयति सप्तगतेर्विशेषितत्वाच्च।५।
सप्त प्राणाः प्रभवंति तस्मादिति सप्तेंद्रियाणि श्रूयंते क्वचिदष्टौ ग्रहा अष्टावतिग्रहा इत्य

त्राष्टौ ग्रहाः पुरुषपशुबंधकाइंद्रियाणि रागाद्युत्पादनद्वारेंद्रियाकर्षकाविषयास्त्वतिग्रहा इत्य
र्थः सप्तवैशीर्षण्याः प्राणा द्वाववांचावित्यत्र नवत्वं अवांचौ पायूपस्थौ नव वै पुरुषे प्राणा नाभि
र्दशमीत्यत्र दश दश वै पुरुषे प्राणा आत्मैकादश इत्यत्रैकादश आत्ममनः एवं क्वचित् द्वाद
शक्वचित्त्रयोदशेंद्रियाण्युच्यंते तासां श्रुतीनां विरोधसंदेहे विरोधो नास्तीति प्राप्ते एकदेशिमतं स
प्तैवेंद्रियाणि कुतः श्रुत्या सप्तत्वावगतेरित्यर्थः किं च सप्तवैशीर्षण्याः प्राणा इतींद्रियाणि शी
र्षण्यत्वेन विशेषितत्वात्सप्तैवेंद्रियाणि ये शीर्षण्याः सप्त द्वे श्रोत्रे द्वे नेत्रे द्वे नासिके एका वागिति ते
प्राणा इति सप्तानामेवेंद्रियत्वावगमात् अष्टत्वादिसंख्याश्रवणं त्वेकस्यैवांतःकरणस्य संश
यनिश्चयगर्वस्मरणरूपवृत्तिभेदेन मनोबुद्ध्यहंकारचित्तानीति चतुष्ट्ववत्सप्तानामेव वृत्तिभेदेनोप
पद्यत इत्यविरोधः श्रुतीनामिति प्राप्ते तं दूषयति हस्तादयस्तुस्थितेऽतो नैवं इ तं शब्देन प्राणानां स
प्तत्वनिरासः यतो हस्तौ वै ग्रह इत्यादिना हस्तादयोऽप्यतिरिक्ताः प्राणाः श्रूयंते सप्तत्वसंख्यायामस्त
भावितानां तभावे सप्तत्वातिरेके स्थिते सप्तसंख्या इंद्रियनिष्ठैकादशत्वसंख्यायामंतर्भावयितुं शक्यते ॥
न्यूनसंख्यायामधिकसंख्यायामंतर्भावसंभवात् अतो नैवं मंतव्यं सप्तैव प्राणा इति सूत्रार्थः यद्य
पि ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं मनश्चेत्येकादशेंद्रियाणि विहाय हृदयाहंकारौ प्राणानां द्वाद।
शत्वत्रयोदशत्वसंख्ययोरुदकौ श्रूयेते तथापि तयोरंतःकरणप्रभेदत्वान्नाधिकसंख्यापादकत्व।
मित्येकादशेंद्रियाणीति निरवद्यं सप्तवैशीर्षण्याः प्राणाः इत्यत्र न सप्तोद्देशेन प्राणत्वविधानं किं

वप्राणोद्देनस्थानभेदमात्रेणचतत्रणीमेवेंद्रियाणांसप्तत्वमितिनतद्विरोधः नचवैपुरुषेप्राणानाभि
र्देशामीतिवाच्यं पुरुषाकारदेहच्छिद्राभिप्रायेणप्राणाभिप्रायमित्यविरोधइतिसिद्धम् नन्विदंस
त्रहृदयव्याख्यानमसंगतं सप्तप्राणाः प्रभवंतीतिघ्राणरसचक्षुःश्रोत्रत्वङ्मनोवाचांसप्तत्वावग
तेः शीर्षण्यानीविशिषितत्वमितिहेतद्धृदयेप्यधिकरणेनसूत्रेचकारानुपपत्तेः येशीर्षण्याः सप्त
तेप्राणाः नेतरइसत्रपरिसंख्यापत्तेश्च अतएवतदुत्तरंहितीयसूत्रव्याख्यानमप्यसंगमितिचेन्न
स्येमयासूत्रद्वयव्याख्यास्यामः मरणसमयेयेषांसहगमनंतेषामेवभोगसाधनत्वादिंद्रियत्वं।।
तथाचमुख्यप्राणमनूत्क्रामंतं सर्वेप्राणाअनूत्क्रामंतीतिघ्राणादीनांसप्तानामेवगतेः सहग
मनस्यश्रवणात्तेवेंद्रियाणि ननुसर्वशब्दश्रवणाच्चचक्षुषः पुरुषः पराङ्पर्यावर्ततेथारूप
ज्ञोभवत्येकीभवतीनपश्यतिजिघ्रतिनरसयतिनवदतिनशृणोति नमनुतेनस्पृशतेइत्याहुरी
तिचक्षुरादीनांसप्तानामेवप्रकृतानांविशेषितत्वात्सर्वशब्दः प्रकृतगामी सर्वेब्राह्मणाभोजः
यितव्याइत्यत्रसर्वशब्दोयथाप्रकृतनिमंत्रितब्राह्मणपरस्तद्वदितिशंकासूत्रार्थः यत्रोक्तं
त्वक्स्थायांचक्षुरधिष्ठात्रदेवः सएवचाक्षुषःशब्दवाच्यः पुरुषःरूपादिविषयव्याप्तिंविहाय
वर्ततेतदानीमरूपज्ञोभवतिहृदयेचक्षुरेकीभवतीपार्श्वस्थांश्चनायंपश्यतीत्याहुरितिसूत्रार्थः
सिद्धांतस्तत्रार्थस्तुसप्तभ्योतिरिक्ताहस्तादयोपिवंचकत्वेनसूपंते हस्तौवैग्रहस्त्रसादिनाग्रह
त्वेयसप्तानामेवगतिश्रवणन्नत्राह विशेषितत्वाच्चेतिसप्तचेते ७

वे.सू.वृ. 36 ३६

त्वं वेधकत्वं ह्लादीनां सहगमनं विना न संभवति सर्वे प्राणा अनूत्क्रामंतीत्यविशेषेणा सर्वेंद्रियाणा
मुत्क्रांतिश्रवणाच्च भवेत्येकादशोत्क्रांतिमंतः प्राणाः नव सर्वशब्दस्य प्रकृतविशेषितसप्तप्राणपर
त्वं प्रकरणात् स्मृतेर्वनीयत्वात् सर्वे ब्राह्मणा भोजयितव्या इत्यत्र तु अनन्यगत्या प्रकृतपरत्वं सर्वश
ब्दश्रुतेरितिशिष्टसूत्रात्तरार्थः पूर्ववदिति तस्मादेकादशोत्क्रांतिमंतः प्राणा इति सिद्धम् नन्विं
द्रियाणामुत्क्रांतिर्न संभवति तेषामपरिच्छिन्नाइंद्रियाग्राह्यत्वेन सूक्ष्मा विभव्याविभ्वाज्ञेयपसंग
त्वासांख्यमतेदूषयति अणवश्च ७ इमे प्राणाः अणवः परिच्छिन्नाइंद्रियाग्राह्यत्वेन सूक्ष्माश्चे
त्यर्थः नतु महारणाव इति सूत्रार्थः तथैव अप्राण्वात्मपदोत्क्रांतो शरीरव्यपिसूतोदिकं न स्यादित्याधि
दोषादिप्रसंगादिति इंद्रियाणां विभुत्वे काशीस्थविश्वेश्वरदर्शनस्पर्शने सेतुवासिनामपि स्यात्तोउत्क्रां
तिगत्यागतिश्रुतिविरोधश्च सादिदोषाः द्रष्टव्या तस्मात् परिच्छिन्नाः सूक्ष्माश्च प्राणा इति सिद्धम्
इंद्रियाणामुत्पत्त्यादिकमुक्त्वा मुख्यप्राणे उत्पत्तिसंदेहे आद्याधिकरणेन्यायमतिदिशति श्रेष्ठश्च ८
इंद्रियस्वरूपे प्राणे च ज्ञाने तद्व्यापारान् मुख्यप्राणस्य भेदं विनाकरिष्यमाणत्वकरेत मध्ये उपसंतिदे
शाः कृतः नासद्वा इदमग्र आसीत् नेदं तर्हि नरात्र्याः ब्रह्मासीत् एके तः आनीदवातं स्वधया तदेकं तस्माद्धा
न्यन्नपरः किंचनास इत्यत्र आनीदिति पदेन प्राणसंचारस्य महाप्रलये श्रुतत्वात् संचारवतः प्राणस्य स्थिति
रिति न प्राणस्योत्पत्तिरित्यधिकरणाकायामयमतिदेशः इंद्रियवत् श्रेष्ठोपि प्राणो ब्रह्मविकार इत्येत

स्माज्जायते प्राण इत्युत्पत्तिश्रवणस्य अविशेषादित्यर्थः अत्यर्थमस्तु तर्हि तस्मिन्महाप्रलये
मृत्युर्मारकः मृत्युमद्धानासीत् अमृतं देवभोग्यं च नासीत् तथा रात्र्यह्नः प्रकेतः चिह्नं भू
तश्चंद्रः सविता च नासीत् अवधयाम हे गिरस्यं वधः स्वधा प्रादुर्भूतेन पितृभ्यो दीयमानमन्नं तद्वर्जनं
वा चेतत तर्हि शून्यवादः स्यादित्य तआह आनीदिति तदेव कं मूलकारणं परं ब्रह्मावातं वा
यादि प्रपंचरहितं आनानात आतीदितियावत् तस्मादात्मनोऽन्यत् किंचिदपि नासीन्न बभूव
किलेति इकारस्यान्वयः इति रमत्व प्राणस्योत्पत्तिं चिंतानंतरं तत्स्वरूपं निरूपयति नवायुक्रि
ये पृथगुपदेशात् १० यः प्राणः स वायुरिति महान्वायुर्देवं प्राण इति श्रूयते तथा च महान्वा
युरेव प्राण इत्येकः पूर्वपक्षः न वायुः पूर्वपक्षोऽसंगतः छांदोग्ये मनो ब्रह्मेत्युपासीतेत्युपक्रम्य
मनोरूपब्रह्मणो वाक् प्राणश्चक्षुः श्रोत्रं च ब्रूवातं वदन् प्राण एव ब्रह्मणश्चतुर्थः पादः स वायु
ना ज्योतिषा भाति तपति च ति भाति अभिव्यक्तौ भवति तपति स्वव्यापारे गच्छतीवायुपेक्षया प्राण
स्य भिन्नत्वकथनेन निर्धारणाभावात् अत्र प्राणस्य ज्ञानेंद्रियत्वेऽपि एतस्माज्जायते प्राणः ।
स वायुरित्यादौ भेदनिर्देशेन निर्धारणाभावतादवस्थ्यादिति चेत्तर्हि तिष्ठतु अस्तु इदं यं भि ।
योविरुद्धं सांख्यमनरीत्या इंद्रियव्यापार एव प्राणो न्वितिप्राप्ते ब्रूमः प्राणो न वायु क्रियेन वायु ।
र्नापि इंद्रियव्यापार इत्यर्थः कुतः एतस्माज्जायते प्राण इत्यादौ तत्र तत्र वायोरिंद्रियेभ्यश्च प्रा ।

37

वे॰ सू॰ वृ॰
३७

णस्य पृथगुपदेशादित्यर्थः ॥ नन्वीन्द्रियेभ्यः पृथगुपदेशो यदि प्राणस्यापरात्मना नास्तीति चेन्न वृत्तिवृ
त्तिमतोरभेदात् तर्हि यः प्राणः स वायुरिति श्रुतिविरोधः कथं परिहरणीयः इति चेदुच्यते महा
वायुरेव हि प्राणापानादिपंचात्मनावतिष्ठमानः प्राण इत्युच्यते तथा च विकारविकारिणोर्वा
स्तवाभेदकाल्पनिकभेदयोः सतोरत्र भेदाभेदश्रुत्योर्विरोधः इति सिद्धं अत्र सूर्वपदेवाधिदि
यव्यापाराभ्यां जीवस्य विवेकः फलं सिद्धांते तूभयातिरिक्तप्राणादपीति शेषः ९ ननूभयोति
रिक्तस्य स्वरूपस्य वगतस्य तेत्रभावस्य प्राणस्य देहे अपरागमे जीवप्राणिघोरुभयोः स्वतन्त्रयोरेक
वाक्यत्वाभावात्संशयः शरीरान्मयन प्रसंग इत्यत आह चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः १०
तु रुक्तस्य प्राणस्यातंत्र्यस्य निरासार्थः प्राणस्य तु जीवत्वातंत्र्ये किंतु राजापेक्षया मंत्रिण इव गु
णभावस्यातंत्र्यं तस्य प्राणस्य प्रजापेक्षया मंत्रिण इवेंद्रियापेक्षया तथा च नोक्तदोष इति तात्प
र्यार्थः स्वत्रासारार्थंत्व चक्षुरादिवत्प्राणोपि जीवं प्रतिकरणभूतः कुतः तत्सहशिष्ट्यादिभ्यः
नेत्रचक्षुरादिभिः सह प्राणसंवादेष्विषप्राणस्य शिष्टेः शासनादित्यर्थः समानजातीयानामेव
सहशासनस्य युक्तत्वात् आदिशब्देनाचेतनत्वभौतिकत्वादिहेतुसंग्रहः १० ननु प्राणस्य चक्षु
रादिवत्करणत्वं न युक्तं असाधारणविषयाभावादित्यत आह अकरणत्वाच्च न दोषस्तथा
हि दर्शयति ११ न चाक्तदोषः प्राणस्याकरणत्वादेव कथं तर्हि आत्मानं प्रतिकरणभावः इंद्रि

३७

यांतरेष्वसंभावितसासाधारणस्य देहधारणाख्यस्य कार्यस्य निर्वाहकत्वादिति हृमः तथाहि श्रुति
रन्तं कार्यं प्राणस्यासाधारणं दर्शयति प्राणसंवादे वागादिभ्यो मुख्यप्राणस्य श्रेष्ठत्वे निर्धार्यतान्वरिष्ठः
प्राण उवाच मा मोहमापद्यथाहमेवैतत्पंचधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामीति वा।
णे शरीरे प्राणेन रक्षन्नवरं कुलायमिति श्रुतिरपि देहस्थितिः प्राणनिमित्तेत्याह अवरं अनेका
शुचिनीडं कुलायं देहाख्यं रक्षन् प्राणस्थित्या रक्षन् जीवः स्वपितीति योजना ११ न केवलं देहधा
रणमेवास्यासाधारणं कार्यं किंत्वन्यदपीत्याह पंचवृत्तिर्मनोवद्व्यपदिश्यते १२ यथा मनोनेकवृत्ता
ख्यासाधारणकार्यापेक्षयानेकधा व्यपदिश्यते एवमुच्छ्वासनिश्वाससर्वशरीरक्रियोत्क्रान्त्याख्या
नि चत्वारि कार्याणि पंचमं च कार्यं भुक्तान्नादिरसानां समत्वेन सर्वांगेषु नयनमपेक्ष्य पंचवृत्तिः
प्राणो व्यपदिश्यते क्रमेण प्राणोपानो व्यानो उदानः समान इति तदसाधारणकार्यापेक्षया जीवो
पकरणत्वं मनोवदिति सिद्धम् १२ एवं मुख्यप्राणस्योत्पत्तिं स्वरूपं चोक्त्वा परिमाणविशेषविषये
प्राणाणुत्वनिर्वाहोत्क्रान्त्यादिश्रुतेः सम एभिस्त्रिभिर्लोकैः समोनेन सर्वेण प्राण इति श्रुतेः प्रा
णविभुत्वविषयायाश्च मिथो विरोधोस्ति न वेति संदेह अणवश्चेत्यधिकरणन्यायातिदेशेन सिद्धांत
यति अणुश्च १३ चक्षुरादिवत्प्राणोपि परिच्छिन्नः सूक्ष्मश्चेत्यर्थः सम एभिस्त्रिभिर्लोकैरिति।
श्रुतिश्च सकलवायुपरा नाध्यात्मिकप्राणमात्रपरेत्यविरोध इति अंतरेण प्राणस्वरूपकथनानंतर

रेवदिंद्रियपरिमाणसाम्यमतिदिश्यते इतिसंगतिर्बोध्यं १३ ज्योतिराद्यधिष्ठानंतुतदामननात् १४ पूर्व
मध्यात्मिकप्राणस्याणुत्वमाधिदैविकप्राणोः समएभिरितिश्रुत्याव्यापित्वमित्युक्तं तत्रसंयोगेनाध्या
त्मिकानांप्राणानांत्र्याधिदैविकदेवताधीनचेष्टात्वमस्तिनवेतिविचार्यतेइतिप्रसंगसंगतिः॥
अत्रचक्षुरादीनिरूपाणियपश्यतीतिश्रुत्याचक्षुरादेर्देवतानिरपेक्षचेष्टावत्वंप्रतीयते आदित्यश्च
क्षुर्भूत्वाक्षिणीप्राविशदित्यादिश्रुत्यानुसूर्यादिदेवताधीनचेष्टावत्वंप्रतीयते अनयोर्मिथोवि
रोधोस्तिनवेतिसंदेहे अस्तिविरोधइतिप्राप्तेएकदेशिसिद्धांतः देवतानांकरणाधिष्ठातृत्व
तासामेवभोक्तृत्वप्रसक्तौजीवस्यभोक्तृत्वंनस्यादितियुक्तिसहकृतायाश्चक्षुःपश्यतीतिश्रुतेर्वली
यस्त्वादादित्यश्चक्षुरित्यादिश्रुतेर्गौणार्थतेतिनविरोधइतितद्दूषयति ज्योतिरित्यादिनातुरुक्त
सिद्धांतनिरासार्थः अधिक्रियतेप्रेर्यतेनेनेत्यधिष्ठानं अधिष्ठितमित्यर्थः ज्योतिरादिभिरग्न्या
द्यभिमानिनीभिर्देवताभिरधिष्ठितमेववाक् चक्षुरादिकंचेष्टतेतदामननात्तस्यदेवताधिष्ठि
तत्वस्यादित्यश्चक्षुरित्यादिश्रुतत्वादित्यर्थः अचेतनानांस्वतःचेष्टानुपपत्तेरितियुक्ति
रपिद्रष्टव्या अक्षिणीप्राविशत्प्रेरकंभावेनेतिश्रुत्यर्थः नचदेवतानामेवभोक्तृत्वं तस्याश्रव
णात् योयदधिष्ठातासतत्साध्यफलभोक्तेतिव्याप्तेश्चसारथौव्यभिचारः नचदेवतानामिंद्रियसा
ध्यफलभोगित्वः इंद्रियाधिष्ठातृत्वाज्जीववदितिवाच्यम् नरहतथापफलभोगसांद्रियसाध्य

सनहवेदेवान्यापगंछतीत्यादिदेवेषुबाधितत्वात् नचचक्षुरादीत्यादिश्रुतिविरोधः नत्वदे
वतानपेक्षत्वस्याऽश्रवणादितिसिद्धं देवाधिष्ठेयत्वंप्राणानामिति किंचश्रुत्यंतरेऽपिप्रा
णदेवतयोरधिष्ठात्रधिष्ठेयभावंद्योतयति सवैवाचमेवप्रथमामत्यवहत्सायदामृत्युम
त्यमुच्यतसोऽग्निरभवदित्यादिनावागादीनामग्न्यादिभावापत्तिकथनात् अग्न्यादिभावस्य
तदधिष्ठातृकत्वमेव अन्यस्यासंभवात् सप्राणोवाचमेवप्रथमामहीयकर्मणिप्रथमा
मत्यवहत् मृत्युमनीत्यनिराहृत्यप्रापयत् इंद्रियाणांधीनस्थितिकत्वात्प्राणस्यवागादिस्थि
तिसंपादनद्वारातन्मृत्युनिराकर्तृत्वंबोध्यं किंप्राप्ययदित्याशंक्य प्राणोवाचः स्थितिसंयो
ग्यग्निदेवतायासाकमधिष्ठात्रधिष्ठेयभावंप्रापयदित्याह सायदेति सावाक्प्राणेनयदाम
त्कोमृत्युरभवत्तदालब्धस्थितिकासतीस्वयमग्निमभवत देवताकाभवदितिश्रुत्यर्थः १४
यद्वंतेदेवतानामेवभोक्तृत्वंप्रसंगइतितत्राह प्राणवताशब्दात् १५ प्राणवताजीवे
नैवेंद्रियाणांस्वस्वामिभावः संबंधः इंद्रियसाध्यभोगभागिजीवएवेतियावत् कुतः शब्दा
त् अथयत्रैतदाकाशमनुविषण्णंचक्षुः सचाक्षुषः पुरुषोदर्शनायचक्षुरित्यादिश्रुतेरि
त्यर्थः अथदेहेप्राणप्रवेशानंतरंयत्रकृष्णतारेछिद्रभूतमाकाशमनुविषण्णमनुगतंतच
क्षुः तत्रस्थआत्माचक्षुर्व्याप्तःचाक्षुषः तस्यरूपादिदर्शनायवृत्तिरूपायचक्षुः नचेतन्मात्रे

वे॰सू॰वृ॰
३९
39

तिरुक्तमर्थः एतत्सूत्रतात्पर्यार्थोनच्देवतानामेवभोक्तृत्वमित्यादिनोक्तः १५ तत्रचनित्यत्वात
१६ तस्यजीवस्यस्वकर्मोपार्जितेदेहेकर्तृत्वेनभोक्तृत्वेननित्यत्वाच्च नदेवतानांभोक्तृत्वमस्मिं
छरीरेइत्यर्थः तस्मादेवतानाप्राणाधिष्ठातृत्वेनकिंचिद्बाधकमितिसिद्धम् १६ ननुसत्स्विंद्रि
येषुतदधिष्ठातृदेवताचिंतातान्येवप्राणव्यापारव्यतिरेकेणनसतीत्याक्षेपेसमाधत्ते तइंद्रिया
णितद्व्यपदेशादन्यत्रश्रेष्ठात् १७ एतस्माज्जायतप्राणोमनः सर्वेंद्रियाणिचेतिश्रुतौमुख्यप्रा
णादिंद्रियाणांतत्त्वांतरत्वंप्रतीयते हंतास्यैवसर्वेरूपमसामेतितएतस्यैवसर्वेरूपमभवन्नि
तिश्रुतौमुख्यप्राणात्मकत्वंइंद्रियाणांबोध्यते हंतइदानीमस्यैवमुख्यप्राणस्यैवसर्वेवागादयोवयंरू
पमसामेत्याशिवंदत्वातेवागादयएतस्यैवप्राणस्यस्वरूपंवभूवुरित्यर्थः तथाचानयोर्विरोध
संदेहेनियामकाभावाद्विरोधइतिप्राप्तेएतस्माज्जायतेइतिवाक्येमनसइंद्रियेभ्यः पृथ
कुनिर्दिष्टत्वेऽपिनेंद्रियेभ्यस्तत्त्वांतरत्वंकिंत्विंद्रियत्वमेवेति यथातद्वत्प्राणादिंद्रियाणांपृथकुनि
र्दिष्टत्वेऽपिनप्राणात्तत्त्वांतरत्वंसमानानेनवाक्येनहंतास्येति वाक्यस्यविरोधइत्येकदेशिसमाधाने
दूषयतितइंद्रियाणीति प्राणात्तत्त्वांतराणीयाणीतिवहिरेवप्रतिज्ञा तत्रहेतुः तद्व्यपदेशा
दितिभेदव्यपदेशादित्यर्थः उक्तहेतुमितरेणसूत्रभागेनविवृणोति तइति श्रेष्ठान्मुख्यप्रा
णादन्यत्रअन्यैतेप्रकृतावागादयः प्राणाइंद्रियाणीत्युच्यतेनप्राणः एतस्माज्जायतइत्यादौ

व्यपदेशभेददर्शनात् ननु यं भेदव्यपदेश इंद्रियमनसोरपि समान इत्युक्तमिति चेन्न मनःषष्ठानींद्रि
याणीति स्मृत्या मनस इंद्रियेभ्यस्तत्वांतरत्वाभावाभ्युपगमात् नच प्रकृतेपि इंद्रतास्येति श्रुतेंद्रियाणि प्रा
णतत्वांतरत्वाभावाभ्युपगमः त एतस्यैव सर्वे रूपमभवंस्तस्मादेत एतेनाख्यायंते प्राणा इति वाक्यशे
षेणेंद्रियेषु प्राणशब्दस्य लाक्षणिकत्वप्रतिपादकेन प्राणादिंद्रियाणां तत्वांतरत्वाभ्युपगमात् नेंद्री
द्रियेभ्योऽनत्वांतरे च वक्ष्यपींद्रियशब्दो लाक्षणिको द्रष्टव्यस्तस्मात्तेरात स्यैव सर्वे रूपमभवन्नित्यमेव प्राणा
धीनचेष्टावत्वमिंद्रियाणामुच्यते न तत्वापारतम् १७ भेदश्रुतेः १ टवागादींद्रियप्रकरणमुपसंहृ
त्याथ हेममासन्यं प्राणमूचुरिति भिन्नप्रकरणे प्राणस्येंद्रियेभ्यो भेदेन श्रुतेन प्राणव्यापारत्वमिंद्रिया
णामित्यर्थः आसे भवमासन्यं प्राणं वागादयः ऊचुरिति श्रुत्यर्थः १८ इतश्च प्राणादिंद्रियाणि तत्वां
तराणीत्याह वैलक्षण्याच्च १९ सुप्तेष्वस्यायां प्राणस्य स्थितिर्नेंद्रियाणामित्यादि वहु वैलक्षण्यं तत्वां
तराणीत्यर्थः तस्मान्नोदाहृतवाक्ययोर्विरोध इति सिद्धम् इदं यथाश्रुतभाष्यानुसारेणोक्तं अन्ये
त्ववदिः प्रतिज्ञाकल्पनादिदोषप्रसंगाद्व्यपदेशभेदस्य संज्ञाभेदस्य तत्वांतरत्वेसाध्ये व्यभिचारेत्वाः प्र
करणभेदरूपस्य तस्य भेदश्रुतेरित्यनेन पौनरुक्त्यापातात्तत्राधिकरणद्वयं कल्पयामासुः तथाहि
किमेकादश वागादय एवेंद्रियाणि उत मुख्यप्राणोपीति विशये इंद्रियमिंद्रलिंगमित्यादिपाणिनिस्म
रणात प्राणस्याऽपि वागादिवज्जीवभावापन्नपरमेश्वरलिंगत्वादिंद्रियत्वमिति प्राप्ते सिद्धांतः श्रेष्ठान्यु

न्मुख्यप्राणादन्यत्र ते वागाद्य एवेंद्रियाणि कुतः तद्व्यपदेशात् इंद्रियत्वव्यपदेशात् इंद्रियशब्दस्य
तेषु रूढेरिति यावत् स्मरणं न रूढस्यैवेंद्रियशब्दस्य यथाकथंचित्स्वव्युत्पत्तिं दर्शयति गच्छतीति गौ
रितिवदिति नन्विदमयुक्तं प्राणव्यापारातिरेकेणेंद्रियाणामसत्वादित्याक्षेपे इदमारभ्यते भेद
श्रुतेर्वैलक्षण्याच्चेति एतस्माज्जायत इत्यादिद्विषयश्रुतिरत्र पठितव्या प्रकरणभेदाद्वैलक्षण्या
च्च न प्राणव्यापारत्वमिंद्रियाणामिति नोक्तवाक्यद्वयविरोध इति इंद्रभाष्यदूषणमयुक्तं जगद्वा
चित्वादित्यादौ वृद्धिः प्रतिज्ञादर्शनादिंद्रियरूपाः प्राणाः श्रेष्ठाः तदन्यस्ते तः प्रतिज्ञासंभवाच्च श्रु
तरुक्तशब्दानामेकस्मिन्वाक्ये पृथक् जन्मव्यपदेशादिति द्वैतोर्भाष्ये विवक्षितत्वात्तत्सिद्ध्यर्थमेवमपि
वाक्यमुदाहृतम् प्राणेंद्रियशब्दयोरर्थोनरुक्तप्रतिपादनात्प्राणस्य निर्विषयत्वेनेंद्रियत्वसंशयायोगा
दिंद्रलिंगत्वेन संशये देहादावपि संशयसंगात्रिर्वीतमधिकरणद्वयकल्पनमिति दिक् एवं नवि
षदश्रुतेरित्यारभ्य भूतानां त्वाद्यव्यापारभूतोत्पत्तिविषयश्रुतिविरोधो निरस्तः इदानीं संसादकव्या
पारभूतोत्पादनाविषयश्रुतिविरोधो निरस्यते तत्रात्रिवृत्कृतभूतोत्पादनं परमेश्वर एवेति श्रुति
श्रुतिः पौकभवगानं त्रिवृत्कृतभौतिकोत्पादने श्रुतिविप्रतिपत्तिर्दृश्यते तथाहि सदात्मकाद्ब्र
क्षणस्तेजोवन्नानां परोक्षत्वेन देवतापदयोग्यानां मृषिमक्त्वाऽदुपदिश्यते सेयं देवतैक्षत हंताहमि
मास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमे

कैकां करवाणीति सा सदुक्ताख्या देवता सर्वमोक्षणं कृत्वा व्यवहारायोग्यसूक्ष्मभूतान्प्रत्यादुपित्वा तेन व्य
वहारालाभाद्व्यवहारयोग्यभौतिकोत्पादनार्थं पुनरैक्षत तदीक्षणप्रकारमाह हंतेत्यादिकरवाणीत्यंत
मनेनेतिपदात्सर्वव्यवहारापेक्षायामिति शेषः तत्र संशयः किं जीवकर्तृकं विचित्रकृतभौतिकोत्पा
दनं उत परदेवताकर्तृकमिति संगतिस्तु पूर्वं नामरूपभेदात्प्राणेंद्रिययोर्भेद उक्तः तत्प्रसंगेन नाम
रूपव्याकरणं किं कर्तृकमिति विचार्यत इति प्रसंगलक्षणा वा स्या तत्र लोके चारेणापरसैन्यं प्रवि
श्य संकलयानीत्यादौ न राज्ञः साक्षात्संकलनकर्तृत्वं किं तु चारस्यैवेति यथा तद्वदनेन जीवेनेति वि
शेषणाज्जीवकर्तृकमेव भौतिकोत्पादनमिति भवत्यस्य वाक्यस्याकाशो ह वै नाम नामरूपयोर्निर्वहि
तेतिवाक्येन विरोध इति प्राप्ते ब्रूमः संज्ञामूर्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात् २० तुशब्देन जीवक
र्तृत्वनिरासः त्रिवृत्कुर्वतः परमेश्वरस्यैव संज्ञामूर्तिकॢप्तिः नामरूपव्याकरणं कार्यं भवितुमर्हति क
स्मात् सेयं देवतेत्युपक्रम्य व्याकरवाणीति व्याकरणस्य परदेवताकर्तृत्वोपदेशात् न चानेन जीवेने
ति विशेषणाज्जीवकर्तृत्वं मेरुसमुद्रादिनामरूपव्याकरणे सामर्थ्याभावरूपलिंगसहकृतन सन्नि
धेर्बलीयस्त्वेनानेन जीवेनेत्यस्य सन्निहितान्प्रविश्येत्यनेन संबंधात् अनेन जीवेनेत्यस्य गुणभूतस्य
व्याकरवाणीत्यनेन प्रधानेनान्वययोग्यताल्लक्षणलिंगस्योक्तसन्निध्यपेक्षया दुर्बलत्वात् तस्मात्स
र्वेश्वरकर्तृकमेव नामरूपव्याकरणमित्यविरोध इति सिद्धम् २० एवं यद्विज्ञानमिवाभूदित्ये

४१

ब्र॰सू॰वृ॰
४१

तासामेव देवतानां समानरेतस्त्वं तेन स्यात्‌ सिद्धं येन तेजोबन्नानां त्रिवृत्करणे मुक्ता इमास्तिस्रो देवताः पु
रुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवतीति तदिदानीमाचार्यो यथाश्रुतं दर्शयति मांसादि भौमं यथाशब्द
मितरयोश्च २१ अविज्ञातं विशेषरूपेण दृष्टमिवाभूदिति यतस्तस्मात्तासां तिसृणां देवतानां समा
सः समुदाय इति यावदित्यर्थः इमास्तिस्रस्त्रिवृत्कृता देवताः पुरुषं शरीरं प्राप्य त्रिवृत्कार्य
त्रयरूपेणैकैकदेवतात्मत्वादिलक्षणा वर्तन इति द्वितीयश्रुत्यर्थः तथाहि पृथिव्याव्रीहियवादि
रूपायाः पुरुषेणाशितायाः कार्यत्रयशरीरे वर्तते पुरीषमांसमनश्चेति एवं पीतानामपां मूत्रं लो
हितं प्राणश्चेति कार्यत्रयं तेजसो ग्न्यादिदीपकस्य घृतादिरूपस्य कार्यत्रयं अस्थिमज्जावाक्‌ चेति॥
प्राणस्य जलाधीनस्थितिकत्वमात्रेण जलकार्यत्वव्यपदेशः तस्य वायुकार्यत्वप्रसिद्धेः एवं मनसो
प्यन्नभक्षणे स्वस्थामात्रेण तत्कार्यत्वं वाचोपि ज्ञानानुकूलत्वसाम्येन तेजःकार्यत्वव्यपदेश इति बोध्यं
एवं देहकार्यत्रयरूपेण वर्तनमेवाध्यात्मिकं त्रिवृत्करणमिति तदिदमाह सूत्रकारः मांसादीति भू
मेरन्नात्मिकायाः कार्यं भौमं मांसादि आदिपदेन पुरीषमनसी गृह्यते एवमितरयोरप्तेजसोः का
र्यत्रयं यथाशब्दमवगन्तव्यमित्यर्थः २१ एवमनेन सूत्रेण त्रिवृत्करणमेतदधिकरणविषयः
दर्शितः तत्रेयं शंका भवति ननु सर्वेषां त्रिवृत्करणे विशेषाभावादियं पृथिवी इमा आप इदं तेजः
इत्यसाधारणव्यवहारः कथं संगच्छते कथं वाध्यात्मिकव्यवहार इदं मांसादि पृथिवीका

४१ शि॰

यत्रूदं च जलस्येति तत्राह वैशेष्यात्तु तद्वादस्तद्वादः २२ तत्कृकानिरासार्थः सर्वेषां पृथिव्यादी
नां त्रिवृत्करणाविशेषेऽपि वैशेष्यात् स्वभागाधिक्यात्तद्वादः पृथिव्यादिवादः संगच्छन्त इत्यर्थः अ
भ्यासोऽध्यायपरिसमाप्त्यर्थः तस्मात्सिद्धः श्रुतीनां अविरुद्धानां ब्रह्मणि समन्वयः २२ इति श्री
॥ परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदगोविंदश्रीचरणशिष्यदितश्रीरामकिंकरहरिदेवा
श्रमजी ॥ ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां द्वितीयस्याध्यायस्य चतुर्थः पादः ४॥
पूर्वस्मिन्पादे जीवोपकरणानां समाप्तं अध्याये द्वितीयाध्यायः २ ॥ ॥ ॥
भूतभौतिकानि ब्रह्मणो जायंत इत्युक्तं तदुपजीव्य तदुपहितस्य जीवस्य संसारप्रकारं वैराग्या
र्थं निरूपयितुं देहांतरारंभे भूतसूक्ष्मसंपरिष्वक्तस्यैव लोकांतरगमनमित्याह तदंतरप्रतिपत्तौ
रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् १ पूर्वस्मिन्नध्याये ब्रह्मणि समन्वयस्य स्मृतिन्यायश्रु
तिविरोधेति निरासेनानेष्यवसायलक्षणप्रामाण्यनिरासेनात्तयो विचारो भवतीत्यनयोर।
ध्याययोर्हेतुहेतुमद्भावः संगतिः अत्र प्रथमपादे जीवस्य परलोकगमनागमनविचारे
ण वैराग्यं निरूप्यते तस्माज्जुगुप्सेतेति श्रुतेः द्वितीयपादे त्वंपदार्थतत्पदार्थयोः परिशोध
नं क्रियते तृतीयपादे सगुणविद्यासु गुणोपसंहारः चतुर्थपादे निर्गुणब्रह्मज्ञानबहिरंगाणि।
यज्ञाश्रमादीनि च निरूप्यंते अत्र श्लोकः तृतीये विरतिस्त्वंपदार्थपरिशोधनं गुणोपसं

१अंतरंगाणि शमादीनि१

स्यतिर्ज्ञानबहिरंगादिसाधनमिति तथा च तत्तद्विचारात्मकत्वेन तत्तदधिकरणानां तत्तत्पादसंगतिर्बोध्या
तत्र जीवो मुख्यप्राणेंद्रियसहकृतो मूलाविद्याधर्मापूर्वभूमजन्मसंस्कारात्मपूर्वप्रज्ञासंहितः पूर्वदेहं
विहाय देहांतरं गच्छतीति स्मृतिसिद्धं तादृशो जीवः किं देहांतरारंभकैः पंचीकृतभूतभागैरेतद्देह
वन्मुख्यप्राणादीनामाधारभूतैरसंपरिष्वक्तो गच्छत्युत संपरिष्वक्त इति संदेहे मानाभावादसंपरि
ष्वक्तो गच्छतीति पूर्वपक्षः यथा च निराधारप्राणादिगमनासंभवान्न वैराग्यमिति फले सिद्धांते तत
तसंवाहे वैराग्यमिति बोध्यं तत्रायं सिद्धांतः तदंतरप्रतिपत्तौ देहांतरप्रतिपत्तौ तदारंभकभूतैः संप
रिष्वक्तो रंहति गच्छति कुतः प्रश्ननिरूपणाभ्यां तथा हि द्युलोकपृथिवीपर्जन्यपुरुषयोषित्सु पंचस्व
ग्निदृष्ट्योपासनारूपायां चाग्निविद्यायां प्रश्नो वै प्रवाहणाख्यस्य राज्ञः सभां प्रविष्टं श्वेतकेतुं राजा पप्रच्छ
वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवंतीति अयमर्थः अस्मिन्लोके जलमयं दधिप
यः प्रभृतिद्रव्यकर्हौमे श्रद्धापूर्वकृते तद्धुतजलं यजमानं प्राप्य तद्वारा द्युलोकाख्याग्निं गच्छत् श्रद्धा
ख्यामाहुतित्वमापन्नं यजमानेंद्रियाधिष्ठातृदेवास्मिन्नग्नौ जुहुति तच्च श्रद्धाजलं सोमाख्यदेहात्मना
परिणमते स च जलमयो देहः पर्जन्याग्नौ वृष्ट्यभिमानिदेवविशेषैर्हुतः सन्वृष्टिर्भवति तदेव ज
लं सोमाख्यदेहभावं वृष्टिभावं चापन्नं पृथिव्यामग्नौ देवैः हुतं सत् व्रीहियवाद्यन्नभावमाप्नोति तास्मात्त्व।
भावमापन्नास्त्वापः पुरुषाग्नौ हुताः सत्यो रेतोभावमापुर्वंति ताश्च रेतोभावमापन्नाः पंचमाहुति

ह्याश्रापोयोषिदग्नौहुताः गर्भात्मनावस्थिताः पुरुषाइति संज्ञालभंतइतिपुरुषवचस्त्वमपामिति
वक्तुगतिः तांवक्तुगतिंजानंनेव राजापंचम्यामाहुतौहुतायांयथापुरुषशब्दवाच्याम्नायः पुरुषा
कारेणमत्ते तथाकिंवेवेत्थेति पंप्रच्छ एवंपृष्टः श्वेतकेतुःपितरंगौतममागत्योवाच एवमहंरा
ज्ञापृष्टोस्मितस्योत्तरंनजानामीति सचगौतमः स्वयमप्यजः सनिराजसमीपंगत्वातांविद्यांदे
हीत्युवाच एवमुक्तः स राजागौतमंप्रतिनिरूपणं पंचाग्निविद्योपदेशस्तत्रचायंपुरुषवचस्त्वप्र
कारः स्फुटीकृतः एवंप्रश्ननिरूपणाभ्यांमवादिभूतसंपरिष्वक्तोरंहतीतिगम्यते १ ननुप्रश्न
निरूपणाभ्यामद्भिः परिष्वक्तोगच्छतीतिगम्यते तथाचकथमवितरभूतपरिष्वंगतिहि तत्राह ॥
त्र्यात्मकत्वात्तुभूयस्त्वात् २ तुशब्दश्चोद्यनिरासार्थः अपांत्रिवृत्करणश्रुत्यात्र्यात्मकत्वाद्देहस्य
यजमानद्वारानिर्गताज्जन्यत्वेसिद्धेइतरभूतहयजन्यत्वंतत्परिष्वंगश्चसिध्यति यद्वावातपित्त
श्लेष्माभिस्त्रिभिः शरीरस्यत्र्यात्मकत्वाज्जलमात्रजन्यत्वेनसंभवति वातपित्तयोर्वायुतेजः कार्यत्वा
त् तथाचावितरभूतचतुष्टयजन्यत्वमिपिंगोधर्मः दृष्टाकप्राणावकाशानांपंचभूतकार्याणांद
र्शनात् तर्हिअतीवयप्ग्रहणंकाथं तत्राह भूयस्त्वादितियद्यपिदेहेपृथिवीभूयस्त्वमेवतथापिते
जआद्यापेक्षयाऽपांभूयस्त्वंबोध्यं २ प्राणगतेश्चप्राणानांमुख्यप्राणचक्षुरादीनांजीवदशायांदे
हात्मनावस्थितभूताश्रितानांगमनदर्शनात् तमुत्क्रामंतंप्राणोनूत्क्रामति प्राणमनूत्क्रामंतंस

वै प्राणा अनूत्क्रामंतीति श्रुतेर्मरणकाले प्राणानां गतिश्रवणान्नूनमाश्रिता एव प्राणा गच्छंती
ति वक्तव्यं तथा च भूतसंपरिष्वक्तस्य रंहणमित्यर्थः ३ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्
४ ननु यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यमित्यादिना वागादीनां प्राणा
नामग्न्यादिषु देवेषु गतेर्लयस्य श्रवणात्तेषां लोकांतरप्रतिगतिः यथा भूतसंपरिष्वंगसिद्धिः स्या
दिति चेन्न प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीति श्रुतिविरोधेन यत्रास्येत्यादिश्रुतेरोषधीर्लोमा
नि वनस्पतीन्केशा इति सहपाठेन भाक्तत्वावगमात् नहि मृतस्य लोमानि केशाश्च प्रत्यक्षेण दृश्य
मानाओषधिवनस्पतिषु लयं गच्छंतो दृश्यंते अतस्तत्सहपाठादग्न्यादिषु वागादिलयश्रुतौ औपचारिक
इत्यर्थः ४ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ५ ननु द्युलोकादिषु पंचाग्निष्वपामाहुति
त्वे सिद्धे पंचम्यामाहुतावपां पुरुषत्वप्रकारो तिश्चेतुं शक्यते तदेव नास्ति प्रथमे द्युलोकाख्याना
वपामाहुतित्वस्याश्रवणात् किंतु तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति प्रथमाग्नौ श्रद्धैवाहुतित्वेन
श्रूयते इति चेन्न हि यतस्ता एवापः श्रद्धाशब्देनोच्यंते कुतः उपपत्तेः अपां हि होमद्रव्यत्वेनाहुतित्वं
संभवति मनोवृत्तिविशेषरूपश्रद्धाया मनसः सकाशात्पृथक्कृत्य होमायोपादातुं न शक्यते तदा
हुतिजन्यसोमाख्यशरीरादेरश्रद्धाहुत्यानुपपत्तिश्च तस्माच्छ्रद्धापूर्वकमस्मिंल्लोकेऽबहुलदधिपयः
प्रभृति द्रव्यस्य हुतस्य द्युलोकाग्नौ श्रद्धाहुतित्वेन पर्यवसानादप्सु श्रद्धाशब्दो लाक्षणिक इत्यर्थः आ

यो हास्मै श्रद्धां सत्रमं ते पुण्यकर्मण इति श्रुतावया श्रद्धाजनकत्वे श्रवणात्तेन संवेद्येन वा अस्मत्क
शाहस्य लक्षणाश्चास्मै पुंसः श्रायो दर्शनमात्रेण स्नानादि पुण्यकर्मसिद्ध्यर्थं: स्रद्धां सत्रमं ते जन
यंतीति श्रुत्यर्थ: ५ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ६ ननु भवतु मा मरूप्यादिक्रमे
ण पंचम्याहुतावपां पुरुषवचस्त्वप्रकारः तथाप्यवादिभूतपरिष्वक्तो जीवो रंहतीत्ययुक्तमेव
श्रवादिवज्जीवस्य रंहणकर्तृत्वस्याश्रुतत्वादिति चेन्न इष्टादिकारिणां प्रतीतेः अथ य इमे ग्राम
इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीत्यादिना गार्हस्थ्ये स्थित्वा इष्टादिकर्मकारिणां धू
मादिमार्गेण चंद्रलोकप्राप्तिमुक्त्वा तानिष्टादिकारिणः चंद्रलोकस्थान्सोमराजशब्देन निर्दिशति
एष सोमराजेति इहापि यं वाग्निविद्यायां तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सो
मो राजा संभवतीति सोमराजशब्दश्रवणात्त एवेष्टादिकारिणः प्रतीयंते अतो भूतसंपरिष्वक्तजी
वानां रंहणमित्यर्थः ६ न चेष्टादिकारिणां भूतपरिष्वक्तानां चंद्रलोकं प्रति रंहणे कर्मफ
लभोगाय येन तदसंगतं ते ते चंद्रं प्राप्यान्नं भवंति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षी
यस्वेत्येवमेनांस्तत्र भक्षयंतीति श्रुतौ चंद्रलोकं गतानां नेष्टादिकारिणामन्नत्वेन भक्ष्यत्व
श्रवणात् यथा यज्ञे सोमं राजानं चमसस्थं ऋत्विजः आप्यायस्व पुनः पुनराप्याय्याप्याय्य अप
क्षीयस्व पुनः पुनरपक्षय्याप्याय इत्य भक्षयंत्येवमेनान् कर्मिणो देवा भक्षयंतीति श्रुत्यर्थः तत्रो

वे॰ सू॰ वृ॰ 44
४४

तस्मादाह भाक्तं वानात्मवित्वात्तथाहि दर्शयति ७ वाशब्दश्चोदितदोषनिरासार्थः तेषामिष्टादि
कारिणामन्नत्वं भाक्तमेव नामुख्यं अन्यथा स्वर्गकामो यजेतेति श्रुतिबाधप्रसंगात् अतः कर्मि
णां देवान्प्रति पुत्रभाववद्देवभोगोपकरणत्वमात्रेणान्नत्वव्यपदेशः कर्मिणामनात्मवित्वात् देवा
न्प्रति गुणभावेन भोग्यत्वं तथाहि श्रुतिरनात्मविदो देवभोग्यत्वं दर्शयति अथ योन्यां देवतामु
पास्तेन्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानामिति भेददृष्टिरनात्मवित्वात्पशु
वद्देवानामुपकरोति इष्टादिदानेनेति देवभोग्यत्वश्रुतितात्पर्यं यद्वा अनात्मवित्वादित्या
दिसूत्रभागस्यायमर्थः पंचाग्निविद्याविदत्रात्मवित्त्वेनोच्यते तथाचात्मवित् पंचाग्निविद्या
वित् सन्नभवतीत्यनात्मवित् तस्य भावस्तत्त्वं तस्मादित्यर्थः केवलेष्टादिकारिणां पंचाग्निवि
द्यानभिज्ञानां देवान्प्रत्यन्नभावेन भोग्यत्वं पंचाग्निविद्याप्रशंसार्थं गौणमेव श्रुतावुक्तमिति भा
वः ननु तत्र तस्य मुख्यत्वेपि प्रशंसा भवतीत्यत आह तथाहीति यथात्र तस्य गौणत्वं तथाहि
श्रुतिर्दर्शयति स सोमलोके विभूतिमनुभूय पुनरावर्तते इति तस्येष्टादिकारिणः सोमलोके
विभूत्यनुभवोन्नत्वस्य मुख्यत्वेन संभवति तस्मादन्नत्वस्य गौणत्वात्परलोकभोगार्थं भूतसंप
रिष्वक्तस्य रंहणमिति सिद्धम् ७ कृतात्ययेनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं
च ८ एवं कर्मसमवेतानामपां पंचमाहुतौ पुरुषात्मना परिणाम उपवर्णिते तमाश्रित्यावा।

दिभूतपरिवेष्टितस्य जीवस्य रंहणमुक्तं तदुपयुक्तं स्वर्गादवरोहितो जीवानां कर्माभावे तत्समवेतायाम
प्यभावादित्यापेदुः संगतिः पूर्वपदे चंद्रलोकभोगानंतरं तस्मादवरोहतां कर्माभावेन तदनुगुणति
र्यगादियोनिप्राप्त्यभावात्कर्मफलेषु वैराग्यमिति फले सिद्धांते कर्मणः सत्वाद्वैराग्यमिति विवेकः ए
वं हि स्वर्गादवरोहणं श्रूयते तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंत इत्यारभ्य रम
णीयचरणा रमणीयां योनिमापद्येरन् कपूयचरणाः कपूयां योनिमिति तस्मिंश्चंद्रलोके यावान्क्षय
कर्मोषित्वा भोक्तव्यकर्मसमाप्त्यनंतरमेवावरोहणमध्वानमाकाध्वानमाकाशवायुधूमाभ्रादिरूपप्र
तिपद्य नरा गच्छंति ते चांतरेतरे रमणीयचरणाः पुण्यकर्माणो ब्राह्मणादिपुण्ययोनिं प्रविशंति कपू
यचरणाः कुत्सितकर्माणस्तिर्यगादियोनौ जायंत इति तत्र संशयः किं स्वर्गादवरोहंतः सानुशयाः
उत निरनुशया इति अत्र शयशब्देनामुष्मिकफलप्रापककर्मातिरिक्तकर्मोच्यते तत्र यावत्संपा
तमुषित्वेति सर्वकर्मनाशानंतरमवरोहणश्रवणान्निरनुशया एवावरोहंतीति प्राप्ते ब्रूमः कृतस्य
स्वर्गसुखप्रापककर्मजातभोगेनात्ययेनाशेऽत्र नुशयवानवरोहति कुतः दृष्टस्मृतिभ्यां तथाहि दृ
ष्टं हि प्रत्यक्षा श्रुतिः तद्य इह रमणीयचरणाः अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मण
योनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्ये
रन् श्वयोनिं वा सूकरयोनिं वा चांडालयोनिं वेति तेषां कर्मिणां मध्ये ये केचिदिह कर्मभूमौ पुण्यं कृत

वंतस्ते स्वर्गादवरोहंतो रमणीयां ब्राह्मणादियोनिमापद्येरन् इति यत्तदभ्याशो हयदित्प्रेरितिन्त्रवपमेवेत्यर्थः ॥
योनिशब्दः स्थानवचनः शरीरंकृते यद्वालोके जन्म नैव प्रतिप्राप्य एवावदमथ्यमरूपभोगोद्दिष्टः स
वनिरनुशयानामवरोहांगीकारे आकस्मिक एव स्यादिति सूत्रस्य द्दृष्टशब्दार्थः स्मृतिरपि वर्णाश्रा
श्रमाश्च स्वर्गकर्मनिष्ठिताः प्रत्यकर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुः श्रुत
वित्तवृत्तसुखमेधसो जन्म प्रतिपद्यंत इति सानुशयानामेवावरोहणं दर्शयति वर्णविर्णिनः आश्र
माश्रमिणः प्रेत्य अस्माल्लोकात् अमुष्याय चंद्रलोकमधिरुह्येत्यर्थः ततः शेषेण भुक्तफलाद
न्येन कर्मणानुशयाख्येन जन्म प्रतिपद्यंत इति संबंधः कृतं ज्ञानं वृत्तमाचारः देशादयो विशिष्टा
येषां ते तथोक्ता इति यत्तु यावत्संपातमुषित्वेति सकलनाशानंतरं श्रवणमिति तन्न यावत्सुदृस्व
र्गे भोक्तव्या शेषकर्मपरत्वेन सकलकर्मपरत्वाभावादिति तस्मात्सिद्धं सानुशयानामवरोहणं ते च
कर्मिणः येन मार्गेण चंद्रलोकमारूढास्तेनैव मार्गेणावरोहंति उत मार्गविशेषेण वेति सूत्रे उत्तर
माह यथेतमनेवं चेति धूमाकाशयोरवावरोहणमार्गे श्रुतत्वाद्यथेतं यथा
गतमवरोहंतीति गम्यते सर्वश्रुतानां रात्र्यादीनामश्रवणादभ्रादिकश्रवणाच्चानेवं पूर्वमा
र्गविपरीतमार्गेणावरोहंति न यथाकृतसर्वमार्गेणेत्यर्थः ८ चरणादिति चेन्नोपलक्षणार्थेति
कार्ष्णाजिनिः ९ तेन रमणीयचरणाः रमणीयां योनिमापद्यंत इति श्रुतिचलात्सानुशयानाम

शि॰ ४५

वरोहणमित्येतदसंगतं तस्यां श्रुतौ चरणाद्योन्यापत्तिश्रवणात् चरणस्याचारात्मकस्य कर्मणोनुश
याद्भिन्नत्वादिति चेन्नायं दोषः यतः कार्ष्णाजिनिराचार्य इयं चरणश्रुतिरनुशयोपलक्षणार्थेति म
न्यते ९ आनर्थक्यमिति चेन्न तदपेक्षत्वात् १० ननु चरणश्रुतिरनुशयोपलक्षणार्थेत्यसंगतं
चरणस्यैव सदाचारदुराचारात्मकस्य सदसद्योनिप्रापकत्वसंभवात् अन्यथा कर्मणः एवानुश
यांशस्य सदसद्योनिप्रापकत्वे चरणस्यानर्थक्यं स्यादिति चेन्न इष्टादिकर्मणां चरणाचारनिर्व
र्त्यत्वेन चरणापेक्षत्वान्न चरणस्यार्थवत्वादित्यर्थः १० वस्तुतः कर्मचरणयोर्नभेद इत्याह सुकृतदुः
कृते एवेति तु बादरिः ११ बादरिस्त्वाचार्यः सुकृतदुःकृते एव चरणशब्देनोच्येते इति मन्यते लोके दृ
रि ष्टौ कारिणि धर्मं चरत्येष महात्मेति कर्मचरणयोरभेदेन प्रयोगदर्शनादित्यर्थः तस्मादिष्टादिकारिणां चं
द्रलोकं गतानां पुनरवरोहणे अनुशयोस्तीति सिद्धं ११ एवमिष्टादिकारिणां गतिं विचार्य तेभ्यो निकृष्टानां
मनिष्टादिकारिणां गत्यागती विचारयितुमिष्टादिकारिण एव चंद्रलोकं गच्छंतीत्येतदाक्षिपति अनिष्टा
दिकारिणामपि च श्रुतं १२ अत्र पापिनोऽशुभमार्गेण गमनमपि नास्तीति सिद्धांतोक्त्या वैराग्यदृढी
करणमादसंगतिः पूर्वपदे इष्टानिष्टाकारिणामविशेषेण चंद्रलोकगते रिष्टादिकरणं व्यर्थमिति फ
ले सिद्धांते पापिनां चंद्रलोकगत्यभावात् दृष्टं यज्ञादिकरणं सार्थकमिति विवेकः अत्र पापिनां चंद्रलोक
गतिरस्ति न वेति संदेह अस्तीत्याह अनिष्टेति इष्टादिकारिणामिवानिष्टादिकारिणामपि चंद्रलोक

गमनं ये वै के चास्माल्लोकात् प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति श्रुत्या श्रुते अतो धर्मिण एव चंद्रलो
कं गच्छंतीत्येतद्संगतमित्यर्थः १२ ननु धर्मिणामधर्मिणां च चंद्रलोकगमनं पापिनां नरकप्राप्ति बो
धकशास्त्रविरुद्धमिति चेन्न पापिनां चंद्रलोकगमनांगीकारेपि तत्र भोगानंगीकारात् किंतु चंद्र
लोकगमनमात्रं कृत्वा ततोवरोहणं पापिनां नरके एवानुभव इति प्राप्त श्रुते संयमानेत्वनुभूयेतरे
षामारोहावरोहौ तद्गतिदर्शनात् १३ नः एवं पक्षनिरासार्थः भोगार्थं हि चंद्रलोकगमनं तत्र
पापिनो भोगासंभवात्तद्गमनं व्यर्थमेव अतश्चंद्रमसमेव ते गच्छंतीति श्रुतिरिष्टादिकारितात्रवि
षया सर्वे गच्छंतीति न एव चंद्रलोकं गच्छंति पापिनस्तु यमलोकमारुह्य संयमने यमालये स्वपापा
नुरूपा यामीर्यातनाः अनुभूय पुनरिमं लोकं प्रत्यवरोहंतीत्येवं भूतावेवेतरेषां पापानामारोहावरो
हो भवतः कुतः तद्गतिदर्शनात् यमलोकगतेः श्रुतौ दर्शनादित्यर्थः न सांपरायः प्रतिभाति
बालं प्रमाद्यंतं वित्तमोहेन मूढं अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे इति वैव
स्वतेः संगमनं जनानामित्यादिकं पापिनां यमलोकगतौ लिंगं सम्यगवगम्यं भावेनयरः परस्मादेह
पातादूर्ध्वमयते गम्यते इति व्युत्पत्त्या सांपरायः परलोकः तत्साधनभूतकर्मविशेषः सांपरायः स
बालमविवेकिनं विशेषतो चित्तनिमित्तेन मोहेन मूढं छन्नदृष्टिं अतएव प्रमाद्यंतं प्रमादं विषया
सक्तिं कुर्वंतं प्रति न भाति समर्थ बालो न केवलमज्ञ एव किंतु विपरीतदर्शी यतोऽयमेव लोकोऽन्नपानादि

रत्निनयरइतिमननशीलस्तस्मात्तदनरूपंपापमाचरन्तुनः पुनर्जन्ममरणप्राप्तामेमन्वशमा
पयतइतिमन्त्रोनचकेनसंप्रतिवचन जनानांपरलोकंगतानांपापिनांसंगमनंसम्पगाम्यैवैवस्वतंय
मंराजानंहविषाप्रीणयतेत्यर्थः १३ स्मरंनिच १४ मन्वादयःशिष्टाःपापिनोनरकभोगंस्मरंति॥
अतश्चधर्मिणामेवचंद्रलोकगमनंनान्येषामित्यर्थः १४ अपिचसप्त १५ अपिचसप्तरौरवाद्यो
नरकाःपापफलभूमित्वेनस्मर्यंतेपौराणिकैः तान्पापिनः प्राप्नुवंतीतिनचेद्दुप्राप्तिरितिभावः
१५ ननुपापिनोयमसंबंधिनांपातनांत्र्यनभवतीति यदुक्तं तदसंगतं रौरवादिविषचित्रगुप्ता
दीनांमधिष्ठातृत्वश्रवणादित्यतआह तत्रापिचतद्व्यापाराद्विरोधः १६ तत्रापिरौरवादिषुतस्यै
वयमस्याधिष्ठातृव्यापाराद्विरोधः चित्रगुप्तादीनांयमप्रयुक्तत्वादितिभावः १६ उपासकाना
मर्चिरादिमार्गः केवलकर्मिणांधूमादिमार्गइति श्रुतिस्मृत्यादिषुव्यवस्था तथाचैतन्मार्गद्वय
भ्रष्टानांपापिनांतृतीयमार्गोक्तेरपिनतेषांचंद्रप्राप्तिरित्याह विद्याकर्मणोरितितुप्रकृतत्वात् १७
पंचाग्निविद्यायांप्रवाहणाख्येनराज्ञाम्स्तैर्जनैः वहुभिर्मुद्रलोकः कथंनसंपूर्यतेतत्प्रकारंत्वं
किंजानासीतिश्वेतकेतुःपृष्टः तस्यफलस्यश्वेतकेतुपितरंगौतमंप्रतिराज्ञएव प्रतिवचनेश्रू
यते अथैतयोःपथोर्नकतरेणचनतानीमानिक्षुद्राण्य सकृदावर्तीनिभूतानिभवंतिजायस्व
म्रियस्वेत्येतत्तृतीयंस्थानंतेनासौलोकोनसंपूर्यतइति अथैतयोरितियदस्यार्थमाहसूत्रकारः

47

वे॰ सू॰ वृ॰
४०

विद्याकर्मणोरितीति अर्थ इति शेषः कुतः विद्याकर्मणोरेव देवयानपितृयाणात्मकमार्ग
द्वयसाधनत्वेन प्रकृतत्वात् प्रकृतवाचकत्वेमेतच्छब्दस्य युक्तमित्यर्थः एतदुक्तं भवति एत
यो विद्याकर्मणोः ययोर्मार्गसाधनयोरन्यतरेण मार्गसाधनेन विद्यया कर्मणा वान्यतरस्मिन्न
धिनाधिकृताः पापिनस्तेषां क्षुद्रजंतुलक्षणो सकृदावर्तीजन्ममरणवाहुल्ययुक्तस्तृतीयः
पंथा इति न चंद्रप्राप्तिरिति श्रुतौ जायस्व म्रियस्वेत्यनेन जन्ममरणवाहुल्ययुक्तं स्थानं शब्दोमा
र्गशब्दयोयुक्तमानेरोयात् तृतीयं मार्गं लक्षयति एवं च शब्देन चंद्रमसमेव न ते सर्वे गच्छंतीति
श्रुतिप्रयुक्तशंकानिरासकृतः सर्वशब्दस्य पुण्यमात्रपुरुषपरत्वादिति भावः १७ ननु पापि
नामस्मिंल्लोके देहप्राप्त्यर्थं चंद्रलोकगमनमंगीकर्तव्यं पंचम्यामाहुतावापः पुरुषवचसो भवंती
त्याहुति संख्यानियमेन देहप्राप्त्यभिधानात् अन्यथा संख्यानियमाभावप्रसंगः इत्यत आह न तृ
तीये तथोपलब्धेः १८ तृतीये मार्गे प्रविष्टानां पापिनां देहप्राप्त्यर्थमाहुतिसंख्यानियमो न कर्तव्यः कु
तः तथोपलब्धेः संख्यानियमं विनैव जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति श्रुतौ तृतीयमार्गे देहप्रा
प्तेरुपलब्धेरित्यर्थः इष्टादिकारिणामेवायं संख्यानियम इति भावः किंच पंचम्यामाहुतावापः पुरु
षवचसो भवंतीति पंचम्यामाहुतावपां पुरुषवचस्त्वं प्रतिपाद्यते नापंचम्यामाहुतौ पुरुषवचस्त्व
निषिध्यते वाक्यभेदप्रसंगात् तथा च येचंद्रगतास्तेषां संख्यानियमः इतरेषां तु विनैव संख्यानिय

४७

मेभूतां नरप्रविष्टाभिरद्भिर्देहस्यारभ्यत इत्यनियमः १८ स्मर्यतेऽपि च लोके १९ अपि च लोके
भारतादौ द्रोणधृष्टद्युम्नादीनां सीताद्रौपद्यादीनां चायोनिजत्वं स्मर्यते तत्र द्रोणादीनां योषि
दाहुतिरेका नास्ति धृष्टद्युम्नादीनां योषित्पुरुषविविषये द्वे अप्याहुती न स्तः इत्याहुतिसंख्या
यामनियमः एवमन्यत्रापीति भावः १९ दर्शनाच्च २० किंच लोके जरायुजाण्डजस्वेद-
जोद्भिज्जेषु चतुर्विधे देहेषु स्वेदजोद्भिज्जयोः स्त्रीपुंसव्यवायोगविनैवोत्पत्तिदर्शनात् आहुति
संख्यानियम इत्यर्थः जरायुजं मनुष्यादिशरीरं अण्डजं पक्ष्यादिकं स्वेदजं यूकादिकं उद्भि
ज्जं वृक्षादिकं २० ननु तेषां खल्वेषां भूतानां त्रीण्येव भूतानि भवन्त्यण्डजं जीवजमुद्भिज्जमि
ति त्रिविधं शरीरत्रैविध्यं श्रूयते अतः कथं चातुर्विध्यमत आह तृतीयशब्दावरोधः संशोक
जस्य २१ अण्डजं जीवजमुद्भिज्जमित्यत्र तृतीयेनोद्भिज्जशब्देन अवरोधः संग्रहः सं
शोकजस्य स्वेदजस्य यूकादिकं हि पृथिवीमुद्भिद्य जायते स्वेदजं तु जलमुद्भिद्येत्युभयोरव
यवार्थत्वाविशेषादुद्भिज्जपदेन संग्रहः अतो नैतावता चातुर्विध्यहानिर्भवति स्था
वरजंगमात्मकत्वेनोभयोर्भेदस्य तु रूपद्रवतादिति भावः तस्मादनिष्टादिकारिणां न चन्द्रलो
कप्राप्तिः किंत्विष्टादिकारिणामेवेति सिद्धं २१ तत्स्वाभाव्यापत्तिरुपपत्तेः २२ एवमिष्टादिका
रिणश्चंद्रगताः कर्मफलभोगानंतरं सानुशयाः अवरोहंतीत्युक्तम् अत्र तेषामवरोहप्रकार

ष्ठित्यते तत्रावरोहश्रुतिः पठ्यते अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशाद्वायुं वायुर्भूत्वा धू-
मो भवति धूमो भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति अथ भोक्तव्यकर्मसमाप्त्यन-
न्तरं अध्वानमेवाह यथेति यथागतमित्यर्थः इदमुपलक्षणं अनेवमित्यपि द्रष्टव्यं याः खल्वा-
पश्चन्द्रलोके देहमारब्धवत्यः ताः कर्मक्षये द्रुता आकाशं गता तास्तत्समा यथा भवंति तदा तदुपहि-
तास्तत्रशायिनो जीवा अप्याकाशसमा भवंतीत्याह आकाशमिति एवं वाय्वादावपि योजनीयं
वायुर्भूत्वा वायुसमो भूत्वा एवमग्रेपीति सिद्धांतार्थः पूर्वाधिकरणे जायस्वम्रियस्वेति तृतीयं स्थानं
मित्युत्तरस्थानप्राप्तस्य मार्गद्वयोपक्रमस्य मध्ये तृतीयमार्गलक्षितत्वमुक्तं तदुक्तं इमौ द्वौ ब्राह्म-
णादुपक्रम्याधस्तनीयद्वयाद्भिन्नतृतीयस्योपक्रांतस्य जातीयस्यैव दर्शनात् इह तु भवती कृते
मुख्यार्थपरित्यागे मानाभाव इति प्रत्युदाहरणसंगतिः पूर्वपक्षे भवति कृतेर्मुख्यत्वसिद्धिः फलं
सिद्धांते गौणत्वसिद्धिरिति विवेकः तत्र संशयः किं स्वर्गादवरोहंतो जीवा आकाशादिस्वरूपंप्र-
तिपद्यंते उत तत्साम्यमिति तत्र भवति कृतेर्मुख्यत्वानुरोधादाकाशादिभावापत्तिरेव जीवानामिति
प्राप्ते ब्रूमः जीवानां तेषु आकाशादिभिः साभाव्यापत्तिः साम्यापत्तिरेव कुतः उपपत्तेः लोके जी-
वस्य दधिभावो युक्तः क्षीरकाले तदभावात् इह तु पूर्वविद्यमानाकाशादिभावो जीवस्य दुरुपप-
द्यत्वात् किंच जीवस्याकाशस्वरूपापत्तौ वाय्वादिक्रमेणावरोहाभावप्रसंगः तस्मादित्युक्तिवशा-

द्भवति श्रुतेर्गौणत्वमंगीकर्तव्यमित्याकाशादिसंबंधमात्रमेवजीवानां संबंधश्च सादृश्यापत्तिरित्युक्तो नसं
भवतीति सादृश्यमेवेति सिद्धं २२ एवमाकाशादिषु वर्षान्तेषु पूर्वसादृश्यानंतरमन्तरोत्तरसादृश्य
मित्युक्तं तदुपजीव्य विचार्यते किं जीवः चिरकालमेकसादृश्येनावस्थायापरसादृश्यं गच्छति उता
ल्पकालमिति विशये नियामकशास्त्राभावादनियम इति प्राप्ते सिद्धान्तयति नातिचिरेण विशेषात् २३
जीवो नातिचिरेणात्यल्पमल्पं कालमेवाकाशादिवर्षान्तैः सादृश्येनावस्थाय वर्षधाराद्वारा पृथि
व्यां प्रतिपतति विशेषात् पृथिव्यनन्तरं व्रीह्यादौ प्रवेशमुक्त्वा व्रीह्यादिभ्यो जीवस्य निःसरणमम
ये व्रीह्यादिषु चिरकालावस्थानरूपविशेषं दर्शयितुमाह निःसरणं दर्शयति श्रुतिः अतो वै खलु नि
र्दुष्प्रपतरमिति एकस्तकारो लुप्तः छान्दसप्रक्रियया अतोऽस्माद्व्रीह्यादिभावात् दुर्निष्प्रपतनतरं दुः
खतरं जीवानां निःसरणं भवतीत्यर्थः व्रीह्यादिभ्यो जीवस्य दुःखेन निःसरणं भवतीत्युक्ते आकाशादि
भ्यः सुखेन निःसरणं जातमिति प्रतीयते यथा लोके कश्चित्पंडितोनेकराजसभासंचारं चरित्वा कस्यां
चिद्राजसभायामांदोलिकाप्रतिष्ठामविंदतेत्युक्ते इतरासु सभास्वांदोलिकानलब्धवानिति प्रतीयते
तद्वत् व्रीह्याकाशादिषु सुखदुःखे जीवस्य दीर्घकालावस्थानाल्पकालावस्थाने भवतः तदानीं स्थू
लशरीराभावेन मत्वे सुखदुःखयोरसंभवात् तस्माद्व्रीह्यादिप्रवेशात्पूर्वमल्पमेव कालं तत्तत्सादृ
श्येनावस्थानमिति सिद्धं २३ अन्याधिष्ठिते पूर्ववदभिलापात् २४ तस्मिन्नेवावरोहे जीवानां वर्ष

धारा द्वारा पृथिवीप्रवेशानंतरं पठ्यते इह व्रीहियवा ओषधिवनजन्मश्रुतिमुख्या उत जीवांतराधिष्ठितव्री
ह्यादौ तेषां संसर्गमात्रमिति तत्र पूर्वं दुर्निष्प्रपततरं शाद्वलसूत्रे चोक्तं पुरुविलंबितकालावस्थानलक्ष
कत्वेपि प्रकृते तीरस्तदधिभावेवावादिभूतसंपरिष्वक्तजीवानामानादिद्वारा व्रीह्यादिभावेन मुख्य
स्यैव जन्मनः संभावात् व्रीह्यादिस्थावरशरीरेषु सुखदुःखभाजो नुशयिनो जीवा इति प्राप्ते वादरा
यणो न पूर्वपदे सिद्धांतः अन्यैर्जीवैरधिष्ठिते व्रीह्यादौ संसर्गमात्रमनुशयिनां भवति पूर्ववत् यथा
काशादौ संसर्गमात्रं तद्वत् कुतः पूर्ववदभिलापात् यथाकाशादिषु वर्षांतेषु कर्मपरामर्शं मंत
रेणैव प्रवेशउक्तः एवं व्रीह्यादिष्वपि कर्मपरामर्शं विनैव प्रवेशाभिलापादिन्यर्थं पूर्ववदितिपदे
सूत्रेत्र यथा अभिप्रायेण प्रयुक्तमिति पुनरुपादाय व्याख्यातं तस्मात्कर्मपरामर्शाभावात्र व्रीह्यादि
ष्वनुशयिनां सुखदुःखभोक्तं यत्र त्वनुशयिनां सुखदुःखभाक्तं तत्र कर्मपरामर्शो रमणीयचर
णाइत्यादिना दृश्यते इति जायत इति श्रुतेः संसर्गमात्राभिप्रायत्वमेवेति बोध्यम् २४ अशु
द्धमिति चेन्न शब्दात् २५ ननु ज्योतिष्टोमादिकं कर्म पशुहिंसायोगादशुद्धं तत्कारिणामनुश
यिनां व्रीह्यादिषु स्थावरेषु दुःखानुभवार्थं मुख्यमेव जन्मास्त्विति चेन्न ज्योतिष्टोमादेः शास्त्रविहि
तत्वेन धर्मत्वेनावगतत्वान्न दुःखहेतुत्वमित्यर्थः २५ किंच रेतःसिग्योगोथ २६ अथ व्रीह्यादि
भावानंतरं अनुशयिनां रेतः सिंचतीति रेतःसिक्तद्योगः तद्भावः श्रुतानामाम्नायते यो रेतः

ष्टिं वतितत्त्रूप एव भवतीति अनुशयी व्रीह्यात्मतां पुरुषं विश्य तद्रूपो भवति तद्भावं गच्छतीत्यर्थः
न ह्यत्राच्छादिनो रेतः सिग्भावो मुख्यः संभवति इदानीं पुरुषप्रविष्टस्यैव प्राप्तयौवनत्वात् अ
तस्तत्तद्भावस्तत्संसर्गो वक्तव्यः तथा च व्रीह्यादावपि संसर्ग एव आकाशादावपि संसर्गो वा वग
तत्वेन संदेशन्यायादिति भावः २६ ननु च शायिनां सर्वत्र संसर्गस्यैवांगीकारे ब्राह्मणजन्मका
यिनस्यात् तथा च रमणीया योनिमापद्येरन्निति श्रुतिर्गौणत्वप्रसंग इत्यत आह यो
नेः शारीरं २७ योनौ रेतसि प्रविष्टे ततः शरीरमनुशयिनामनुशयानुरूपकर्मभोगाय जाय
त इत्याह शास्त्रं तद्य इह रमणीयचरणा इत्यादि तस्मात् ब्राह्मणादियोनावेवानुशयिनां ब्रा
ह्मणजन्म न व्रीह्यादिष्विति गत्यागतिविवेककृतं वैराग्यं ज्ञानसाधनमित्यनवद्यं २७ इति

॥ श्रीब्रह्मसूत्रवृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः १ ॥

एवं गत्यागतिनिरूपणेन कर्मफलेभ्यो विरक्तस्य महावाक्यार्थज्ञानाय तत्त्वंपदार्थौ शोध
यितुं पादमारभमाणो गत्यागतिनिरूपणेनैव जाग्रदवस्था निरूपिते त्वमि संध्यायामनतः
स्वयंप्रकाशत्वसिद्धये स्वप्नावस्थां वक्तुं पूर्वपक्षयति संध्ये सृष्टिराह हि १ तथा चानयोः
पादयोर्हेतुहेतुमद्भावः संगतिः सिद्धे विरक्ते अस्य पादस्य प्रवृत्तेः तत्त्वपदार्थयोर्मध्ये
त्वंपदार्थस्यादौ ज्ञातव्यत्वात् स्थानत्रयी त्वं तः प्राकृतस्य वस्थानिर्मुक्तत्वं प्रतिपाद्यते ततः

स्यापादस्समाप्तेस्तत्पदार्थो विचार्यते तत्र स्वप्नावस्थायां जाग्रदानंतर्यात्स्वयंज्योतिष्ट्वसिद्धौ स्वसाधनत्वा
द्वा दौ विचारः जाग्रदवस्थायां सूर्यादिप्रकाशमत्वेनात्मनः स्वप्रकाशत्वं दुर्ग्रहं स्वप्ने तु सूर्याद्यभा
वेपि प्रत्यक्षतया दृश्यमानात्स्वग्रहमिति स्वप्ने स्वयंज्योतिष्ट्वसिद्धौ स्पष्टसाधनत्वमेतव्यं एवं हि स्वप्न
मधिकृत्य श्रूयते न तत्र रथा रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजत इत्यादि त
त्र संशयः किं स्वप्नसृष्टिर्व्यावहारिकी घटादिवत् उत शुक्तिरजतवन्मायामात्रमिति पूर्वप
क्षे घटादिवत्सत्यस्वप्नावस्थातो जीवस्य पृथक्करणायोगात् ब्रह्माभेदरूपवाक्यार्थान्वयासि
द्धिः फलं सिद्धांते तत्सिद्धिरिभेदः तत्रेदं पूर्वपक्षसंध्य इति संध्यो जाग्रत्सुषुप्ताः संध्यो भवे स्व
प्ने सृष्टिर्व्यावहारिकी वदितः श्रुतिरेवमाह अथ रथान्रथयोगान्पथः सृजत इति १ नि
र्मातारं चैके पुत्रादयश्च २ किं चैक शाखिनोऽस्मिन्नेव स्वप्ने कामानां निर्मातारं तथा
जीवमिव परमात्मानमामनंति य एष सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाण इति।
एषु चक्षुरादिकरणेषु सुप्तेषु निर्व्यापारेष्वित्यर्थः न तु श्रुतौ कामानां वृद्धिहेतिविशेषाणानि
र्मातापरमात्मेति श्रूयते नार्थनिर्मातेत्यतस्त्र आह पुत्रादयश्चेति काम्यंत इति व्युत्पत्त्या पुत्रादय ए
व कामा इत्यर्थनिर्मातृत्वं परमात्मन इत्यर्थः तथा च स्वप्नसृष्टिः संसारेश्वरकर्तृकत्वात् विया
दिवत्सत्येत्यत्र सूत्रेणोक्तं तस्माच्छ्रुत्यनुमानाभ्यां स्वप्नसृष्टिः सत्येति प्राप्ते प्रत्याह मायामात्रं तु

कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ३ तुः पूर्वपक्षनिरासार्थः स्वप्नसृष्टिर्मायामात्रं सृष्टिरजनवतकु
तः कार्त्स्न्येन उचितदेशकालादिसंपत्त्या वा बाधाभावेन वा नाभिव्यक्तस्वरूपत्वात् न हि रथादीनाम
उचितो देशः स्वप्ने संभवति देहान्तरनाडीप्रविष्टमनोवछिन्नस्यादित्तिनिष्टत्वात् नाप्युचितः कालोस्ति
घटिकामात्रवर्तिनि स्वप्ने बहुसंवत्सरसाध्यसंस्मरणस्य दर्शनात् तस्मात्प्रातिभासिक एव स्वप्न
प्रपंचः यदुक्तं अथ रथान् रथयोगान्पथः सृजत इति ईश्वरकर्तृकां सृष्टिं श्रुतिराहेति सत्रेः
सत्यत्वमिति तत्तु सैव न तत्र रथा न रथयोगा न पंथानो भवंत्यादिकया स्वप्ने रथाद्युभावबोधकया पर
हृतं अत्र तमाने चोचितदेशादिजन्यत्वमुपाधिः हेतुसिद्धिश्चैतदन्तरे सद्धिकेनेति स्वयंनिर्हत्य स्वयंनिर्मा
य स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति च स्वप्नसृष्टेर्जीवकर्तृकत्वश्रवणात् स्वयंनिर्हत्य पूर्वदेहं निस्स्त्र
ष्टह्त्वा स्वयंनिर्माय अत्र पूर्वं तस्यां प्रदेहं संपाद्य स्वेन भासा स्वीयान्तःकरणवृत्त्या स्वेन ज्योतिषा स्वरूपचै
तन्येनेत्यर्थः तथा च कामं कामं पुरुषो निर्मिमाणः इत्यत्रापि जीव एव निर्मातेत्येषः २ नन्तु स्व
प्नस्य मिथ्यात्वे तस्य शुभाशुभसूचकत्वं न स्यादित्यत आह सूचकश्च हि श्रुतेराचक्षते च तद्विदः ४ स्वा
प्नगतादिप्रकाशः सत्य एव वस्तुतः सत्यस्य सूचकः सत्यस्य साध्यस्यायुस्सूचनस्य हेतुः तथा हि यदा क
र्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने इत्यादिश्रुतेरवगम्यते
स्वप्नः आचक्षते च स्वप्नाध्यायविदः शुभाशुभसूचकत्वं स्वप्नस्येत्यर्थः यद्यपि प्रकाशस्यार्थोपरा

गणैव सूचकत्वमिति वक्तव्यतः सत्यत्वमप्रयोजकं तथापि रजतस्य सत्यहर्षादिजनकत्ववत्तस्य सूचक
त्वमविरुद्धमिति तात्पर्यं ४ ननु यथेश्वरः संकल्पमात्रेण जगत्सृजति एवं तदंशो जीवोऽपि संकल्प
मात्रेण निमित्तेन स्वाप्नं जगत्सृजतु तथा चोचितनिमित्ताभावान्मिथ्यात्वं स्वप्नसृष्टेरित्यसंगतमित्यत
आह पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ५ जीवेश्वरयोरभेदेऽपि मायया ऐश्वर्यस्य तिरोहि
तत्वान्न जीवस्य संकल्पमात्रेण स्रष्टृत्वमिति परिहाराभिप्रायः जीवस्य तिरोहितमैश्वर्यं परस्यात्मनोऽभि
ध्यानादभेदाभ्यासरूपध्यानप्राप्तादीश्वरप्रसादादभिव्यक्तं भवति कुतः ततः ईश्वरादज्ञानाद्बन्धः ज्ञाना
द्विपर्ययो मोक्ष इति श्रुतिर्दर्शयति तस्मादीश्वरप्रसादरहितानां नेश्वरत्वाद्व्यक्तिरित्यर्थः श्रुतिस्तु पठ्यते॥
ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः तस्याऽभिध्यानात्तृतीयं देहभेदे विश्वैश्व
र्यं केवल आप्तकाम इति देवं स्वप्रकाशमीश्वरमहंत्वेन साक्षात्कृत्य सर्वपाशानां मिथ्याज्ञानरागादीनां क्ले
शानां क्षयहानिः क्षयो भवति एवं क्षीणैः क्लेशैस्तत्कार्यं जन्ममरणक्षयो भवति निर्गुणविद्याफलमु
क्त्वा सगुणविद्याफलमाह तस्येति तस्येश्वरस्याऽभिमुखेन ध्यानादुक्तहानिद्वयापेक्षया तृतीयमणि
माद्यैश्वर्यं देहभेदे देहविशेषे सिद्धिदेहे प्राप्य भुक्त्वा निर्गुणविद्यया केवलोऽद्वितीय आप्तकामो निरति
शयानन्दात्मनैवावतिष्ठत इति क्रममुक्तिर्वा कार्यः ५ ननु जीवस्येश्वरत्वतिरोभावे को हेतुरित्याशंक्या
ह देहयोगाद्वा सोऽपि ६ सोऽपि जीवस्येश्वरत्वतिरोभावो देहेन्द्रियादियोगात् यथा भस्मयोगाद्व

स्वप्रकाशनसामर्थ्यतिरोभावस्तद्वदित्यर्थः ननु जीवस्येश्वरत्वाभाव एवास्त्विति शंकां वाशब्देन निरस्यति
अभेदस्य श्रुतिस्मृतिसिद्धत्वादिति भावः तस्मादुदितसामर्थ्याभावाज्जाग्रदवस्थैरेवाधितत्वाच्च मुक्ति
रूपत्ववन्मायामात्रं स्वप्नदर्शनमिति तदवस्थाविनिर्मुक्तायमात्मेति सिद्धम् ६ एवं वाह्यकरणोपर
मरूपं स्वप्नमात्मनः स्वप्रकाशतार्थं परीक्ष्यांतःकरणोपरमरूपां सुषुप्तिं स्वप्नानंतरभाविनीं तस्य स्वप्र
सत्वाय निरूपयति तदभावो नाडीषु तच्छ्रुतेरात्मनि च ७ सुषुप्तः स्वप्नाभावरूपत्वात्तदानेन तयो
र्हेतुहेतुमद्भावः आनंतर्यं वा संगतिः तत्र सुषुप्तिवाक्यानि प्रतिपन्नानि दर्शयन्ते तद्यत्रैतत्सुप्तः स
मस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवतीति तत्रासु स्वप्नाद्यवस्थासु यत्राव।
स्थायां महाद्येन्द्रियं परमाणं यथास्यात्तथा सुप्तः संहृतवाह्येन्द्रिय इति यावत् समस्त अविशेषवृत्तिः
संहृतांतःकरणः स्वप्नदर्शनं स्वप्नं न जानाति तदा नाडीषु सृप्तो भवतीत्यर्थः क्वचिन्नाडीभिः सरणानंतरं पु
रीतति सुषुप्तिः श्रूयते ताभिः प्रत्यवसृप्य पुरीतति शेते इति क्वचित्परमात्मनि सुषुप्तिः श्रूयते य
एषोन्तर्हृदय आकाशस्तस्मिञ्छेत इति सता सोम्य तदा संपन्नो भवतीत्यादिभिः तत्र संशयः किं
जीवस्य नाडीपुरीतत्परमात्मनामन्यतमे यत्र क्वचित् सुषुप्तिः उत नाडीपुरीतत्प्रवेशानंतरं परमात्मन्येव
वेति अत्र पूर्वपक्षे सुषुप्तिस्थानविकल्पाज्जीवस्य प्रत्यक्षानियमः सुषुप्तो भ्रमनिवृत्तावपीषत्
प्रसंकप्राप्तेरनियमादिति फलं सिद्धान्ते तन्नियम इति भेदः तत्रैकवाक्यनिष्पादकत्वेन श्रुतद्वी

52

वे॰ सू॰ वृ॰ ५२

हृदयवदेकशयननिष्पादकनाड्यादीनां विकल्प इति प्राप्ते ब्रूमः तदभावः स्वप्नाभावः सुषुप्तिर्नाडीष्वात्म
नि चेति नाड्यादीनां समुच्चय एव न विकल्प इत्यर्थः समुच्चयश्च नाडीपुरीतत्प्रवेशं विना तत्संपत्तेरभा
वात् योर्नाडीपुरीततोर्गुणत्वेन परमात्मनः प्रधानत्वेन तेषां कुतः तच्छ्रुतेः तस्य नाड्यादीनां सुषु
प्तिस्थानत्वस्य श्रुतत्वात् उक्तसमुच्चयानंगीकारे श्रुतीनां संग्रहो न स्यादिति भावः किंच विभाजी
वस्य स्वप्नांनंतरं नाडीपुरीततोः संचारोऽन्तःकरणाद्युपाधेः सत्वात्संभवति उपाधिसंचारं विना स्व
तन्त्रस्य संचाराभावात् सुषुप्तौ तदुपाध्यभावान्नाडीपुरीततोः शयनं जीवस्य न संभवतीत्यपि द्रष्टव्यं ७
अतः प्रबोधोऽस्मात् ८ यतः परमात्मैव सुषुप्तिस्थानं अत एव हेतोरस्मात्परमात्मनो जीवस्य प्रबोध
उपदिश्यते प्रबोधकाले कस्माज्जीवात्मनः संप्रतिष्ठतीति प्रश्ने परमात्मनः सकाशादुत्तिष्ठती
ति श्रवणात् आत्मनोऽस्य सुषुप्तिस्थानत्वे इदं श्रवणं बाध्येत अन्यत्र सुषुप्तस्यान्यस्मादुत्थाना
योगादिति भावः तस्मात्स्वप्ने मिथ्याज्ञानाभावमात्रेण ब्रह्मसंपत्तेः सत्यान्मूलाज्ञाननिवृत्तौ साक
ल्येन ब्रह्मसंपत्तिविरुद्धेत्यस्ति जीवस्य ब्रह्मत्वनियम इति सिद्धं ८ स एव कर्मानुस्मृतिशब्दविधि
भ्यः ९ सुषुप्तिं ते परमात्मनः सकाशाज्जीव उत्तिष्ठतीति परमात्मैव सुप्तिस्थानमित्युक्तं तदे
वयुक्तं स्वप्नादनस्य प्रबोधसंभवेन सुषुप्तस्य नाड्यादिस्थानत्वेऽप्यविरोधादित्याक्षेपसंगति एकैव दे
वदत्ते तत्र यः सुप्तो जीवः स एवोत्तिष्ठति उतान्यो वाऽन्यो वेत्यनियम इति संशये जलराशौ क्षिप्त

रा॰ शि॰
५२

विद्यातिवानियम इति प्राप्ते ब्रूमः यः सुप्तो जीवः स एवोत्तिष्ठति नाऽन्यः कुतः कर्माऽनुस्मृतिशब्द
विधिभ्यः पंचम्यो हेतुभ्यः दिनद्वयसाध्यकर्मणोऽर्द्धं कृत्वा सुप्तः पुनरुत्थायावशिष्टमर्द्धं कर्म ।
करोति अनुशब्देन प्रत्यभिज्ञा योहं पूर्वदिने काशीनाथमद्राक्षं सोहमिदानीं मणिकर्णिकायां
स्थितोऽस्मीत्याद्याकारा स्मृत्युच्यते पश्चात्तेन गतस्य मम तादृशः काशीनाथः इत्यादिस्मरणोऽनुस्मृ
तिशब्देनोच्यते पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैवेत्यादिश्रुतिजातं शब्दः अयनं गम
नमायः प्रतिनियतगमनं प्रतिन्यायः यथा भवति तथा योनिं शरीरं प्रति सुप्तः पुनरागच्छ
ति जागराद्येत्यर्थः कर्मविद्याविधयो विधिशब्देनोच्यंते यदि सुप्तस्य पुनर्नोत्थानं तदोक्तहेत
वो बाध्येरन्नित्यर्थः तस्मात्सुप्त एवोत्तिष्ठतीति सिद्धम् ८ एवमवस्थात्रयनिर्मुक्तत्वमात्मनः
तद्द्रष्टुरव्यभिचारिणः उक्ता मूर्च्छावस्था किं सुषुप्तावेवान्तर्भवति उतातिरिक्तैवेति संदेहे अ
तिरिक्ते प्रमाणाऽभावात्सुषुप्तिरेव मूर्च्छेत्युपजीव्योपजीवकभावेन पूर्वपक्षे सिद्धांतः मुग्धे
ऽर्धसंपत्तिः परिशेषात् १० पूर्वपक्षे मूर्च्छावस्थातो वोकार्यं महानकार्यं इति फलं सिद्धांते
न यत्नः कर्तव्यः इति सिद्धं न तावत्स्वप्नजागरिते मूर्च्छावस्था ज्ञानाभावात् नापि मरणावस्था
प्राणोष्मणोः सत्वात् नाऽपि सुषुप्तिर्वैलक्षण्यात् मुग्धस्य शरीरे कंपं भयंकरं वदनं निस्फुले उ ।
न्मीलिते नेत्रे निस्पन्दत्वं च प्राणोऽवतिष्ठते नैवं सुषुप्तो भवति तस्मात्परिशेषादर्धसंपत्तिर्मुग्धा

वस्थाऽतिरिक्तैव ननुमुग्धेपिवास्यांततः कारणनाशभावेनसत्वसंपत्तेः सुषुप्तावविशेषात्क
थमर्धसंपत्तिरितिचेत् सत्य नहिब्रह्मणार्धसंपत्तिंमुग्धस्यब्रूमः किंतुसुषुप्तवस्थायांयेधर्मा
प्रसन्नवदनत्वनिमीलितनेत्रत्वप्राणाद्यासविशेषविज्ञानराहित्यादयः तत्रविशेषविज्ञान
राहित्यादिनार्धेनधर्मजातेनमूर्च्छावस्थायाः संपन्नत्वादर्धेनमरणावस्थाः धर्मज्ञानेनकंपा
दिनाचयुक्तत्वादर्धसंपत्तिर्मूर्च्छेत्युच्यतइत्यनवद्यम् १० एवमुद्देशपत्वेनप्रथमंजिज्ञास्यत्वंपदा
र्थः स्वप्रकाशः सर्वाऽवस्थानिर्मुक्तंनिर्विशेषसंशोध्यतजिज्ञासोपरमानंतरंजिज्ञास्यविषयंत
त्पदार्थं अवसरसंगत्याशोधयितुंनिर्विशेषत्वमाह नस्थानतोऽपिपरस्योभयलिंगंसर्वत्रहि ११
सर्वकामः सर्वगंधः सर्वरसः इत्यादिनाब्रह्मणः सविशेषत्वंश्रूयते अस्थूलमनण्वित्यादिना
निर्विशेषत्वं तत्रसंशयः किमुभयश्रुत्यनुसारादुभयरूपंब्रह्मउतैकरूपं एकरूपमित्यत्रा
पिसविशेषंनिर्विशेषंवेति पूर्वपक्षेद्विरूपंब्रह्मध्येयंसिद्धांतेनिर्विशेषमेवेतिफलभेदः तत्रय
थामूर्च्छाऽवस्थायाविनह्यसुषुप्तिमरणावस्थोभयधर्मवत्वं तथाब्रह्मणोपिउभयरूपत्वंभव
तु स्मृतत्वादिदृष्टांतेनपूर्वपक्षेसिद्धांतेतः नतावत्स्वतः परस्यब्रह्मणउभयलिंगंउभयरूप
त्वंसंभवति सत्यस्यवस्तुनोद्विरूपायोगात् नह्येकमेववस्तुकदाचिद्दत्तदाभाववद्दृष्टं रात्रे
नमूर्च्छादृष्टांतोनिरस्तः वैलक्षण्यात् नापिस्थानतः उपाधितः परस्योभयरूपत्वंनाविकं

प्युक्तं अग्निसंयोगमात्रेण जलस्योष्णस्वभावत्वादर्शनात् तस्मादेकरूपं ब्रह्म तदप्येकरूपत्वं निर्विशेषत्व
मेव हि यतः सर्वत्र वेदांतेषु ब्रह्मपरेषु अशब्दमस्पर्शमित्यादिषु सविशेषत्वनिरासेन ब्रह्मोपदिश्यते॥
तस्मान्निर्विशेषमेवैकरूपं ब्रह्म ११ न भेदादिति चेन्न प्रत्येकमतद्वचनात् १२ ननु न निर्विशेष
मेव ब्रह्म कुतः भेदात् प्रतिविद्यं ब्रह्मण आकारभेदात् कस्यांचिद्विद्यायां चतुष्पाद्ब्रह्मोपदिश्य
ते कस्यांचित् षोडशकलं कस्यांचित्त्रैलोक्यशरीरं वैश्वानराख्यं तस्मात्सविशेषमपि स्तुतिसामर्थ्या
दंगीकर्तव्यमिति चेन्न प्रत्येकं प्रत्युपाधिस्थतद्वचनात् ब्रह्मणः परस्याभेदस्यैव श्रवणादित्यर्थः॥
यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः
पुरुषोऽयमेव स योऽयमात्मेत्यादिश्रुतौ ब्रह्मणः सर्वोपाधिषु पृथिव्यादिष्वभेदः श्रूयते अस्यां
पृथिव्यां तेजोमयः स्वप्रकाशो नाशरहितो यः पुरुषः यश्चात्मानं देहमधिकृत्य वर्तमानः शारी
रो जीवस्तावुभौ सर्वेषां भूतानां मधुपकारकौ संतौ मधुसः शारीरपृथिव्यवच्छिन्नः पुरुषोऽयमेव यो
ऽयमात्मा सर्वकारणममृतः इति श्रुत्यर्थः १२ अपि चैवमेके १३ किं केशाखिनः एवमभेदनिंदापूर्व
कमभेदमेव ब्रह्मणः समामनंति मनसैवेदमाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति
य इह नानेव पश्यतीति शाखाचार्यसंस्कृतमनसैवेदं ब्रह्माप्तव्यं ज्ञाते तु इह ब्रह्मणि किंचिदपि
भेददर्शनं नास्ति यस्त्वविद्याकृतेन नानारूपमस्तीति पश्यति स मरणान्मरणं पुनः प्राप्नोतीत्यर्थः

१३ ननु सगुणनिर्गुणपरश्रुतिद्वये सति कथं निर्गुणो ब्रह्मणि पक्षपातस्तत्राह अरूपवदेव हि तत्प्रधा
नत्वात् १४ रूपादिहीनं निर्विशेषमेव ब्रह्मावधारयितव्यं न सविशेषं कुतः अस्थूलमित्यादिनिषेध
शास्त्रस्य निर्गुणब्रह्मप्रधानत्वादित्यर्थः उपासनावाक्यानां सविशेषेण तात्पर्याभावात्तात्पर्यांगीकारे वा
क्यभेदापत्तेरितरेषां सविशेषवाक्यानां प्रत्यक्षादिसिद्धप्रपंचानुवादकत्वेन निर्विशेषपरत्वात्तदन
न्यत्वमित्यादिनाग्रे च मिथ्यात्वसाधनाच्च न सविशेषत्वं ब्रह्मणः प्रामाणिकमिति भावः १४ ननु
तर्हि सविशेषश्रुतीनां का गतिरत आह प्रकाशवच्चावैयर्थ्यात् १५ यथा सूर्यादिप्रकाशो वक्रवेणाद्यु
पाधिना वक्रऋजुदीर्घह्रस्वत्वैरिव भवति तद्वत् ब्रह्मापि पृथिव्याद्युपाधिवशात्तत्तदाकारमिव भवति ता
दृशोपाधिकाकारः सविशेषश्रुतीनां गतिरिति तासामवैयर्थ्यान्निरर्थकत्वाभावान्न विरोध इत्यर्थः १६
ननु कीदृशं निर्विशेषं ब्रह्मेत्यत आह आह च तन्मात्रं १६ तन्मात्रं चैतन्यैकरसं निर्विशेषं श्रुतिराह॥
यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञानघ
न एवेति एकरसे दृष्टांतः यथा लोके सैंधवघनो लवणमूर्तिर्विशेषोंतर्बहिश्चाविलक्षणरसंभूतः
सर्वो लवणैकरसः तथायमात्मांतर्बहिश्च भेदरहितः सर्वः स्वप्रकाशचिदेकतानास्ति घतीतिसू
त्वर्थः १६ किंच प्रपंचनिषेधमुखेन ब्रह्मणः उपदेशाद्ब्रह्म निर्विशेषं सविशेषत्वे मविशेषवाक्यैरेव
तत्सिद्धेर्निर्विशेषोपदेशानर्थक्यं स्यादित्याह दर्शयति चाथोऽपि स्मर्यते १७ अथात आदेशो

नेतिनेतीत्यादि श्रुतिर्निषेधमुखेनैवब्रह्मदर्शयति यंचभूतोज्ञानंतर्थमयथशब्दार्थः तस्माः परब्रह्मवी
हेतत्वमतः शब्दार्थः इतिशब्दः पूर्वोक्तपंचभूतपरामर्शी तन्निषेधावधिभूतः परमात्मेत्यादेशाद्उप
देशाद्रूपार्थः स्वजगताघोशाद्रूपत्यार्थः तथास्मर्यतेचनिषेधमुखेनब्रह्मेत्यर्थः ज्ञेयंयतत्प्रवक्ष्यामिय
त्ज्ञात्वामृतमश्नुतेअनादिमत्परंब्रह्मनसत्तन्नासदुच्यतइतिभगवद्गीतायांअनादिमत्कार्यमस्यनविद्य
तेइत्यनादिमत्कार्यरहितमित्यर्थः नसत् नकारणंकस्यचित् नकार्यंस्वयंकस्यचिदित्यर्थः ७ अ
तएवचोपमासूर्यकादिवत् १८ यतएवायंपरप्रतिषेधोपदेशेननिर्विशेषोयमात्मात्र तएवोपाधिकंसवि
शेषत्वंआदायजलसूर्यकादिवदित्युपमागृह्यते यथाह्ययंज्योतिरात्माविवस्वानयोभिन्नावह्व वधैको
नुगच्छन् उपाधिनाक्रियतेभेदरूपोदेवः क्षेत्रेष्वेवमजोयमात्मेति एकएवतुभूतात्माभूतेभूतेव्यवस्थि
तः एकधाबहुधाचैवदृश्यतेजलचंद्रवदिति ज्योतिःस्वभावोविवस्वानेकोपितत्तत्पात्रगतोभिन्नाश्रा
योनगच्छन्बहुधाक्रियतेएवमयमात्मादेवः स्वप्रकाशोजः कूटस्थोनित्यएकोपिभिन्नेषुक्षेत्रेष्वनुग
च्छन्नुपाधिनाभेदरूपः क्रियतेइतियोजना तथाचैतद्दृष्टांतबलादपिब्रह्मणोनिर्विशेषत्वंक्षितिसूत्र
तात्पर्यं॥१८॥ दृष्टांतवैषम्यंशंकते अंबुवदग्रहणात्तुनतथात्वं १९ ननुयथांबुसूर्यादिभ्योमू
र्तेभ्योभिन्नंदूरस्थंप्रतिबिंबोपाधिभूतंतदुपलभ्यतेतद्वद्व्यापकादात्मनोदूरस्थोपाधेरग्रहणादात्मनो
मूर्तत्वाभावाच्चविषमोदृष्टांतइतिनतथात्वंनसूर्यकादितुल्यत्वमितिशंकार्थः १९ तत्रोत्तरमाह॥

वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं २० यथा सूर्यप्रतिबिंबस्य जलांतर्भूतस्य जलगतवृद्धिह्रा
सादिभाक्त्वं न वास्तवं एवमविकृतस्य परमात्मनो देहाद्युपाध्यंतर्भावाद्देहगतवृद्धिह्रासादिभाक्त्वं न स्वाभा
विकमित्येतावतांशेन तयोर्दृष्टांतदार्ष्टांतिकयोः सामंजस्याद्भवति सूर्यादिदृष्टांतः न हि सर्वात्मना सा
म्यं दृष्टांतदार्ष्टांतिकयोः शक्यते वक्तुं दृष्टांतत्वविरोधादिति भावः २० किं चागमसममधिगम्येऽर्थे न चोद्यमि
त्याह दर्शनाच्च २१ परस्यैव ब्रह्मणो देहांतरानुप्रवेशस्य प्रतिबिंबभावरूपस्य श्रुतौ दर्शनादित्यर्थः पु
रश्चक्रे द्विपदः पुरश्चक्रे चतुष्पादः पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति श्रुतिः पुरः शरीराणि
द्विपादयुक्तानि चतुष्पादयुक्तानि च चक्रे कृत्वा पुरश्चद्दराण्यभिव्यक्तेः पूर्वं स पुरुषः ईश्वरः पक्षी लिंगश
रीरं भूत्वा पुरः शरीराणि सृष्टान्याविशदित्यर्थः तस्मान्निर्विशेषमेवं चैतन्यैकरसं ब्रह्मेति सिद्धं २२ ननु
निषेधश्रुतिभिर्ब्रह्म निर्विशेषं सिध्यतीति यदुक्तं तदयुक्तं ताभिर्ब्रह्मणोऽपि निषिद्धत्वादित्याशंक्य संगत्याधि
करणमारभ्यते प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः २२ तत्र पूर्वपक्षे द्वयासिद्धिः फले
सिद्धांते तत्सिद्धिरिति बोध्यं द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्युपक्रम्य पंचभूतात्मकं रूपद्वयं तेजोवन्ना
त्मकं मूर्तं तत्रेयं मूर्तं स्थूलात्मकं प्रत्यक्षं वाय्वाकाशात्मकममूर्तं तद्द्वयं परोक्षममूर्तमिति द्वेधा विभज्य
तत्र मूर्तस्य सूर्यश्च दृग्गोलकं च कार्यं सारः अमूर्तस्य तु सूर्यांतर्वर्ती करणात्मको हिरण्यगर्भश्च दृग्गो
लके दक्षिणे च दृग्रूपेण वर्तमानः सारः इति चोक्त्वा तस्य करणात्मकलिंगशरीररूपस्य हिरण्यगर्भ

पुरुषशब्दवाच्यस्य वासनामयानि स्वप्नरूपाणि तायामयानि दर्शयित्वा रूपद्वयवतो ब्रह्मणः स्वरूपं बोध
यितुमिदमारभ्यते अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयं सत्यस्य सत्य
मिति प्राणा वै सत्यं तेषामेष सत्यमिति उपक्रमे वार्थशब्दः एवकारार्थः सपरिकररूपद्वयोपन्यासा
नंतर्यमथशब्दार्थः रूपद्वयोपन्यासस्य ब्रह्मज्ञानहेतुत्वं ब्रह्मणो वक्तत्वेन परिपोषो वातः शब्दार्थः इ
तिशब्देन ब्रह्मणो रूपद्वयं सपरिकरं यदुपन्यस्तं तत्परामृश्यते इति शब्देन परामृष्टं सर्वं नञा वीप्स
यानिषिध्यते नेति नेतीति वीप्सया विषयजातस्य सर्वस्य निषेधेऽस्य विषयः प्रत्यगात्मा निषेधावधिभू
त इति निर्विचिकित्सं ज्ञानं भवति एवं नेति नेतीति ब्रह्मोपदेशे कृते नेति नेतीत्युपदेशस्य कोऽर्थ इत्याकां
क्षायां तमेवोपदेशं निर्वक्ति न ह्येतस्मादिति हि यस्मादेतस्मान्नेति नेतीत्यादिष्टान्न ब्रह्मणोऽन्यद्व्यतिरिक्तं
नास्ति ब्रह्मैव तत्परमस्ति तस्मान्नेतीत्युच्यत इति निर्वचनवाक्यस्यार्थः यद्वा नेति नेतीति यः प्रपंचनिषे
धरूपस्यादेशो कृतः स एतस्मादिति अनेन परामृश्यते एतस्मान्नेतीति प्रपंचनिषेधरूपात् ब्रह्मोप
देशात् अन्यत्परमुपदेशनं नह्यस्तीत्यर्थः ब्रह्मणो नामधेयकथनव्याजेनापि स्वरूपमाह अथेति
नेति नेतीति निषेधस्य ब्रह्मविषयताभावसूचनार्थोऽर्थशब्दः नामधेयमाह सत्यस्य सत्यमिति तद्व्या
चष्टे श्रुतिः प्राणा इति प्राणशब्देन लिंगशरीरमुच्यते तस्य सत्यत्वं स्थूलदेहापेक्षया स्थायित्वं द्र
ष्टव्यं एष पर श्रा मात्मा सत्यस्यापि परं सत्यमिति वल्लगतिः तत्र नेति नेतीति निषेधस्य को वा

विषय इति संदि[illegible]स्यते किं प्रपंचो ब्रह्म चेत्युभयमपि निषिध्यते उत कं तन एकमित्यत्रापि किं प्रपंचो नि
षिध्यते उत ब्रह्मेति तत्र नियामकाभावादुभयमपि प्रतिषिध्यत इति प्राप्ते यद्वा निरधिष्ठाननिषेधायोगा
देकं ब्रह्मैव निषिध्यते प्रपंचस्य प्रत्यक्षादिसिद्धत्वेन निषेधायोगादिति प्राप्ते ब्रूमः ब्रह्मणो यद्रूपद्वयं
सपरिकरप्रकृतं प्रधानं एतावत्त्वं इयत्ता परिच्छिन्नत्वं तत्प्रकृतैतावत्त्वं तदेकं प्रतिषेधति नेति नेतीति।
श्रुतिः इति शब्दस्य प्रधानत्वेन प्रकृतपरामर्शित्वात् ब्रह्म तु न प्रधानत्वेन प्रकृतं द्वे वाव ब्रह्मणो रू
पे इति रूपद्वयात्मकजगदुपसर्जनत्वेनैवोक्तत्वादि तस्य ब्रह्मणो न निषेधः यस्मात्ततः प्रपंचनिषे
धानंतरं भूयो ब्रह्मास्तीति ब्रवीति न ह्येत्यादि परमस्तीत्यते निर्वचनवाक्यात्तस्मादित्यर्थः ब्रह्मणो
पि निषेधे किमस्तीति ब्रूयादिति भावः निर्वचनवाक्यस्य द्वितीयव्याख्यायां तु ततः प्रपंचनिषेधस्य
परस्तादथ नामधेयमित्यादिवाक्यं ब्रह्म ब्रवीत्यतो नेतीत्यादिवाक्येन निषेध्यमात्रं न शेषं किंतु ने
न निषेधेन भावरूपं ब्रह्म ज्ञातव्यमिति सूत्रभागस्यार्थः नच प्रपंचनिषेधे प्रत्यक्षविरोधः तस्य
व्यावहारिकप्रामाण्यादित्यनवद्यं २२ ननु यदि ब्रह्मास्ति तर्ह्युपलभ्येत तत्राह तदव्यक्तमाह हि २३
न ब्रह्माव्यक्तं श्रुत्यतिरिक्तमानागोचरः हि यतः श्रुतिराह न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवै
स्तपसा कर्मणा वा स एष नेति नेत्यात्मा ऽगृह्यो न हि गृह्यत इत्यादिना ब्रह्मणः प्रत्यक्षाद्यगोचरत्वं
चक्षुर्नैर्देवैरिंद्रियांतरैरित्यर्थः नेति नेतीति येऽत्रात्मा व्याख्यातः स एषो ऽगृह्यश्चाग्राह्यः यस्मान्न

हिरण्यगर्भेग्रहणं योग्यत्वमित्यर्थः २३ नर्हिसर्वोपाधिरहितस्य ग्रहणाभावे मोक्षो नस्यादित्याशंक्याह अभिसंराधने प्रत्य
क्षानुमानाभ्यां २४ अपि चैतमात्मानं संराधने समाध्यवस्थायां कृतार्थः पश्यंतीति प्रत्यक्षानुमा
नाभ्यां श्रुतिस्मृतिभ्यामवगम्यते तथाहि श्रुतिः पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नां
तरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति ज्ञानप्रसादेन विशुद्धसत्वस्
ततस्तु तं पश्यति निष्कलं ध्यायमान इति स्वयंभूः परमात्मा खानि श्रोत्रात्मकाकाशोपलक्षितानींद्रिया
णि पराञ्चि अनात्मविषयाणि व्यतृणत् हिंसितवान् इंद्रियाणि हिंसानात्मविषयतासर्जनमेव तथासर्ज
नेनाममकमाह तस्मादिति न न पश्यतींद्रियैः पराञ्चमेवार्थं पश्यति नांतरात्मानं कथं तर्ह्यात्मज्ञानं तत्रा
ह कश्चिदिति कश्चिद्धीरो विवेकी आवृत्तचक्षुः संयतेंद्रियो मोक्षमिच्छन् प्रत्यगात्मानं समाधावी
क्षितवानित्यर्थः ज्ञानस्य करणव्युत्पत्त्या अंतःकरणस्य प्रसादेन रागादिराहित्येन विशुद्धसत्वः प्रस
न्नप्रवणांतः ततस्तु विशुद्धसत्वाद्धेतोस्तमात्मानं निरवयवं ध्यायमानः पश्यति साक्षात्करोतीत्यर्थः स्मृ
तिरपि यं विनिद्रा जितश्वासाः संतुष्टाः संयतेंद्रियाः ज्योतिः पश्यंति युंजानास्तस्मै योगात्मने नम इति
जितश्वासाः प्राणायामपराः योगात्मत्वं ध्यानात्मकयोगगम्यत्वं २४ नवजीवेश्वरयोर्ध्यातृध्येय
भावांगीकारे भेदः स्यादित्याशंक्याह प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् २५ यथा
सौरः प्रकाशः आकाशो वांगुल्याद्युपाधौ कर्मणि भिन्न इव वक्र इव भाति वस्तुतस्त्वेकरूपः तद्वदा।

57

वे॰ सू॰ वृ॰
५८

काशादावात्मापि ध्यानकर्तृत्वादौ कर्मण्युपाधौ भिन्न इव भाति वस्तुतस्त्ववैशेष्यमेकरूपत्वमेवात्मनः। कुतः अभ्या
सात् तत्त्वमसीत्याद्यभेदस्य पुनःपुनरभ्यासादित्यर्थः २५ अतोऽनन्तेन तथा हि लिंगं २६ अतो भेदस्यौपाधिकत्वाद्विद्य
याभेदं निरस्य जीवोऽनन्तेन परमात्मना एकतां गच्छति तथा हि लिंगमपूर्वार्थज्ञापकं श्रुतिजातं ब्रह्मैव सन् ब्रह्मा
प्येतीत्यादि २६ एवं जीवब्रह्मणोः पारमार्थिकमभेदमुक्त्वा स्वमतश्रुत्यर्थं भेदाभेदपक्षमुपन्यस्यति उभय
व्यपदेशात्त्वहिकुंडलवत् २७ ध्यातृध्येयभावादिना भेदस्याभेदस्य च श्रुतौ व्यपदेशा जीवेश्वरयोर्भेदाभेदे
भवतः तुशब्दः सिद्धांतवैषम्यद्योतनार्थः अहिकुंडलवत् कुंडलमहेः संस्थानविशेषः यथा अहिकुंडलयो
रहित्वेनाभेदः कुंडलत्वेन भेदः तद्वदित्यर्थः २७ धर्मभेदेन भेदाभेदाविति पक्षमुक्त्वा एकधर्मावच्छेदेनैव
भेदाभेदाविति पक्षमाह प्रकाशाश्रयवद्वा तेजस्त्वात् २८ यथा प्रकाशः सौरः तदाश्रयश्च सविता तयोर्नि
तांतभेदः तेजस्त्वाविशेषात् तथापि भिन्नत्वेन प्रतीयते तथा चैकतेजस्त्वावच्छेदेनैव प्रमाणबलात् भेदा
भेदौ यथा तद्वज्जीवेश्वरयोर्भेदाभेदावित्यर्थः २८ ननु भेदस्य पारमार्थिकत्वे ज्ञानान्निवृत्तेरसंभवान्मोक्षो
न स्यात् एकावच्छेदेन तयोरैक्यांगीकारे लोके विरोधकथैव न स्यादित्यादिदोषं परमतेऽमत्वा स्वसिद्धांतमाह २९
पूर्ववद्वा प्रकाशादिवच्चावैशेष्यमित्यत्र पूर्वं भेदश्चौपाधिकः अभेदः पारमार्थिकः इति यदुक्तं स एव सिद्धांतो
ऽस्तु पथ्यः २९ प्रतिषेधाच्च ३० नान्योऽतोऽस्ति द्रष्टेत्यादिना सर्वेण परमात्मातिरिक्तस्य चेतनस्य नेति नेतीत्यादि
वाक्यैः प्रपंचस्य च प्रतिषेधाद्ब्रह्माद्वितीयमित्ययमेव सिद्धांत इत्यर्थः तस्माच्छ्रुतिबलान्निर्विशेष एकः पर

५८

मात्मेतिसिद्धं ३० नन्वनेतिनेतीतिब्रह्मातिरिक्तं वस्तुनिषेधमित्युक्तं तदयुक्तं ब्रह्मणः सेतुत्वोन्मानादिव्य
पदेशेन वस्त्वंतरसत्त्वावगमात् युष्माद्यधिकरणे सेतुत्वस्य गौणत्वेननीतत्वेपि उन्मानादीनां गौणतेरदर्शनादि
त्याशंक्य सिद्धांतयति परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः ३१ तत्र पूर्वपक्षे पूर्वाधिकरणसिद्धांतासिद्धिः
फलं सिद्धांते तत्सिद्धिरिति बोध्यं अत्र ब्रह्मातिरिक्तं वस्त्वस्ति नवेति संशये अस्तीत्याह परमिति अतो ब्र
ह्मणः परं वस्त्वस्ति अयमात्मा स सेतुरिति ब्रह्मणः सेतुत्वव्यपदेशात् तथा च ब्रह्म सद्वितीयं सेतु
त्वात् लोकसेतुवदित्यनुमानमुक्तं ब्रह्म चतुष्पादित्युक्तत्वादुन्मानव्यपदेशात् एतावदिदमिति परिच्छि
न्नत्वव्यपदेशात् वेश्मसमीपस्यक्रयसाधनकार्षापणादिवत्सद्वितीयं ब्रह्मेत्यनुमानेन शब्दार्थः चतस्रो
दिशः एकः पादः पृथिव्यंतरिक्षं द्यौः समुद्र इति द्वितीयः पादः अग्निः सूर्यश्चन्द्रमा विद्युदिति तृतीयः पा
दः चक्षुः श्रोत्रं वाक् मन इति चतुर्थः पादः इति श्रुता उपासनार्थं चतुष्पाद्ब्रह्मेत्युक्तमिति मंतव्यं सुषु
प्तौ प्राज्ञेनात्मना शारीरः संपरिष्वक्त इत्यादिना ब्रह्मणः संबंधव्यपदेशात् संबंधस्य च भेदेनाघटादिव
त्सद्वितीयत्वमिति संबंधार्थः आदित्ये हिरण्मयं पुरुषमीश्वरं व्यपदेश्य ततो भेदेनाक्षिपुरुषस्य व्यप
देशात्परमात्मा सद्वितीय इति प्राप्ते सेतुत्वादिहेतोरसिद्धिमाह सामान्यात्तु ३२ स्वदावादिमयेहि सेतुश
ब्दो रूपे लोके न दृष्टान्तरूपे तेन तत्वं ब्रह्मणोस्ति किंतु सेतुर्यथा जलसत्त्वव्यवस्थापकः एवं ब्रह्मणोपि स
कलजगन्मर्यादाव्यवस्थापकत्वेन प्रसिद्धसेतुसामान्यात्सेतुत्वव्यपदेश इत्यर्थः तुशब्दः पूर्वपक्षनिरा

सार्थः एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाविरोधः सर्वेषामनुमानानांबोध्यः ३३ उन्मानव्यपदेशोपिनमु
ख्यइतिद्वितीयंहेतुमप्यसिद्धान्दूषयति बुध्यर्थः पादवत् ३३ ब्रह्मचतुष्पादितिश्रुतावुन्मानव्यपदेशो
बुध्यर्थःउपासनार्थः निर्विशेषस्यबुद्धिस्थत्वायोगात्उपासनाद्वाराबुद्धिस्थत्वायोन्मानव्यपदेशः न
मुख्यइत्यर्थः पादवत् यथाब्रह्मप्रतीकस्यमनसोवाक्प्राणचक्षुःश्रोत्राण्युपासनार्थंपादत्वेनव्यपदि
श्यन्तेतद्वदित्यर्थः ३३ अविशिष्टहेतुद्वयमप्यसिद्धान्दूषयति स्थानविशेषात्प्रकाशादिवत् ३४ स
पुन्नोब्रह्मणोजावेनतद्वटस्यपटेनेवसंबंधः किंतुस्थानविशेषात् बुध्याद्युपाधिविशेषात्स्वाज्ञानस्यविशेष
विज्ञानस्योपाध्युपशमादुपशमे अभिव्यक्तोपाधिप्रयुक्तभेदाभावएवजीवपरयोः सम्पन्नोसंबंधइतिव्य
पदिश्यतेअन्वादिसम्परूषयोर्भेदव्यपदेशोप्यन्वादिस्वरूपस्थानविशेषापेक्षयाप्रकाशादिवत् यथा
सौरःप्रकाशः आकाशोवाअंगुलियोगात् घटसूच्याद्युपाधिविशेषादसंबंधइवभिन्नइवभाति
उपाधिविगमेनतदानीसंबंधइवाभिन्नइवव्यपदिश्यतेतद्वदित्यर्थः तस्माज्जीवपरयोः संबंधोभेद
श्चोपाधिनिमित्तोनस्वाभाविकः ३५ ननुमुख्यएवास्तुतत्राह उपपत्तेश्च ३५ नमुख्यः संबंधोजीव
परयोः सुषुप्तौसंभवति स्वमपीतोभवतीतिस्वरूपस्यैवसंबंधत्वव्यपदेशात्स्वरूपस्यसदानत्वात्सु
षुप्तौगौणःसंबंधत्वमेवएवंभेदोपिनमुख्यः श्रुतिसहस्रविरोधाद्युपपत्तिवशात्नैमित्तिकएवेत्य
र्थः ३५ एवंसेतुत्वादीन्हेतून्निराकृत्यब्रह्मणोद्वितीयत्वेहेत्वंतरमाह तथान्यप्रतिषेधात् ३६

यथासंतुत्वादिहेतुभ्यो न वस्त्वंतरप्रमा तथाहमेवाधस्तादात्मैवाधस्तादिवाक्यैरन्यस्य वस्तुनः प्रतिषेधा
द्द्वितीयमेव ब्रह्मेत्यर्थः ३६ ननु ब्रह्मणोऽद्वितीयत्वे सर्वगतत्वं कथमत आह अनेन सर्वगतत्वमाया
मशब्दादिभ्यः ३७ अनेन सेतुत्वादिव्यपदेशमात्रत्वस्य वस्त्वंतरस्य च प्रतिषेधेन ब्रह्मणः सर्वग
तत्वं सिद्धं अप्रतिषेधे प्रसिद्धसेतुवत् ब्रह्मणोऽसर्वगतत्वं प्रसज्येत सर्वगतत्वे माह आयामेति आ
यामेति आयामशब्दो व्यापकत्ववाचक आकाशवत्सर्वगतश्च नित्य इत्यादिशब्दः आदिपदेन नि
त्यः सर्वगतः स्थाणुरित्यादिस्मृतिरुक्ता तस्माद्द्वितीयस्य ब्रह्मणः आविद्यकं सर्वमादाय श्रु
तिस्मृतिभ्यां सर्वगतत्वं सिद्धं ३७ ननु ब्रह्मातिरिक्तवस्तुनो निषेधे ब्रह्मणो निर्विशेषत्वेन कर्म
फलदातृत्वं न स्यादिमादेये व्यावहारिकफलदातृत्वमविरुद्धमित्याह फलमत उपपत्तेः ३८
पूर्वं निर्विशेषतत्त्वदलसंब्रह्मोक्तमिदानीं तत्पदवाच्यं विचार्यत इति याद संगतिः पूर्वपक्षे कर्मण
एव फलदातृत्वात् ब्रह्मणोऽकिंचित्करत्वसिद्धिः फले सिद्धांते ईश्वरस्यैव फलदातृत्वसिद्धिरि
ति भेदः किं सर्वस्य जंतोः कर्मणः एव फलं भवति उतेश्वरादिति संदेहे अग्रे पूर्वपक्षं निराकरिष्य
न् सिद्धांतमाह फलमिति अतः परमात्मनः फलं सर्वस्य लोकस्य भवितुमर्हतीति क्षणिकात्कर्म
णः फलासंभवेनेश्वरस्यैव फलदातृत्वोपपत्तेरित्यर्थः ३८ श्रुतत्वाच्च ३९ स वा एष महान
जआत्मान्नादो वसुदान इतीश्वरफलदातृत्वस्य श्रुतत्वाच्चेश्वरः फलदातेत्यर्थः अत्र मासम

तान्प्राणिभ्यो ददातीत्यन्नादः वसुदानो धनदाता ३९ शंकते धर्मं जैमिनिरत एव ४० यतः
श्रुत्युपपत्तिभ्यामीश्वरं फलदातारं मन्यते सिद्धांती त्वत्र तत एव श्रुत्युपपत्तिभ्यां धर्मं फलदातारं
जैमिनिराचार्यो मन्यते यावाहि स्वर्गकामो यजेतेति विधिविषयस्य यागस्य स्वर्गस्य धनत्वं श्रुत
तन्निर्वाहाय श्रुतिप्रमाणकैरपूर्वाख्यो व्यापारो यागस्योत एव स्याद्रूपः कल्पनीयः इति यागा
दिधर्म एव फलदातार्ईश्वरस्य सर्वस्याधारणस्य विचित्रफलदातृत्वानुपपत्तेरिति ४० समाध
त्ते पूर्वं तु बादरायणो हेतुव्यपदेशात् ४१ बादरायणस्त्वाचार्यः पूर्वोक्तमीश्वरं फलदातारं
मन्यते उक्तशंकानिरासकः कर्मापूर्वं वा स्वस्वरूपस्य विनियोगस्यादाकारवत् क्षणिकत्वभवि
तुमर्हति अचेतनत्वान्मृदादिवदित्यनुमाने संभाविते पि श्रुतिस्मृतीप्रमाण्याति हेतुव्यपदेशा
दिति एष एव साधु कर्म कारयतीत्यत्रादो वसुदान इत्यादिश्रुत्या लभन्ते च ततः कामान्मयैव।
विहितान्हितानित्यादिस्मृत्या चेश्वरस्य धर्माधर्मतत्फले च हेतुत्वेन व्यपदिष्टत्वादित्यर्थः तस्मा
त्कर्मसापेक्षादीश्वरादेव सर्वेषां फलसिद्धिरिति सिद्धं ४२॥ राम ॥ राम

॥इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां तृतीयाध्यायस्य द्वितीय ॥
॥ पादः ॥ २ ॥

॥ शिव शिव शिव शिव शिव शिव

९०

ॐ ॥ एवं तत्पदलक्ष्यवाच्यात्मकं निर्गुणं सगुणं ब्रह्म ज्ञेयं व्याख्यातमिति तज्ज्ञानीतसदज्ञानं किं
प्रकारकमित्यपेक्षायां तद्विचाराय पादोऽन्तरमारभ्यते ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्
१ पूर्वपादे वाक्यार्थे नेकारणीभूततत्त्वपदार्थनिरूपणं कृतं अस्मिन्पादे वाक्यार्थनिर्धार्यं
तद्द्वयनयोः पादयोर्हेतुहेतुमद्भावः संगतिः सगुणविद्यायाः सत्त्वशुद्धिद्वारा वाक्यार्थज्ञा
नोपयोगित्वात्तत्सकार्थं विचार्यते इति मन्तव्यः तत्र तावत्सगुणब्रह्मप्राणपंचाग्न्यादिविष
येषूपासनेषु भेदविचारारंभे किं प्रतिवेदान्तं प्राण्युपासनं पंचाग्न्युपासनमित्येवं जातीयकमु
पासनं भिद्यते न वेति पूर्वपक्षे उपासनानां भेदादेकवेदान्तोक्तोपासनस्य गुणानां वेदान्तान्तरो
क्तोपासने नानुपसंहारः सिद्धान्ते उपासनैक्यात् गुणोपसंहारः तदुपासनानां सत्त्वशुद्धिद्वारा वाक्यार्थ
ज्ञाने मुक्तिरिति फलिष्यति द्रव्यदेवते यथा यागस्वरूपं तथोपासनस्योपास्यरूपं तथा च यथा
आमिदाजिनयागयोः द्रव्यरूपभेदाद्भेदः एवमुपासनानामुपास्यरूपभेदाद्भेदो न्याय्यः
तथा हि क्वचित्पंचाग्निविद्यायां षष्ठोऽग्निरुपास्यः श्रूयते क्वचित्पञ्चैवाग्नयः इत्येवं
रूपेण तत्र तत्रोपासने रूपभेदावगमादुपासनं भिद्यत इति प्राप्ते ब्रूमः सर्ववेदान्तैः प्रत्ययं
प्रतीयमानान्युपासनानि न भिद्यन्ते कुतः चोदनाद्यविशेषात् आदिपदेन कर्माभेदहेतवो
नोपन्यस्ताः संयोगरूपसमाख्या गृह्यन्ते चोदनासंयोगरूपसमाख्यानामविशेषादित्य

९०

र्यः यथा सर्वशाखास्वग्निहोत्रं जुहोतीति चोदनायास्त्वविशेषान्नियमाग्निहोत्रमेकं तथा यो ह वै ज्ये-
ष्ठं च श्रेष्ठं च प्राणं वेदेत्यादिचोदनायाः छंदोगानां वाजसनेयिनां चाविशिष्टत्वादेकैव प्राणविद्या
सर्वेषां शाखिनामिति गम्यते यः प्राणोपासकः स ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति फलसंयोगस्य
सर्वत्राविशिष्टत्वाच्च न विद्याभेदः ज्येष्ठत्वादिगुणकप्राणोपास्यरूपस्य सर्वत्राविशिष्ट-
त्वाच्च तथा प्राणविद्येति समाख्यायाः सर्वत्राविशेषाच्च विद्यैकमिति १ भेदान्नेति चेन्नैकस्या-
मपि २ ननु वाजसनेयिनः पंचाग्निविद्यायां षष्ठं प्रसिद्धाग्निमुपास्यत्वेनामनंति तस्य मृतस्य
यजमानस्य ऋत्विग्भिरग्निं प्रापितस्य प्रसिद्धाग्निरेवाग्निर्भवतीति छंदोगास्तु पंचाग्नीन् वेदेत्यामनं-
ति न तु षष्ठमग्निमिति याच रूपभेदादामिक्षाजिनयागयोरिव शाखाद्वये पंचाग्निविद्याया भेदोन्या-
य्य इत्युक्तमिति चेन्न यत एकस्यामपि विद्यायामयं रूपभेद उपपद्यते तथा हि ये हि द्युलोकाद-
यः पंचाग्नयो वाजसनेयिशाखायामुक्ताः तत एव छांदोग्ये प्रत्यभिज्ञायंते ततश्चैन विद्या-
भेदो युक्तः न च षष्ठाग्नितदभावाभ्यां भेदः एकस्मिन्नेवातिरात्रे षोडशीग्रहणतदभाववद्घट-
नात् यद्वानेकगुणप्रत्यभिज्ञानुरोधात् छंदोग्ये षष्ठाग्नेरुपसंहारः कर्त्तव्यः न चाग्निषु
पंचत्वसंख्याश्रवणविरोधः तस्यास्तु बुध्यासंपादिताग्निपरत्वादिति भावः २ ननु ब्रह्मविद्या-
या प्रतिपादकमुंडकाध्ययने शिरस्यंगारपात्रधारणरूपं व्रतं कर्त्तव्यत्वेनोपदिश्यते इतरोपनि।

वेदाध्ययनकाले तु शिरोव्रतं नापेक्ष्यते तथा च मुंडकस्य विद्यापेक्षया इतरेभ्यो निष्कृष्टविद्याभे
दो युक्तः नन्वेकैव विद्या शिरोव्रतरूपधर्ममपेक्षते नापेक्षते चेति युक्तं अतो धर्मभेदाद्विद्याभे
दः स्यादित्याशंक्याह स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ३ स्वा
ध्यायस्यैवैष शिरोव्रताख्यो धर्मो नांग न विद्यायाः कुतः हि यतस्तथात्वेन स्वाध्यायांगत्वेन समा
चारे वेदव्रतोपदेशपरे ग्रंथे शिरोव्रतमपि वेदव्रतत्वेनाथर्वणिकाः समामनंति तथा च यथा
गोदानरूपं वेदव्रतं वेदाध्ययनांगमेवं शिरोव्रतमपि मुंडकाध्ययनांगमेव न मुंडकोक्तवि
द्यांगमित्यर्थः अधिकाराच्च नैतदचीर्णव्रतोऽधीते इत्यत्र स्पष्टं अधिकृतं मुंडकग्रंथजातमपरा
देवोक्ष्याच्चकारात् अधीत इत्यध्ययनशब्दाच्च शिरोव्रतमध्ययनस्यैवांगमित्यर्थः अचीर्णव्रतः
अननुष्ठितशिरोव्रतः तस्य शिरोव्रतस्य मुंडकाध्ययने नियम इत्यत्र दृष्टांतः सववच्चेति यथा
सवाः सप्त होमाः सौर्यादयः शतौदनांताः शाखांतरीयत्रेताग्न्यसंबंधादथर्वणोक्तैका
ग्निसंबंधाच्चैकाग्नीनामाथर्वणिकानामेव नियमं ते तद्वदेतद्वाक्ये अधीत इति शब्दाच्च मुंडकाध्य
यन एव शिरोव्रतस्य नियम इत्यर्थः तस्मात्सर्वप्रविद्यैक्यं दर्शयति च ४ सर्वेदायत्पदमामनं
ति इत्यादिवाक्यं निर्गुणस्य ब्रह्मणो वेद्यस्य सर्ववेदार्थैकत्वेन तद्विद्यायाः सर्वत्रैकत्वं दर्शयतित
था वाजसनेयके सगुणस्य ब्रह्मणो वैश्वानरस्य प्रादेशमात्रत्वेन संपादितस्य छंदोग्येसिद्धव

दुपादानं यस्त्वेतमेवं प्रादेशमात्रं वैश्वानरमुपास्त इति तत्रापि सर्वत्र वैश्वानरविद्याप्राकत्वं दर्शयति तथा
चययानि गुणस्य सगुणस्य वा ब्रह्मण एकत्वेन सर्वत्र श्रूयमाणत्वात् तद्विद्याप्राकत्वं तथा प्राणस्य वि
शेषरूपोकथादीनां सर्वत्र श्रूयमाणत्वादिदमवगम्यते सर्वत्रोपास्य [illegible] मिति तत्तच्छोपासो
क्थादीनामेकत्वात्तदुपासनानामप्यैक्यमिति तत्समभिव्याहारादितरेषामप्युपासनानामभेदसिद्धिरित्य
र्थः ४ उपास्यैक्यविचारस्य प्रयोजनमाह उपसंहारोर्थाभेदाद्विधिशेषवत्समाने च ५ सर्वत्रोपासना
मेकत्वेपि एकशाखोक्तस्य विद्यायां कतिपयगुणा युक्ता यांशाखांतरस्याधिकगुणानामुपसंहारो मिश्रितन
वेतिसंदेह यत्रायां वेतो गुणाः श्रुतास्तैरेवाकांक्षाशांतेर्नोपसंहार इति प्राप्ते ब्रूमः समाने उपासने गुणो
पसंहारो युक्तः कुतः अर्थाभेदात् उपास्यगुणानिर्वर्त्यस्य उपासनरूपार्थस्य सर्वत्र शाखास्वभिन्न
त्वात् न ह्येकमेवोपासनं गुणांतरमपेक्षते नानापेक्षते चेति युक्तं विधिशेषवत् यथाग्निहोत्रस्य सर्व
त्रैकात्तच्छेषाणामुपसंहारस्तद्वदित्यर्थः अत्र पूर्वपक्षे पूर्वाधिकरणे प्रयोजनस्य गुणोपसंहारस्यासि
द्धिः फलं सिद्धांते तत्सिद्धिरिति बोध्यं तस्माच्चोदनाद्यविशेषेण हेतुना कृतस्योपासनैक्यविचारस्य फलं तं
सिद्धांते तत्सिद्धिरिति बोध्यं तस्माच्चोदनाद्यविशेषेण हे ५ इदानीं चोदनाद्यविशेषस्य उपासनैक्यसा
धकत्वापवादार्थमाह अन्यथात्वं शब्दादिति चेन्नाविशेषात् ६ बृहदारण्यके श्रूयते उद्गीथब्राह्मणे
देहेत्र तामस्यात्मासद्वृत्तयः तेऽसुराः याश्च सात्विकवृत्तयस्ते देवाः तेषां देवासुराणामन्योन्यस्प

शाखांत ७

थीनामसत्त्वस्तुद्भवे सात्त्विकवृत्त्युद्भवः सात्त्विकवृत्त्युद्भवे च तामसराजसवृत्त्युद्भव इत्यावेदनरूपां आख्यायिका
तत्र देवाः सामभक्तिरूपेणोद्गीथेनौद्गात्रकर्मणासुरान् जयेम करिष्याम इति बुद्ध्या वाचं प्राणं चक्षुः श्रो
त्रं मनश्चोचुः त्वमस्माकमौद्गात्रं कर्मोद्गीथं कुर्विति ते च वागादयस्तथास्त्वित्युक्त्वा ततः कर्मणि प्रवृ
त्तास्तान् ज्ञात्वासुराः एभिरुद्गातृभिर्देवा अस्मान् जयं करिष्यन्तीति बुद्ध्या ताडितवन्तस्ते च वागाद
यस्ताडिता इति वागादीन् निंदित्वा मुख्यप्राणमुद्गातृत्वेन वरयति अथ हेमं मुख्यप्राणं देवा ऊचुः त्व
मस्माकमुद्गाता भवेति स प्राणस्तथास्त्वित्युक्त्वा कर्मणि प्रवृत्तस्तं चोद्गातारं प्राणं प्राप्य हतकामा
असुराः पाषाणं प्राप्य वेगवान् लोष्ट इव विशीर्णावयवा अभवन्निति प्राणस्तुतिं कृत्वा उद्गीथक
र्त्तारं प्राणमुपास्यं दर्शयतीति एवमेव छांदोग्येऽपि श्रूयते तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभवि
ष्यामः तत्र तत्र पूर्ववत् [illegible] देवा उद्गीथोपलक्षितमौद्गात्रं कर्माहृतवन्तोऽनेन कर्मणै
नान् तामसवृत्तिलक्षणान् असुरानभिभविष्याम इत्युपक्रम्य पूर्ववद्वागादीन्निंदित्वा अथ ह
य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे देवा इति सर्वत्र वागादिशब्दास्तदभिमानिदेवतापर
ता बोध्याः तत्र संशयः किमनयोर्विद्ययोर्भेदः उताभेदः इति पूर्वपक्षे गुणोपसंहारः फलं सिद्धांते
विद्ययोर्भेदान्नोपसंहार इति भेदः चोदनाद्यविशेषादित्यत्र समाख्यायाः अविशेषाद्धि एकामि
त्युक्ते तद्वत्राप्युद्गीथविद्येति समाख्याया अविशेषाद्धि एकामेवेति दृष्टांतसंगत्या प्राप्तं तदाक्षिपति

62

वे॰ सू॰ वृ॰
६२

सिद्धांती अन्यथात्वं शब्दादिति चेदिति छांदोग्य बृहदारण्यकवाक्याभ्यां प्राणस्याऽन्यथात्वं भिन्नाकारत्वं बृ
हदारण्यके उद्गायकर्तृत्वं छांदोग्ये उद्गीथकर्मात्मकत्वमित्येवं रूपं गम्यते तथा च कर्तृकर्मणोर्भेदनोपा
स्यभेदान्न विद्यैक्यमिति शंकार्थः पूर्वपक्षी परिहरतीति नेति कुतः अविशेषात् देवासुरसंग्रामोपक्रमादीनां
दौ नामर्थोऽभयत्राविशेषात् छांदोग्ये तमुद्गीथमुपासांचक्रिरे इति प्राणस्योद्गायकर्मात्मकत्वश्र
वणेन त्वयोद्गीथकर्तृत्वेनैव व्याख्येयमिति विद्यैक्यमिति ६ प्रान्नेति चेत्तथापि नवा प्रकरणभेदात्परो
वरीयस्त्वादिवत् ७ नैवात्र विद्यैक्यं प्रयुक्तं प्रकरणभेदात् उपक्रमभेदादित्यर्थः तथा हि ओमित्येतद
क्षरमुद्गीथमुपासीतेत्योंकाराद्यनेकवर्णरूपावयवविशिष्टस्य सामभक्तिविशेषस्योद्गीथस्यावयव
भूतमोंकारमुपास्यमुपक्रम्य तस्यैवोंकारस्य पृथिव्यादिभ्यः सारतमत्वादिगुणानुक्त्वा पुनरुद्गीथा
वयवमोंकारमनुवर्त्य देवासुराख्यायिकारूपेण प्राणमुद्गीथमुपासांचक्रिरे देवा इत्याह अन्यथोद्गी
थावयव ओंकार एव स्वीकर्तव्यः उपक्रमे उद्गीथपदेन तस्यैवोक्तत्वात् अन्यथा उद्गीथपदेन सकल
सामभक्तिग्रहणे उद्गीथकर्तृत्वलक्षणायां चोपक्रमो बाध्येत तस्मादत्रोद्गीथावयवे ओंकारे प्राणउपा
स्य बृहदारण्यके तूद्गीथकर्ता प्राण उपास्य इत्यनयोर्विद्ययोर्भेद इति परोवरीयस्त्वादिवत् यथा उद्गीथो
पासितसाम्येप्येकत्रोद्गीथे परमात्माध्यासेन प्राणाद्येपुरुषगतहिरण्यश्मश्रुत्वादिगुणविशि
ष्टोद्गीथोपास्तिनाङ्गीक्रियते तद्वदित्यर्थः ७ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ८ ननूद्गीथविद्येति संज्ञा

रा ६२

षा एकत्वाख्यात्वा हृदये विधेयक्रमित्युक्तमिति चेन्नत्रोत्तरमुक्तं न वाक्यकरणभेदादिति सूत्रे संज्ञाकरणस
पौरुषेयत्वान्नविधेयकसंपादकत्वमिति भावः किंच तत्संस्तैकत्वे परोवरीयस्त्वाद्युपासनयोर्भिन्नयो
रप्यस्ति उद्गीथविधेयेति सूत्रस्यापि शब्देनान्योपदिष्टत्वात्ः सत्यं तेयथा एकस्मिन्काठकग्रंथे चोदिता
नामित्रानां कर्मणां काठकैकसंज्ञकत्वमस्ति अतः पौरुषेयसंज्ञैकं विधेयकोऽत्र प्रयोजकमिति भावः त
स्मात्कं दोगवाजसनेयिशाखयोः प्रकृतविद्ययोर्भेद इति सिद्धं ८ नन्वोमित्येतदक्षरमुद्गीथमुपा
सीतेत्युपक्रमे उद्गीथपदस्योंकारपरत्वनिर्धारणेन सिद्धत्वात् कुतः तदपुनरुक्तं उपक्रमवाक्यस्यान्यथापि
योजनासंभवेन निर्धारणायोगादित्याशंक्य समाधत्ते व्याप्तेश्च समंजसं ९ ओमित्येतदक्षरमुद्गी
थमित्योंकारोद्गीथत्वयोः समानाधिकरण्यप्रतिभासोऽस्ति सकिंनाम ब्रह्मदृष्टिवदध्यास उत यद्रजतं
सा शुक्तिरिति वदपवादः किंवा भूसुरो ब्राह्मण इति वदेकत्वधर्मावभावः आहोस्विन्नीलमुत्पलमितिव
दुद्गीथोंकारयोर्विशेषणविशेष्यभावावभास इति संशयः तत्र पूर्वपक्षे निर्धारणे कारणाभावादनि
र्धारितार्थकमिदमुपक्रमवाक्यमप्रमाणमिति तन्मूलकस्य पूर्वाधिकरणसिद्धांतस्याऽसिद्धिः फ
ले सिद्धांते तु ओंकारस्य प्रत्यंचं प्रतनुवाकं प्रति सामचार्यत्वेषु व्याप्तेः व्यापित्वात् कोवा ओंकार उपास्य
इत्याकांक्षायामुद्गीथावयवत्वेनोंकारो विशेष्यते ओमित्येतदक्षरमुद्गीथमुपासीतेति तथा चोद्गीथ
मित्योंकारस्य विशेषणमित्येवं समंजसं उत्पलस्य नीलत्वमिव न तु अध्यासादिपक्षग्रहणं युक्तमित्यु

स्यपक्रमवाक्यस्य निर्धारितार्थतां तन्न्यलकस्य सिद्धांतितिवोध्यं सूत्रे तवर्षच शब्देनाध्यासादिपक्षाणाम
संभवाः सूचितः तथाहि उद्गीथे ओंकारस्य ओंकारे वोद्गीथस्याध्यासे तन्नोपास्यतेऽन्तरत्वविधीयमा
नाद्वोंकारे प्राणदृष्टिरूपादुपासनाद्भिन्नमिदमुपासनमिति वक्तव्यं तथाच पृथक्फलकल्पना
प्रसंगात् सिद्धांतितत्वप्राणस्य पञ्चोंकारोत्र विशेष्य समर्प्यते इति नायं दोषः नापि द्वितीयः पक्षः ओंका
रोद्गीथयोरन्यतरज्ञानस्यान्यतरज्ञानसाधकत्वादर्शनात् नापि तृतीयः पक्षः ओंकारोद्गीथश
ब्दयोः पर्यायत्वाभावात् इति तस्मात्पटैकदेशे वाग्ग्धे पटोदग्ध इत्यादिवदुद्गीथपदस्यावयवमोंका
रं लक्षयतीति सिद्धं ९ सर्वाभेदादन्यत्रेमे १० वाजसनेयके छांदोग्ये च प्राणसंवादे मुख्यप्राणस्य
श्रैष्ठ्यगुणकस्योपास्यत्वमुक्तं वाक्चक्षुः श्रोत्रमनो रेतांसि क्रमेण वसिष्ठत्वप्रतिष्ठात्वसंपत्त्वायतनत्वप्रज
निमत्वरूपगुणयुक्तानि संकीर्तनेन च वागादयः प्राणाधीनस्थितिकत्वं स्वेषु निश्चित्य स्वनिष्ठान्
वशिष्ठत्वादिगुणान् प्राणे समर्पितवंतः इत्युक्तं वाचो हि वशिष्ठत्वं वाग्मिनो लोके श्रेष्ठत्वेन वासदर्शना
त् चक्षुषः प्रतिष्ठात्वं चक्षुष्मतः स्खलनपादप्रतिष्ठादर्शनात् श्रोत्रस्य संपत्त्वं श्रुतात्मनिर्धार
णेन धनसंपत्तिदर्शनात् मनो हि भोग्याकारवृत्तिद्वारा भोगानामायतनं पुरुषाद्याकारेण प
रिणममानं रेतो जननमन्तव्यं एवं कौशीतक्यादिशाखास्वपि प्राणसंवादेषु अथातो निःश्रेय
संदानं एता ह वै देवता अहं श्रेयसे विवदमाना इत्यादिना प्राणस्य श्रैष्ठ्यमुक्तं वसिष्ठत्वादिगुणा

स्तुनोक्ताः निश्श्रेयसं श्रेष्ठं स्वदानेन निर्धारणं तद्धि नोपास्तेरयास्तेरयोगात् तदारभ्यते इत्याह अथेति ए
तावाग्याद्यभिमानिन्यो देवता अहंश्रेयसे स्वकीयश्रेष्ठत्वायेत्यर्थः तत्र किं वसिष्ठादिगुणानां क्वचित्
श्रुतानामन्यत्रोपसंहारोऽस्ति न वेति संदेहे पूर्वमोंकारस्य समीपस्य गुणैरेवोपास्यत्ववदत्रापि यत्र
गुणाः श्रुतास्तैरेवोपास्यत्वं प्राणस्येति नोपसंहार इति दृष्टांतेन प्राप्ते ब्रूमः अन्यत्र वसिष्ठत्वादि
गुणानामश्रवणस्थले इमे वसिष्ठत्वादयो गुणा उपसंहर्तव्याः कुतः सर्वाभेदात् सर्वासु शाखा
सु प्राणोपासनस्य प्राणसंवादस्थस्याऽभिन्नत्वादित्यर्थः एकस्यामेव विद्यायां वसिष्ठत्वाद्यपेक्षात
द्भाववत्त्वेर्विरोधादिति भावः १० ननु प्राणस्य सविशेषत्वाद्भवतु शाखांतरीयगुणोपसंहारः ब्र
ह्मणस्तु निर्विशेषत्वेन स्वशाखागततद्धर्मैरेव ज्ञानसंभवान्नान्यशाखाश्रुतानामानंदादीनामुप
संहार इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते आनंदादयः प्रधानस्य १२ निर्गुणब्रह्मपरासु श्रु
तिषु आनंदस्वरूपत्वविज्ञानघनत्वापरिच्छिन्नत्वाद्वितीयत्वादयो धर्माः क्वचित्क्वचिच्छ्रूयंते तत्र
संशयः किं यत्र ये धर्माः श्रुतास्त एव तत्र ज्ञेयाः उत सर्वे धर्माः सर्वत्रोपसंहर्तव्याः इति अत्र
पूर्वपक्षे केषांचिद्धर्माणामनुपसंहारो यावत्तत्स्वरूपत्वानास्ति हि फलं सिद्धांते न सिद्धिरिति
वाच्यं तत्रानंदादीनां नोपसंहार इति प्राप्ते ब्रूमः प्रधानस्य ब्रह्मण आनंदस्वरूपत्वादयो धर्माः सर्व
त्रोपसंहर्तव्याः वैयर्थ्ये नविद्यैक्यादिति पूर्वसूत्रोक्तहेतोरित्यर्थः ११ ननु तैत्तिरीयके आनंद

64

वे.सू.वृ.
६४

मयंपरमात्मानंप्रस्तुत्यतस्यप्रियमेवशिरः मोदोदक्षिणः पक्षः प्रमोदः उत्तरपक्षः आनंदआत्मेति
प्रियशिरस्त्वादयो धर्माः श्रूयंते वामप्यानंदस्वरूपत्वादिधर्माणामिव सर्वत्रोपसंहारः स्यात् ब्रह्मय
मत्वाविशिष्टादिति तत्राह प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे १२ प्रियशिरस्त्वादिधर्मा।
णां न सर्वत्र प्राप्तिः हि यतः प्रियमोदप्रमोदानंदाः परस्परापेक्षयोपचितापचितस्वरूपाः उपचयापच
यवंतो हि धर्मा धर्मिणि भेदे सत्येव स्वाभाविको संभवतः ब्रह्मणस्त्वद्वितीयत्वान्नोपचितापचितप्रि
यादिधर्मस्वभावत्व अस्वभावधर्माणां ब्रह्मज्ञानार्थे नोपसंहार इत्यर्थः वेदनजं स्वं प्रियं पुत्रप्रा
प्तिजं मोदः स एव प्रकृष्टः प्रमोदः सुखसामान्यमानंद इति तेषां तारतम्यं बोध्यं अत्र भवद्भिः सूत्र
कारैरानंदमयस्य ब्रह्मत्वं प्रियादीनां तद्धर्मत्वं च हेत्वं येधिताः तस्यात्र फलं बोध्यं तथाहि वेद्यैको
विद्यैकाद्यानंदादिधर्माणां सर्वत्रोपसंहारे सगुणब्रह्मोपासनेषु भिन्नेष्वपि वेद्यस्य सगुणस्य ब्र
ह्मण एकत्वेनोपासनैक्याय तावन्योन्यगुणोपसंहारः स्यादिति शंकानिरासः फले उपासनानां वि
धिप्रकार तं आयत्र यावद्गुणविशिष्टमुपासने विधीयते तत्र तावद्गुणविशिष्टमेव कर्तव्यं तत्तत्फलस्य
तेनैव सिद्धिः वस्तुपरतंत्रनिर्गुणविद्याफलस्य विद्यानिवृत्तेः यावत्स्वरूपज्ञानमंतरेणासंभवा
त्सर्वत्रानंदादगुणानामुपसंहार इति शंकानिरासप्रकारः १२ उपास्यब्रह्मधर्माणां सर्वत्र न प्रा
प्तिरित्युक्तं तदपेक्षयाज्ञेयधर्माणामानंदादीनां सर्वत्र प्राप्तिरिति विशेषमाह ॥ इतरे त्वर्थसामान्या

६४

ते १२ उपास्यधर्मापेक्षयाऽन्तरेत्वानां नादादयो धर्मा ज्ञानैकफलकाः सर्वत्रोपसंह्रियन्ते अर्थस्याप
रस्य ब्रह्मणः सामान्यात् एकत्वादिसमर्थ्यः उपसंहारं विना यथावत्स्वरूपविषयकमहावाक्यार्थज्ञानस्या
प्याविद्यानिवृत्तेरसंभवादिति भाव १३ आध्यानाय प्रयोजनाभावात् १४ कठवल्लीषु पठ्यते इं
द्रियेभ्यः परा ह्यर्था इत्यारभ्य पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति तत्र संशयः किमिमानि
वाक्यानि भिन्नानि आत्मपरमेकमेव वाक्यमिति पूर्वपक्षे इंद्रियादिपरत्वविशिष्टस्यार्थादेः रूपस्य स्य प्र
तिवाक्यं भेदाद्विद्याभेदः फले भिन्ने निर्विशेषात्मप्रदर्शनपरमेकमेव वाक्यमिति विद्यैकाफलं अ
नन्तरपूर्वोत्तरपक्षयोर्विद्याभेदाभेदयोः पर्यवसानादस्याधिकरणस्य पादसंगतिः पूर्वत्र ब्रह्मस्वरू
पाणामानंदादीनामुपसंहार्याणां ब्रह्मज्ञानोपायत्वं चिंतितम् इदानीम् ब्रह्मस्वरूपस्यारूपस्यानुपसं
हार्यस्यार्थादिपरत्वरूपधर्मस्य ब्रह्मज्ञानोपायत्वमुच्यते उभयैकफलकत्वमवांतरसंगतिः तत्रेमा
नि वाक्यानि भिन्नानीति प्राप्ते ब्रूमः आध्यानाय ध्यानसाध्यसाक्षात्काराय पुरुष एवार्थादिभ्यः प
रत्वेन प्रतिपाद्यते इत्येकमेव वाक्यं न तु इंद्रियादिपरत्वेनार्थादयः प्रतिपाद्याः प्रयोजनाभावात् न
हीन्द्रियपरत्वेनार्थज्ञानं स्वतः किंचित्फलं साधयति अतः प्रतिपाद्यभेदाभावान्न वाक्यभेदः पु
रुषज्ञाने फलं दृत्तरिति तत्रैवोक्तं निचाय्य तं मृत्युमुखात्प्रमुच्यते इति १४ एवं वाक्यस्यात्ममात्र
परत्वे फलं वक्तुं लिंगमुक्त्वा पूर्ववत्स्ववचनमपि लिंगमाह आत्मशब्दाच्च १५ एष सर्वेषु भूतेषु गू

द्योत्मान प्रकाशते इत्यपते तत्स्रियावुध्यास्तस्य पास्तस्य दर्शिमिदिति प्रकृतपुरुषे आत्मशब्दस्य वर्णाच्चा
त्मपरमेवेदं वाक्यं तस्यात्मनः श्रुत्या मानां नरावस्य तत्रूपापूर्वत्वप्रतिपादनादिति भावः १५ आत्म
गृहीतिरितरवदुत्तरात १६ ऐतरेयके श्रूयते आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् स ई
क्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतांभो मरीचीर्मरमापोदोंभः परेण दिवं द्यौः प्रतिष्ठांत रि
क्षं मरीचयः पृथिवी मरो या अधस्तात्ता आप इति लोकानेवादृष्ट्वा अंभ इति तद्व्याचष्टे श्रुतिरदोंभः
इतिन दंभः यत्परेण दिवं दिवः परस्तादवर्तते तस्य च परस्तादवर्तमानस्य द्यौः प्रतिष्ठाश्रयः स्याप्यंभः
शब्द वाच्यादिवमारभ्योपरितन लोकाम्बाद्भूमसरंभोभिः आप्रित्वादंभ इत्यर्थं तदित्यर्थः स्वर्गलोका
अंतरिक्षलोकः मरीचिव्याप्तत्वान्मरीचयः स्थानभेदापेक्षया बहुवचनं प्रियं तस्मिन्भूतानि
इति पृथिवी लोको मरः यानि पृथिव्या अधस्तात्तालान्यवकूलानि ता आप इत्यर्थः तत्र संशयः किमा
त्मपदेन हिरण्यगर्भ उच्यते उत परमात्मेति पूर्वपदे आत्मपदस्य परमात्मपरत्वाभावात्तस्मित्य
र्थ नानेह्रादि धर्माणमत्रोपसंहार इति फलं सिद्धांते परमात्मन एवैकात्म्यत्वात्तस्मित्यर्थं मस्यानं
द्वादि धर्माणमत्रोपसंहार इति मंतव्यं तत्र पूर्ववाक्यभेदमियार्थादीनां पृथक्प्रतिपाद्यत्वं नाशी
स्युक्ते तर्हि प्रजायते रेतः कार्यं देवा इत्यादि पूर्ववाक्ये हिरण्यगर्भस्य प्रकृतत्वात्स एवात्मशब्देनो
च्यत इतियुक्तं अन्यथा वाक्यभेदप्रसंगादिति दृष्टांतसंगत्या प्राप्ते ब्रूमः अस्मिन्नैतरेय वाक्ये आत्मश

शब्देन परमात्मन एव गृहीतिः नान्यस्येतरवत् यथा इतरेषु सृष्टिवाक्येष्वात्मनः आकाशः संभूत इत्यादि
ष्वात्मशब्देन परमात्मनः एव ग्रहणं तद्वदत्रापि कुतः उत्तरात् स ईक्षत लोकान्नु सृजा इति स इमांल्लो
कानसृजत इति ईक्षणपूर्वकसृष्टत्वरूपोत्तरविशेषणादित्यर्थः तच्च विशेषणं परमात्मन्येव मुख्य
त्वेन संभवति नेतरेष्विव गौणमिति भावः १६ अन्वयादिति चेत्स्यादवधारणात् १७ पूर्ववाक्यादिपर्यालो
चनया प्रजापतावेव वाक्यस्याऽन्वयदर्शनात् न परमात्मग्रहणं युक्तमिति चेत् अत्रोच्यते स्यादवधा
रणादिति अत्र परमात्मन एव ग्रहणं युक्तं स्यात् आत्मा वा इदमेक एवाग्र आसीदिति सृष्टेः प्रागेक
त्वावधारणस्य परमात्मन्येव संभवादित्यर्थः न चास्मिन् वाक्ये लोकसृष्टत्वं श्रूयमाणं हिरण्यग
र्भमेव गमयतीति अन्यथा परमात्मग्रहणे महाभूतसृष्टिः श्रूयते इति वाच्यं छान्दोग्ये तेज आदिसृष्टिश्रव
णेपि यथा आकाशवायुसृष्ट्युपसंहारस्तद्वदत्रापि महाभूतसृष्ट्युपसंहारात् तस्मादस्मिन् वाक्ये आ
त्मनः परस्यैव ग्रहणमिति सिद्धं सूत्रद्वयस्यापरा व्याख्या आत्मगृहीतिरितरवदुत्तरात् बृहदा
रण्यके कतम आत्मेति प्रक्रमे योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्यात्मशब्देनोपक्रम्य त
स्यैवात्मनोऽसंगत्वादिकमुक्त्वा स वा एष महानज आत्मेति ब्रह्मात्मतामुपसंहरति छान्दोग्ये तु सदे
व सौम्येदमग्र आसीदेकमेवाद्वितीयमिति विनैवात्मशब्दं सन्मात्रमुपक्रम्यान्ते स आत्मा तत्त्वमसी
ति ब्रह्मात्मत्वमुपसंहरति तत्र संशयः किमनयोर्वाक्ययोस्तुल्यार्थत्वं उत भिन्नार्थत्वमिति पूर्वपक्ष

66

वे.सू.व.
६६

तेऽत्वनयोर्वाक्ययोरुपक्रमवैषम्याद्दर्शभेदेन विद्ययोर्भेदात्तान्योन्यं गुणोपसंहारः किं तु बृहदारण्य
के निर्गुणविद्या छांदोग्ये उपक्रांतसत्तासामान्यो ब्रह्मत्वोपासनेति फलं सिद्धांते छांदोग्ये सत्पदेनात्म
नः एवग्रहीतिः इतरवत् बृहदारण्यके आत्मपदेनात्मग्रहणवत् उत्तरात्तत्त्वमसीत्युपसंहा
रबलादित्युभयत्रविद्यैक्यादन्योन्यं गुणोपसंहार इति पूर्वाधिकरणे वाक्यबलो दर्शादिपरत्वोपरि
त्यज्यविद्यैक्यमुक्तं तर्हि प्रकृतेऽप्युपक्रमभेदेन वाक्यभेदाद्विद्यैक्यं न स्यादिति प्रत्युदाहरणसंगत्यास्या
धिकरणस्य वा अन्यत्रान्वयादिति चेत्स्यादवधारणात् ननूपसंहारबलात्सत्पदेनात्मग्रहीतिरित्यसंग
तेऽउपसंहारस्योपक्रमान्वयात्तेउपक्रमपरत्वे तत्त्वादित्याशंक्यां शार्यः परिहरति स्यादवधारणादिति
सत्पदेनात्मन एवग्रहीति [illegible] युक्तास्यात् सदेवेत्यद्वितीयत्वावधारणात् सत्तासामान्यस्य च सद्वि
तीयत्वादवधारणानुपपत्तेरि त्यर्थः अयंभावः आरंभणाधिकरणे ब्रह्मातिरिक्तवस्तुजातस्य मि
थ्यात्वसाधनात्सामान्यस्य सत्पदार्थत्वानुपपत्तेः सत्पदेनात्मन एवोपक्रमः सदुपक्रमस्य ब्रह्म
सत्तासामान्यपरत्वसंदेहेऽपि तत्त्वमसीति वाक्यशेषात् ब्रह्मपरत्वनिर्णयः नच शाखाद्वये आत्मस
च्छब्दाभ्यां जीवब्रह्मणोरुपक्रमाद्वैषम्यं उभयोर्लक्ष्यैक्येना वैषम्यादिति तस्मादनयोर्वाक्ययोरेकार्थ
त्वमिति सिद्धं १७ कार्याख्यानादपूर्वं १८ वाजसनेयके प्राणसंवादे प्राणो वागादीन्प्रपृच्छ मम
किमन्नं किं वास इति ते प्रत्यूचुः यदिदं किंचाश्वभ्य आकृमिभ्य आकीटपतंगेभ्यस्तत्तेऽन्नमा

६६

योवासइतितदनंतरंश्रूयते तद्विद्वांसः श्रोत्रियाःशिश्यंतः आचामंत्यशित्वाचाचामंत्येतमेवतद
नमनग्नंकुर्वंतोमन्यंत तस्मादेवंविदशिष्यन्नाचामेदशित्वाचाचामेदेतमेवतदनमनग्नंकुरुतइति॥
यस्मात्प्राणस्यापोवासस्तस्मादितस्मिन्नर्थेतच्छब्दः विद्वांसः प्राणविदः श्रोत्रियाः यक्ष्यतश्चेष्टास्यु
माः भोजनात्पूर्वोत्तरकालयोरचमनंकुर्वंतितत्तेनाचमनसंबंधिनापवासस्तेतमेवानंप्राणमनग्न
मनाच्छादितंकुर्वंतोमन्यंतेचिंतयंतिपूर्वेजनाः तस्मादिदानींतनोपिप्राणविदेवंकुर्यादित्यर्थः॥ छांदो
ग्येप्येवमेवश्रूयते तस्माद्वा एतदशिष्यंतःपुरस्ताच्चोपरिष्टाच्चाद्भिःपरिदधतीति तस्मात्प्राणप्रत्य
योवासस्त्वादित्यर्थः अत्रमशिष्यंतः प्राणविदः आचमनंकुर्वंतः एतत्कुर्वंतिकिमेतत् यत्
भोजनात्पूर्वमूर्ध्वंचाद्भिः प्राणंपरिदधतिआच्छादयंतीत्यर्थः तत्राचमनीयास्वप्सु प्राणवासस्त्व
ध्यानमाचमनंचप्रतीयतेतत्रोभयविधानेवाक्यभेदभयादेकमेवविधेयंतदेकंकिमाचमनंविधे
यंउतवासस्त्वध्यानमिति संशयः पूर्वपक्षे प्राणविद्यागतत्वेनापूर्वस्याचामनस्यविधेयत्वात्तस्याच
मनस्य अन्यत्रप्राणविद्यायामुपसंहारः फलंसिद्धांतेत्वनुपसंहारइतिमंतव्यं तत्रसंदिग्धसदुपक्र
मस्यवाक्यशेषाद्विर्णयवदाचामतीतिवर्तमानोपदेशस्यविधित्वसंदेहेआचामेदितिवाक्यशेषाद्वि
धित्वनिर्णयइतिदृष्टांतसंगत्याप्राप्तेब्रूमः वासस्त्वध्यानमेवापूर्वंप्राणविद्यागतत्वेनविधेयंयथा
प्राणविद्यागतत्वेनस्मादिमर्यादस्यान्नस्यप्राणंप्रत्यन्नत्वेनध्यानंविधीयतेतदन्नत्वाचमनमन्त्रवि

येयंकुतः कार्याख्यानात् द्विजो नित्यमुपस्पृशेदित्यादिना स्मार्तविधिना मकलानुष्ठांगत्वेन अपूर्वं
कार्यस्याचमनस्य प्राणविद्यायामपि प्राप्तस्याख्यानात् तदीयास्य पूर्ववासस्त्वविधानार्थमनुवादादि
त्यर्थः १८ समान एवंचाभेदात् १९ वाजसनेयिशाखायामग्निरहस्ये शांडिल्यविद्या श्रुता तत्र गुणाः
श्रूयते स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमित्यादिना तस्यामेव शाखायां बृहदा
रण्यके पुनः श्रूयते शाण्डिल्येन दृष्टा विद्या मनोमयोयं पुरुषो भाः सत्यस्तस्मिन्नंतर्हृदये यथा व्री
हिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंचेति भाः प्रकाशात्म
कः सत्यः परमार्थः तस्मिन्मनोमय पदप्रकृतिभूते मनःशब्देन प्रस्तुते हृदये अंतः यथा व्रीह्या
दिस्तथा नातिप्रमाणः पुरुषोस्ति स एव सर्वस्येशान इत्यादिगुणक इत्यर्थः तत्र संशयः किमग्निर
हस्य बृहदारण्यकस्थयोः अनयोर्विद्ययोर्भेदः उत ऐक्यमिति पूर्वपक्षे विद्ययोर्भेदाद्गुणानु
पसंहारः फलं सिद्धांते विद्यैक्याद्गुणोपसंहार इति बोध्यं पूर्वं प्राप्ताचमनानुवादेन वासस्त्वध्या
नविधेयुक्तिमित्युक्तं इह तूक्तवाक्ययोः एकस्यानुवादकत्वं एकस्य विद्याविधायकत्वमित्यत्र नियामका
भावात् उभयोरपि स्वनिकटस्थगुणविशिष्टविद्याविधायकत्वं इत्यनयोर्विद्ययोर्भेद इति प्रत्युदा
हरणेन प्राप्ते ब्रूमः यथाभिन्नास्वपि शाखास्वेकविद्यायां गुणोपसंहार एवं भवति एवं समानचैकस्या
मपि शाखायां भवितुं युक्तं कुतः अभेदात् उपास्यस्य मनोमयत्वादिगुणकस्योभयत्राप्यभेदेन

प्रतिभिज्ञानादित्यर्थः यत्तु एकस्योत्पादकत्वं एकस्य विधायकत्वमित्यत्र नियामकाभाव इति तत्रा
ग्निरहस्ये बहूनां गुणानां श्रवणेन तत्रैव विद्योत्पत्तिविधिकल्पनात् बृहदारण्यके तु विद्यैक्यप्र
त्यभिज्ञानार्थं तत्रोक्तमनोमयत्वाद्यल्पगुणानुवादेन सर्वशात्वादयो गुणा विधीयते इति न
किंचिद्बाधकं तस्मादुभयत्र शांडिल्यविद्यैक्यमिति सिद्धं १९ संबंधादेवमन्यत्रापि २० बृहदार
ण्यके सत्यं ब्रह्म हिरण्यगर्भाख्यं सत्यमुपक्रम्य तद्यत्तत्सत्यमसौ स आदित्यो य एष एत
स्मिन्मंडले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुष इति तत्रैवं सति यत्तत्सत्यं हिरण्यगर्भाख्यं सोऽसावा
दित्यः नेत्रस्थः पुरुषद्वयमिति श्रुतत्वात् आदित्यिणात्मस्य सत्यस्य स्थानभेदेनादित्यचाक्षुषपुरुषात्म
नवस्थानमुक्तौ आदित्यपुरुषस्य सत्यस्य भूरिति शिरः भुव इति बाहू स्वरिति प्रतिष्ठा पादाविति व्या
हृतिदेहत्वं संपाद्य तस्योपनिषदहरिति अहर्नाम तत्मुक्तं तदनंतरं चाक्षुषपुरुषस्य सत्यस्य पूर्व
वत् व्याहृतिदेहत्वं संपाद्य तस्योपनिषदहमित्यहं नाम तत्मुक्तं उपनिषच्छब्देन देवताप्रकाशकं
रहस्यनामोच्यते अहः शब्दः प्रकाशवाच्यहंशब्दः प्रत्यगात्मवाचीतावहरहंशब्दौ क्रमेणादित्य
चाक्षुषपुरुषयोर्नामनी इति तत्र संशयः ॥ किमसौ सत्यविद्यायां नाम्नोर्व्यवस्थया ध्यानं क
र्तव्यं उत नामद्वयस्य पुरुषद्वयेप्युपसंहार इति पूर्वपक्षे उपसंहारः फलं सिद्धांते त्वनुपसंहार इ
ति तत्र दृष्टान्तसंगत्या पूर्वपक्षयति संबंधादिति यथा शांडिल्यविद्यायामेकशाखीयां विभागेनाधी

तायाउमेकविद्यात्वसंवंधाद्नोभयगुणोपसंहारः पूर्वपक्षः एवमन्यत्रापि सत्यविद्यायां भवितेयुक्तं
एकविद्यात्वसंवंधादित्यर्थः २० समाधत्ते नवाविशेषात् २१ नैवनामद्वयस्य पुरुषद्वयउपसं
हारः विद्यैक्येप्यहरादित्यरूपस्थानविशेषादित्यर्थः तथाहि य एष एतस्मिन्मंडले पुरुषस्तस्याहरि
तिनामेत्युक्त्वा तस्येतितच्छब्देनादित्यमंडलावच्छिन्नस्यैवस्यैव परामर्शात्तस्यैवाहर्नाम तथायुक्तं एवम
हंनामत्वं चाक्षुषपुरुषस्यैव चक्षूरूपस्थानविशेषावच्छिन्नस्यैव तच्छब्देन परामर्शादिति तस्माद
नयोर्नाम्नोर्व्यवस्थितिः २१ दर्शयति च २२ किंच विद्यांतरे हिरण्यश्मश्रुरित्यादिनादित्यपुरु
षस्य रूपमुक्त्वा तद्रूपमक्षिपुरुषेऽतिदिशति तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति अयमतिदेशः र
तस्य विद्यास्थले स्थानभेदाद्वोपसंहारः इति दर्शयति अन्यथा स्थानभेदेपि यद्गुणोपसंहारोंगीका
रे अयमतिदेशो निरर्थक एव स्यादिति तस्मान्नाम्नोर्व्यवस्थेति सिद्धं २२ संभृतिद्युव्याप्त्यपि चातः
२३ पतिशिष्टोपदेशात्मकाखिलग्रंथेषु श्रूयते ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमा
ततानेति वीर्याणि वीर्यवंति पराक्रमविशेषरूपाणि वियदादीनि ब्रह्मज्येष्ठमनन्यापेक्षं कारणं
येषां तानि ब्रह्मज्येष्ठानि लौकिकेश्वर वीर्याणां बलवृद्धिर्मध्ये भंगः संभवति ब्रह्मवीर्याणां त
नैवमित्याह संभृतानीति सर्वाधिकेन ब्रह्मणा गृहीत्वा संभृतानीत्यर्थः तच्च ज्येष्ठं ब्रह्म अग्रे इंद्रा
दिजन्मनः प्रागेव दिवं स्वर्गमाततान प्राप्नुवत् नित्यमेव व्यापकमित्यर्थः एवं संभृतिद्युव्या

स्मादयो गुणाः ब्रह्मणः श्रूयन्ते तत्र संशयः किं तेषां गुणानां तदीयोपनिषद्विहितशाण्डिल्यादिब्रह्मविद्या
स्वसंहारः उत तत्तद्गुणविशिष्टोपासनं पृथगेवात्र विधीयत इति तत्रोपसंहार इति प्राप्ते पूर्वोक्तन्यायमतिदि
शति संभृतीति संभृतिश्च द्युव्याप्तिश्च संभृतिद्युव्याप्ती यथास्थानभेदात्त्वात्र्योर्व्यवस्था एवं संभृत्यादयो शाण्डि
ल्यादिविद्यास्वनोपसंह्रियेरन् एवस्थानभेदादेवेत्यर्थः शाण्डिल्यादिविद्यासु हृदयस्तनत्वं ब्रह्मणः श्रुतं
नैवमत्र तस्मात्संभृत्यादिगुणविशिष्टमुपासनांतरमिति सिद्धं अस्मान्निर्देशान्नात्र पृथक्कमेगमाद्यये
लो २३ पुरुषविद्यायामिव चेतरेषामनाम्नानात् २४ अस्ति तांडिनां पैंगिनां रहस्यब्राह्मणे पुरुषवि
द्या तत्र पुरुषो यज्ञत्वेन कल्पितः तदीयमायुस्त्रेधा विभज्य सवनत्रयं कल्पितं तस्य प्रानि च तुर्विंशतिवर्षा
णि तत्प्रातःसवनं ततः पराणि चतुश्चत्वा ४४ रिंशद्वर्षाणि माध्यंदिनं सवनं ततः पराण्यष्टाचत्वा ४८
रिंशद्वर्षाणि तृतीयसवनं पुरुषविद्याविदः षोडशोत्तरशतवर्षाणि जीवत्वादिनि पिपासादिके दीक्षात्वे
न कल्पितं तैत्तिरीयकेपि तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममित्यादिना पुरु
षयज्ञः श्रूयते तत्र संशयः किमनयोर्विद्ययोरन्योन्यं गुणोपसंहारोस्ति न वेति तत्र पूर्ववदुक्तं संभृत्या
दिगुणाः शाण्डिल्यादिविद्यास्वनोपसंह्रियन्त इति युक्तं हि तन्मात्र स्थारणगुणप्रत्यभिज्ञानाभावात् इह तु मर
णस्यावभृथत्वेन कल्पितस्य गुणस्योभयत्र सत्वेन प्रत्यभिज्ञानात् गुणोपसंहारो युक्तः इति प्राप्ते उदाहरणे
न प्राप्ते ब्रूमः नान्योन्यं गुणोपसंहारः उपासरूपभेदात् तदाहाचार्यः पुरुषइति पुरुषविद्यायामिति

तांड्यादिशाखासु पुरुषविद्यायां यागगुणाम्नानं तथेतरेषां तैत्तिरीयकाणां पुरुषविद्यायां गुणाम्नानाभा
वात् इत्यर्थः अन्यत्र पुरुष एव यज्ञत्वेनोपास्यः तैत्तिरीयके तु विदुषः पुरुषस्य प्रसिद्धो यो यज्ञस्तस्य पुरु
षात्मादि यज्ञमानत्वादिकल्पनयोपास्यत्वोद्देवं बहुतर उपास्यभेदो दृश्यते न द्वेधा च विद्याभेदान्नामोक्तं
गुणोपसंहारः इति यत्तत्वम्प्रयागुणस्योभयत्र सत्वात्यन्यभिन्नानभिन्नत्व बहुगुणभेदे एकस्य प्रत्यभि
ज्ञायकाभावादिति किंच तैत्तिरीयके इत्येवमात्मविद्यामुपदिश्य तच्छेषत्वेन पुरुषयज्ञ उपदिश्यते तस्यै
वं विदुष इति तत्स्य विद्यायोऽश्रवणात् अन्यत्र त्वा पुरुहद्विफलकः पुरुषयज्ञः स्वतंत्र इत्यनयोर्भेदः न्या
य इति २४ वेधाद्यर्थभेदात् २५ आत्याथर्वणिकानामुपनिषदारंभे मंत्रपठनं सर्वं प्रविध्य हृदयं प्रतिध
यमनी प्रवृत्याशिरोभिवृज्यत्रिधाविभक्त इत्यादि तांड्यिनां देव सवितः प्रसव इत्यादि शाकटायनिकानां स्वे
ताम्बाहरतिनीलोसीत्यादि तैत्तिरीयकाणां शन्नोमित्र इत्यादि वाजसनेयिनां तूपनिषदारंभे प्रवर्ग्यब्रा
ह्मणं पठ्यते देवा ह वै सत्रं निषेदुरित्यादि कौषीतकीनामग्निष्टोमब्राह्मणे ब्रह्म वा अग्निष्टोमो ब्र
ह्मैव तदहर्ब्रह्मणैव ते ब्रह्मोपयंति ते मृतत्वमाप्नुवंति य एतदहरुपयंतीत्यादि अयमर्थः अभिचारि
कर्मदेवतामभिचारकर्ता प्रार्थयते हृदेवते मद्रिपोः सर्वमंगं प्रविध्य विदारय हृदयं च विदारय धम
नीश्चिराः प्रवृज्य भिंधि तस्य शिरश्चाभितो भिंधि एवं मद्रिपुस्त्रिधा विभक्तो विश्लिष्टो भवति इत्यर्थः हृ
रितः इंद्रनीलः तद्वन्नीलोसीति द्रुः संबोध्यते मित्रः सूर्यः शं सुखं त्वादित्यर्थः ज्ञानोस्तु वं योः पुरुषपयो

नीशः उत्तरयोरश्लेष इति फलाध्याये वक्ष्यते अतो हानं विहृत्योज्झ्ताभावः तत्तुल्यकर्मप्राप्तिरुपाद-
नमिति फलतः दृष्टत्वं अस्मर्तयोः पुण्यपापयोरन्यत्रसंचारात्मकोपादानस्य मुख्यस्यायोगात्सूत्रे शब्द-
शाट्येन हानावुपायनोपसंहारस्य लक्षणयेति सूचितमिति बोध्यं शाखांतरस्थो विशेषः शाखांतरे ध्यपे-
दितः उपसंहरणीयः इत्यत्र दृष्टांतमाह कुशाछंदइत्यादिना तत्र कुशादृष्टांतो यथा कुशा वानस्प-
त्यास्थ ता मा पात इति भाल्लविनां श्रुतौ हे कुशाः समिद्रूपः यूयं वानस्पत्याः स्थ मां यजमानं रक्षतेति यजमान-
प्रार्थने वनस्पतियोगित्वेन सामान्यसमित् श्रवणे शाकटायनिनां औदुंबराइति शाखांतरीयो विशे-
षः समाश्रितः औदुंबराः कुशाः इति अथ छंदो दृष्टांतो यथा छंदोभिः स्तुवीत इत्यत्र देवासुरछंद-
सामविशेषणयो पर्यप्रसंगे देवछंदांसि पूर्वाणीति पैंगीश्रुत्या निर्णयः स्तुतिः दृष्टांतो यथा षोडशि-
नः पात्रविशेषस्य ग्रहणमनुगमं तं स्तोत्रं कदा कर्तव्यमित्याकांक्षायां छंदोगानां कालाविशेषप्राप्ते
समया अभ्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोतीति तैत्तिरीयकवाक्यात्कालविशेषधीर्भवति एवं
भृतायामाचार्यानां श्रुतेर्वा कालविशेषधीरिति उपगान दृष्टांतो यथा ऋत्विज उपगायंतीति सामा-
न्यवाक्ये शाखांतरीयेन अध्वर्युरुपगायतीति विशेषमपेक्ष्य अध्वर्युवर्जिता ऋत्विज उपगायंतीत्येत-
दर्थपरतया निश्चीयत इति तथा च यथा कुशादिषु श्रुत्यंतरगतविशेषान्वयः तथा हानावुपायना-
न्वय इत्यर्थः कुशादिसामान्यश्रवणे शाखांतरीयविशेषसापेक्षमित्यंगीकर्तव्यं निरपेक्षत्वेऽस्पष्टदो-

षडुक्तविकल्पः स्यात् इदं च सामान्यवाक्यस्य विशेषसापेक्षत्वं जैमिनेरपि संमतमित्याह । तदुक्तमिति ।
पूर्वमीमांसायां जैमिनिना तदुक्तमित्यर्थः । तथाहि अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधाना
मेकदेशः स्यादिति जैमिनिसूत्रं अस्यार्थः आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्ष
रं ये यजामहे इति पंचाक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्त इत्यनारभ्याधीतवा
क्यं ऋतत्वानुयाजेषु ये यजामहं करोतीति वाक्यं तस्य वाक्यस्य शेषः स्यात्तथा च नञः पर्युदासार्थतया
अनुयाजव्यतिरिक्तेषु यज्ञेषु सप्तदशाक्षरगणः प्रयोक्तव्य इत्येको विधिर्भवति यदि नञो निषेधकत्वेन सामान्य
वाक्यं विशेषानपेक्षं तदा सामान्यवाक्येन विहितस्य गुणस्य निषेधादनुयाजेषु तस्य विकल्पः स्यात् स
चान्याय्यो विधीनामित्येकदेश एव स्यादिति प्रजापतिरिति स्तुतिः सहिलिंगात्सप्तदश इति अथवा उ
पाहृतप्रतिषेधवत् किं पुनरुपायपयोः विधूननं हानमभिप्रेतं उत तयोः फलतश्चालनं इति विशये फलत
श्चालनमेवेति न युक्तं यान्तरेण तयोः फलहेतुत्वमिति प्राप्ते ब्रूमः हानावेवायं विधूननशब्दो वर्तितुमर्ह
ति उपायनशब्दशेषत्वादुपायनशब्दस्य त्रिधौ विधूननशब्दस्य श्रुतत्वादित्यर्थः उपादानात्मको
पायनस्य हानं विनाऽसंभवात् विधूननेतशब्देन धूञ् कंपन इति धातुजत्वेन चलनवाचकेनापि हा ।
हानमेव लक्षणीयं करोभ्यस्यादिति विद्यार्थ्या शास्त्रे अग्निष्टोमाब्रह्मसंपद्यस्मिन्नहनि क्रियते तदहरपि ब्रह्मसत्ततो ।
य एतदंदहरुपयंति अपुनर्निवर्त्यकर्मानुतिष्ठंति ते ब्रह्मणैव साधनेन ब्रह्मपरमपयंतीत्यनेकमेणामृतत्वमु

७०

क्रियानुवर्तीत्यर्थः तत्र संशयः किमिमे सर्वे प्रविध्येत्यादयो मंत्राः प्रवर्ग्यादीनि च कर्माणि तत्तदुपनिषदु
क्तविद्यासूपसंह्रियेरन्नवेति तत्र सर्वं यथा पुरुषयज्ञस्यात्मविद्यासंनिधानात्तच्छेषत्वं तथा मंत्राणां कर्म
णां च तत्तद्विद्यासंनिधानात्तच्छेषत्वेनोपसंहारो भवतीति दृष्टांतेन प्राप्ते ब्रूमः तेषामुपसंहारो विद्यासु
कुतः वेधाद्यर्थभेदात् सर्वं प्रविध्येत्यादिमंत्रप्रकाशितानां वेधादीनामर्थानां अभिचारकर्मादिसमवेतानां
भेदात् विद्यास्वसमवेतत्वात् इत्यर्थः तथा चाभिचारकर्मादिसमवेतार्थप्रकाशनसामर्थ्यलक्षण
लिंगं संनिधिं दुर्बलं तिरस्कृत्य मंत्राणामभिचारादिकर्मांगत्वं संपादयतीति न विद्याशेषत्वं प्रवर्ग्या
दिकर्मणां संनिधेर्दुर्बलीयस्त्वात् प्रथमादिना ज्योतिष्टोमादौ विनियुक्तानां विद्याशेषत्वमिति भावः २५
हानौ तूपायनशब्दशेषत्वात् कुशाच्छंदःस्तुत्युपगानवत्तदुक्तं २६ तांडिनां रहस्ये श्रूयते अश्व इव रो
माणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति
तथैवाथर्वणश्रुतिः तथा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति यथाश्वो जीर्णा
नि लोमानि स्वरोमभिः सह त्यक्त्वा स्वच्छो भवति एवमहमपि पापं सर्वं विधूय निर्मलः सन् यथा वा चंद्रो
राहोर्मुखात्प्रमुच्य भास्वरो भवति एवमकृतं प्रवाहरूपेणानादिसिद्धशरीरं धूत्वा त्यक्त्वा कृतात्मा स्वच्छः स
न्नकृतात्माकृतं कृत्स्नो ब्रह्मात्मकं लोकं अभिसंभवामि आभिमुख्येन प्रत्यक्षेण प्राप्नोमीत्यर्थः तथा।
शाट्यायनिनः पठंति तस्य दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति तत्र तस्य वि

दुष्कृतमर्थः तथैव कौषीतकिनः पठंति तत्सुकृतदुष्कृते विधुनुते तस्य प्रिया ज्ञातयः सुकृतमुपयंति
अप्रिया दुष्कृतमिति तत् तेन विद्याबलेन विद्वान् सुकृतदुष्कृते विधुनुतेस्य जिहासितयोस्तयोर्विनियोग
माह तस्येति तस्मादुपासकेन द्वेष्या इति श्रुतिर्नास्ति यत्र शाकटायनिश्रुतावुपादानमात्रं पुण्यपा
पयोः श्रुतं तत्र विदुषस्त्यागे केनान्येन संभवतीति पुण्यपापत्यागस्याक्षिप्यते यत्र तु ताड्यायवर्णे वा
कादये पुण्यपापत्यागमात्रं श्रुतं तत्र किं स्वरूपोरुपादानमन्यत्र श्रुतमत्रोपसंह्रियते न वेति संदि
ह्यते पूर्वपक्षे विद्यायास्तुतिप्रकर्षासिद्धिः फलं सिद्धांते तूपादानस्यात्रोपसंहारात् विद्यास्तुति
प्रकर्षसिद्धिः उपासककृतं न विद्यामत्यर्थः हि कृतान्युपासकः पुण्यपापे त्यजतीति तेनान्यैरुपादीयेते
इत्युच्यते सा च स्तुतिः संतागुणेन तथा चापास्य गुणोपसंहारप्रसंगेन स्व स्य सर्वगुणोपसंहारो वि
चार्यत इति प्राप्तसंकीर्यात् संगतिः तत्र यथा पूर्वं विद्यासन्निधौ श्रुतस्यापि मेत्रादेर्विद्यायामसामर्थ्या
दनुपसंहार उक्तः एवं क्वचित्कौषीतकिरहस्ये हानसन्निधौ श्रुतस्यापि उपादानस्य उपादानमंत
रेणापि केवलहानसंभवेन हानस्योपादानसामर्थ्याभावान्नोपसंहार इति दृष्टांतेन प्राप्ते ब्रूमः तः
कैवल्यवाचीत था च केवलहानौ श्रुतायां सत्यां तत्रोपादानमुपसंहर्त्तव्यं कुतः उपायनशब्दशेष
त्वात् स्व रोमविधूननदृष्टांतेनोक्तस्य पुण्यपापहानस्य नाशनाभावेन विधूततयोः पुण्यपापयोर।
न्यत्रावस्थानरूपोपादानमपेक्षितं तदुपायनं क्वचिदपि हानसन्निधौ श्रूयमाणं केवलहानस्य च।

णोऽस्मायातिपुण्यपापहातेनायदितस्योपादानात्मकस्योपायनस्यतज्ञानशेषत्वमितिमानः ननू
पायनशब्दसन्निधौ श्रूयमाणविधननशब्दस्य हानिलक्षकत्वेपि विधननशब्दस्य नलक्षकत्व
मिति शंकाकुशाच्छंद इत्यादिनानिगदति यथाकुशादिस्थले शाखांतरीयविशेषश्रवणानिर्णा
यकं तथेहाप्यन्यक्वचिद्विधूननसन्निधौ श्रूयमाणउपायनंसर्वत्रविधूननस्यनिर्णायकमि
त्यर्थः तदु... क्तमितिहर्षव्याख्येयं २६ सांपरायेतर्तव्याभावात तथाह्यन्ये २७ एवंवि
द्यायाः क... र्महानिहेतुत्वसिद्धं कृत्वाकेवलहानश्रवणेउपायनस्योपसंहारउक्तः इदा
नींविद्या... याः कर्महानिहेतुत्वंनास्तीत्याक्षेपात्समतिः पर्यंकस्थब्रह्मोपासकस्य देहत्या
गानंतरंदेव... मार्गेणब्रह्मलोकंप्रतिपर्यंकस्थब्रह्मप्राप्त्यर्थंगच्छतोमध्येविरजानदीतरणा
नंतरंकर्महानिः श्रूयतेविरजानदींमनसैवात्येतितत्सुकृतदुष्कृतेविधुनुतइतितत्रसंश
यः किंविरजानदीतरणानंतरंकर्महानिः उतदेहात्यागात्प्राक्काल इतिपूर्वपक्षेमरणप्रा
क्कालीनविद्याविनानदीतरणासौत्रकर्महानिहेतुत्वमितिविद्याया हानिहेतुत्वासिद्धिः फले
सिद्धांतेविद्यासामर्थ्यात जीवतएवकर्महानिरितितत्सिद्धिरितिभेदः तत्रतत्सुकृतइत्यत्रमे
ननदीतिसर्वनाम्नातस्मादूर्ध्यकत्वेनहेतुत्ववाचिनानहीतरणस्येवाव्यवहितस्यकर्महानिहेतु
त्वमितिगम्यते तथाचनदीतरणानंतरमेवकर्महानिरितिप्राप्तेक्रमः सांपरायेपरलोकसाध

नीमृतविद्याकालएवकर्महानिर्युक्ताकृतः॥ तत्त्वाभावात् नदीतरणानंतरंपापकर्मणातत्त्व
वस्वनिवर्त्यस्यफलस्याभावादित्यर्थः अत्रायंविकल्पः किंनदीतरणानंतरंकर्मणानिर्वर्त्यफ
लसत्वाभावत्प्रयत्नमत्तीणत्वंकर्मणउच्यतेउतनदीनतरणंविनाकर्मद्वयहेतोरभावात्वा आद्ये
सूत्रोक्तोहेतुर्वाच्यः द्वितीयस्त्वसिद्धः कर्मद्वयहेतोर्विद्यायाःसत्वात्कर्मद्वयंविनानदीनतरणान्न
पपतेश्चनचसर्वनाम्नानदीतरणस्यहेतुत्वप्रतीतिर्युक्तासर्वनाम्नः प्राधान्येनप्रकृतविद्यापरा
मर्शित्वादिति तस्मात्सर्वंजातएवकर्मद्वयोतरणानंतरंपठते प्रतिमंतव्यं तथाह्येकेशाखिन
स्तांडावयो॥ जीवदृशायामेवकर्मद्वयमश्वइवरोमाणीत्यादावधीयते अतस्सजीवतए
वविद्यासा॥१॥ मर्थ्यात्कर्मद्वयइति २७ ननुकर्मद्वयस्यविद्याफलत्वेब्रह्मप्राप्तेरिवदेहपा
गोत्तरकाप्र॥ लीनत्वंस्यादतआह छंदतः उभयाविरोधात् २८ छंदतःस्वेच्छयाविद्यान
ष्ठानेजीवतएवतद्धेतुकःकर्मद्वयोजीवतएवयुक्तः सतिदेहेतत्कार्यविश्लेषायोगात् एवंसति
विद्याकर्मद्वयोर्निमित्तनैमित्तिकभावेनाध्यादिमुत्तोरुभयोरविरोधोभवतीत्यर्थः ब्रह्मप्राप्तेर्दे
हपातंविनानुपपत्तेः प्रकृतेचानुपपत्त्यभावात् जीवतएवकर्मद्वयइतिभावः तस्माद्धिद्या
फलत्वंकर्मद्वयस्यनिसिद्धं २८ एवंप्रसंगागतंविद्योदयानंतरमेवकर्महानमितिनिरूप्ययथाहा
नसंनिधौकचिच्छ्रूयमाणउपायनंसर्वत्रोपसंह्रियतेतथाहानसंनिधौक्वचिच्छ्रूयमाणोदेव।

पानः पंथा सर्वत्रोपसंहर्त्तव्यः इति दृष्टांतेनाक्षिप्य समाधत्ते गतेरर्थवत्वमुभयथान्यथा हि विरोधः ।
२८ कर्महानमध्ये क्वचिद्देवयानपंथाः श्रुताः क्वचिन्न श्रुतौ निर्गुणविद्यास्थले तत्र किं देवयानोप
संहारोस्ति न वेति संदेहे अस्तीति प्राप्ते ब्रूमः गतेर्देवयानस्यार्थवत्वं उभयथा विभागेन भवितुमर्हति क्व
चित् सगुणविद्यायां देवयानमार्गोस्ति क्वचिन्निर्गुणविद्यायां नेति अन्यथा सर्वत्र देवमार्गोपसंहारांगी
कारे विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यं प्रत्यगभिन्नब्रह्मलक्षणं नित्यसिद्धमुपैतीति श्रु
तिविरोधः स्यादित्यर्थः २९ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ३० क्वचिद्विद्यायां गतिरस्ति
क्वचिन्नास्तीति गतेरुभयथाभाव उपपन्नः तल्लक्षणार्थोपलब्धेः सगतिलक्षणकारणस्य सगु
णविद्याफलस्य पर्यंकस्थब्रह्मप्राप्तिरूपस्य लोकांतर्वर्त्तिनोर्थस्य तत्र श्रुतिषूपलब्धेरित्यर्थः नि
र्गुणविद्यायां मार्गसाध्यफलाभावान्न तत्रोपसंहारः लोकवत् यथा लोके ग्रामसेतुवासिनो गंगा
प्राप्त्यर्थं पंथा अपेक्षितः न तु गंगास्थानां तद्वदित्यर्थः तस्मान्निर्गुणविद्यायां मार्गोपसंहारर
हितमिति सिद्धं ३० अनियमः सर्वेषामविरोधः शब्दानुमानाभ्यां ३१ सगुणविद्यास्वपि क्वचित्पंचाग्नि
विद्यादिषु मार्गः श्रूयते क्वचिन्न वैश्वानरविद्यादिषु न श्रूयते तत्र किं क्वचित् श्रुतमार्गस्यान्यत्रोप
संहारोस्ति न वेति संदेहे यद्विद्याप्रकरणे मार्गः श्रुतः स तत्रैवेति प्रकरणबलान्नियमेनोपसंहा
रइति पूर्वाधिकरणदृष्टांतेन प्राप्ते उच्यते सर्वेषां सगुणोपासनानां मार्गस्याऽनियमः क्वचित्तु

73
वे॰सू॰वृ॰
७३

तस्य सर्वत्रोपसंहार इति यावत् ननु प्रकरणबलान्नियमो युक्तः अन्यथा प्रकरणविरोधः इति चेदुच्य
ते प्रकरणेनाविरोध एवानियमस्य कुतः प्राबल्यानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः य एवमेतद्विदुर्ये
चामी अरण्ये श्रद्धां सत्यमुपासते ते ते अर्चिरभिसंभवंतीत्याद्याः श्रुतिः येऽत्राधिकृताः एतत्लोकादिपंचकमे
वमनग्निवेनविदुस्ते र्चिरभिसंभवंतीति संबंधः तद्दतय एवमात्र अरण्ये सत्यं ब्रह्म श्रद्धांतयः पूर्वमुपास
ते ते एवार्चिरभिसंभवंतीत्यर्थः तथा च पंचाग्निविद्याविदामिव विद्यांतरशीलानां वाक्येनैव प्रकरण
बलीयस्त्वादेव मार्गावगतेः प्रकरणं बाध्यमिति भावः शुक्लकृष्णे गती ह्येते जगतः शाश्वते एक
या यात्यनावृत्तिमन्यया वर्तते पुनरित्याद्या स्मृतिरप्युपासकस्याविशेषेण मार्गं दर्शयति जगतः वि
द्याकर्मणोर्वाधिकृतस्य जनस्येत्यर्थः ३१ यावदधिकारमवस्थितिराधिकारिकाणां ३२ पूर्वं नि
र्गुणविद्यायां न मार्गः सगुणविद्यायां तु सर्वत्र मार्ग इति व्यवस्था कृता इदानीं निर्गुणविद्यायां मोद
दे तन्नुपपत्ते रैश्वार्यादफलकत्ववक्तव्यं तत्त्वमस्यादिके फले मार्गमंतरेण न संभवतीति कृतव्यवस्था
याः आक्षेपात्संगतिः अपांतरतमवसिष्ठसनत्कुमारादीनां निर्गुणब्रह्मविदां पुनः पुनरुत्पत्तिः
स्मर्यते अपांतरतमाः कलिद्वापरयोः संधौ विष्णुनियोगात्कृष्णद्वैपायनः संबभूवेत्यादिना त
त्र संशयः विदुषो वर्तमानदेहपातानंतरं देहांतरप्राप्तिरस्ति न वेति अत्र पूर्वपक्षे वसिष्ठादिनिष्ठ
ब्रह्मविद्याया अंतरप्राप्तिरस्त्येवेति निर्गुणविद्यायामपि मार्गोपसंहार इति फलं सिद्धांते तु अपांतरत

७३ रा॰

नः प्रभृतीनामाधिकारिकाणां वेदप्रवर्त्तनादिषु लोकव्यवस्थाहेतुष्वधिकारेषु परमात्मना नियुक्तानां
यावदधिकारमवस्थितिः यावत्प्रारब्धकर्मावस्थितिः तस्य प्रारब्धस्य कर्मणः प्रतिवंधकस्यानेक
शरीरभोग्यफलदेतोस्तस्य फलस्य भोगेन नाशे प्रतिवंधकांतराभावादनादौ संसारे संचितकर्म
णां च ज्ञानेनाशपनेनाप्रतिवंधकत्वादप्रतिवंधः साक्षात्कारो वर्त्तमानदेहपातानंतरं कैवल्यं संपाद
यतीति न देहांतप्राप्तिरप्रतिवद्धसाक्षात्कारवतः तथैव श्रुतिः तस्य तावदेव चिरं यावन्न विमोक्ष्ये
अथ संपत्स्य इत्यप्रतिवद्धसाक्षात्कारवतो वर्त्तमानदेहपातावधि कैवल्यस्य श्रावयति तथा च न विदुषो
मार्गस्य निर्गुणविद्यायामनुपसंहार इति सिद्धं ३२ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौप
सदवत्तदुक्तं ३३ बृहदारण्यके श्रूयते याज्ञवल्कस्य गार्गीत्रिप्रश्नोत्तरे एतद्वै तदक्षरं गार्गि ब्राह्म।
णा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादि एवमाथर्वणेप्यक्षरमधिगम्यते परं यदक्षरं ब्रह्मो
पक्रम्य श्रावयति यत्तदद्रेश्यमग्राह्यमगोत्रवर्णमचक्षुरित्यादि एवं तत्र तत्र निर्गुणब्रह्मप्रमि
त्यर्था निषेधाः श्रूयते तत्र संशयः किं चिन्निषेधस्तत्रामित्यश्रुतनिषेधानामश्रुतं तत्रादुपसंहारोस्ति
न वेति तत्र यथा पूर्वमाधिकारिकाणां वसिष्ठादीनां प्रारब्धकर्मण एव देहांतरसंवंधः सिद्धे
न संचितकर्मणो देहांतरसंवंधहेतुत्वमित्युक्तं तथेहापि तत्तच्छाखोक्तैरेव निषेधैरुपलक्षणतया
सर्वहेतुनिषेधसिद्धेर्न शाखांतरीयनिषेधानां तत्र ब्रह्मप्रमितिहेतुत्वमित्यनुपसंहार इति दृष्टांते

नप्राप्नोत्यर्थः अन्तरे धर्मिग्राहके तन्निषेधविधियोरन्तरधियः तासां सर्वत्रनिषेधप्रकरणे एवं विरोधस्योपसंहारो
न्यायः कृतः सामान्यतस्तावाभ्यां हि तत्प्रपंचनिरासेन ब्रह्मप्रतिपादनस्य सर्वत्र समानत्वात्तस्य ब्रह्मणः
श्रुतियाथस्य सर्वत्र भावात् एकत्वेन प्रत्यभिज्ञापमानत्वाच्च तद्विशेषाणां निषेधप्रवृत्तप्रत्ययानां सर्वत्रोप
संहार इत्यर्थः अग्नेयसत्त्ववत् तथाहि यजुर्वेदे जमदग्निः पुष्टिकामश्चतूरात्रेणायजत तेसुतत्त्रे जा
मदग्न्याहाने पुरोडाशिन्य उपसदो भवंतीति पुरोडाशयुक्तास्य उपसत्स्विष्टिरूपदिष्टास्य पुरोडाशप्रदा
नेक मंत्राणां उज्ञात्वे वेदोत्पन्नानां न्यग्नेर्होत्रे रवेरध्वरमित्यादीनां मुद्गात्रा प्रयोगे प्राप्ते अस्य धर्युकर्तृके
पुरोडाशप्रदाने तेषां मंत्राणां विनियोगात् हि नियोगविधेश्च सार्थकस्य संपादकस्य स्वरूपमात्रवोधकोत्प
त्तिविध्यपेक्षया मात्यन्तान्तात्यान रोधे नध्वर्युणैव प्रयोगो न गौणोत्पत्तिविध्यनरोधे तो ज्ञात्राप्रयो
ग इति यथा अध्वर्युकर्तृक पुरोडाश शेषाणां मंत्राणां यत्र क्वचिदुक्तानामप्यध्वर्युणा संबंधः एवमक्ष
रप्राप्तिविशेषाणां निषेधानां यत्र क्वचिदुक्तानामक्षरेण सर्वत्र संबंध इत्यर्थः अस्मिन्नेवार्थे उदाह
रणांतरं विवृतया जैमिनिसूत्रमुदाहरति तदुक्तमिति गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वे
दसंयोग इति जैमिनिसूत्रं य एवं विद्वानग्निमाधत्ते इति यजुर्वेदविहिताधाने अंगत्वेन य एवं विद्वा
न्वारवंतीयं गायति य एवं विद्वान् यज्ञायज्ञायं गायति य एवं विद्वान्वामदेव्यं गायतीति यजुर्वेद एवं सामा
म्निविहितानि विषयः वारवंतयदयुक्तं साम वारवंतीयं एवमग्रे पिंडस्वैः सामन्योर्यात्सुयजुःषु तिसाम

यत्नघोः स्वरभेदोस्ति तत्र संशयः किमेतानि सामानि सामवेदोत्पन्नत्वात्तदीयेनोच्चैः स्वरेणाम्नायानेप्र
योक्तव्यानि उत पुनर्यजुर्वेदेन विनियुज्यंते तदीयेनउपांशुस्वरेणेति तत्रउत्पत्ति तत्रउत्पत्तिविधिबला
दुच्चैः स्वरेणप्रयोगप्राप्तेस्सिद्धांतः गुणमुख्यव्यतिः गुणमुख्ययोरुत्पत्तिविनियोगविध्योर्व्यतिक्रमे स्वर
विषये विरोधे मुख्येन विनियोगविधिना वा रेवंतीयादेर्वेदस्य संयोगो ग्राह्यः साम्नां विनियोजकवे
दस्वरसंयोग इति यावत् कुतः तदर्थत्वात् उत्पत्तिविधेर्विनियोगार्थत्वादित्यर्थः एतत्समानन्याय
त्वेनोपसंदष्टमंत्राः पूर्वमुदाहृता इति मंतव्यं २३ इयदामननात् २४ द्वासुपर्णासयुजेत्यादिमंत्र
माथर्वणादौ श्रूयते काठकेपि ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध इत्यादि श्रू
यते तत्र संशयः किमनयोर्मंत्रयोः विद्याभेदः उत विद्यैक्यमिति पूर्वपक्षे विद्याभेदे सत्यन्योन्यगुणान
पसंहारः फलेसिद्धांते विद्यैक्यादुपसंहार इति तत्र पूर्ववेद्यस्यादरस्याभिन्नत्वेन विद्यैक्यात् इतर धिया
मपसंहार उक्तः तर्हि प्रकृते द्वासुपर्णेति मंत्रे एकस्यैव भोक्तृत्वं ऋतं पिबंताविति मंत्रे उभयोरपि भो
क्तृत्वं श्रूयते इत्युभयत्र वेद्यभेदाद्विद्याभेदः इति प्रत्युदाहरणेन प्राप्ते ब्रूमः मंत्रद्वयेपि वेद्यैकत्वमे
व कुतः इयत्तावच्छिन्नस्यैव दिलावच्छिन्नस्य वेद्यस्योभयत्राप्यभिन्नत्वेनामननादित्यर्थः अत्र हि मंत्र
द्वये भोक्तृजीवानुवादेन परमात्मात्माभेदः प्रतिपाद्यः पिबंताविति प्रयोगस्तु भोक्तृजीवसादृश्य
र्यादभोक्तरीश्वरे छत्रिणो गच्छंतीतिवदुपपद्यत इत्युक्तं गुहाधिकरणे तथा च प्रतिपाद्यैक्यान्निर्गु।

णाविद्यैकमित्यविरोधः ३४ अंतराभूतग्रामवत्स्वात्मनः ३५ बृहदारण्यके उषस्तो याज्ञवल्क्यं पप्रच्छ
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेति स तोऽपरोक्षं तत्र सैव प्रत्यगात्मेत्याह य आत्मेति एत
त्पक्षांतरे यः प्राणेन प्राणिति स त आत्मा सर्वांतर इत्यादिना कार्यकारणरहितः आत्मा प्रतिपादितः एव
मेतदनंतरब्राह्मणे पूर्ववत्कहोलप्रश्ने योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति स अशनाद्यना
त्मात्मा प्रतिपादितः तत्र संशयः किमनयोर्ब्राह्मणयोर्विद्याभेदः उत विद्यैकमिति फलं पूर्ववत् पू
र्वपि वेतावित्यस्य पदस्य लादित्रिक नेन वेद्याभेदाद्विद्यैकत्वमुक्तं इह तु वेद्यैकेऽपि न विद्यैकत्वं समिश्रोय
जतीत्यादौ यजत्यभ्यासवत्प्रकृते आत्माभ्यासाद्विद्यायाः भेदसिद्धेरिति प्राप्ते पूर्वपक्षः एकत्र कार्या
दिरहितात्मनः उपास्यत्वादन्यत्र अशनाद्यतीतात्मनः उपास्यत्वादुभयत्र वेद्यभेदाद्विद्याभेद इति गौ
णः पूर्वपक्षः तत्र गौणं पूर्वपक्षं दूषयति अंतरेति पूर्वसूत्रस्थस्याम्नानादिति पदस्यानुषंगः ब्रा
ह्मणद्वयेपि स्वात्मनः सर्वांतरत्वाम्नानाद्धेतोः स्वात्मनः एकत्वमेव उभयोरेकस्मिन्देहे सर्वांतर
त्वायोगात् भूतग्रामवत् यथा भूतसमूहात्मके स्थूलदेहे पृथिव्यपेक्षया जलमांतरं जलापेक्षया
तेजोत्यादिक्रमेणापेक्षिकं भूतानामांतरत्वं न मुख्यं सर्वांतरत्वं तद्वद्ब्राह्मणद्वये वेद्यभेदांगीकारे विद्या
त्मद्वयस्यापि स्यादित्यर्थः यद्वा भूतग्रामवदिति श्रुत्यंतरदृष्टांतार्थं यथा एको देवः सर्वभूतेषु गूढ
इत्यादिश्रुत्यंतरे सर्वेषु भूतग्रामेषु सर्वांतर एक एवात्माम्नायते तद्वदनयोर्ब्राह्मणयोरित्यर्थः तथा

चे वं द्यैक्याद्धि यैकं सिद्धं ३५ मार्गपदमनुषयदूषयति अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशांतरवत् ३६
अन्यथाविद्याभेदानंगीकारेऽत्मानाभेदस्याभ्यासस्यानुपपत्तिः प्रयोजनाभावादिति चेन्नउपदेशां
तरवदभ्यासस्याउपपत्तेरित्यर्थः तथाहि विद्याच्छान्दोग्ये तत्वमसीत्युपदेशे नवकृत्वोभ्यस्यमानेपिन
विद्याभिद्यते उपक्रमोपसंहारयोरविशेषात् तद्वत् ब्राह्मण इयेपि प्रश्नरूपेणोपक्रमस्यातोस्यदाते।
मित्युपसंहारस्य चाविशेषाद्धि तीये प्रश्ने पदेवमादावपरोत्ताद्गुणेनेवकारेणवद्यभेदनिरासाच्च
न विद्याभेदः अभ्यासस्यादरार्थत्वेनाशनायाद्युर्मी तत्वादिविशेषप्रतिपादनार्थत्वेन चोपपत्तेरिति॥
३६ व्यतिहारो विशिषंति हीतरवत् ३७ ऐतरेयिनः आदित्यपुरुषमधिकृत्य समामनंति तद्यो
हं सोसौ योसौ सोहमिति तथैव जाबाला अपि त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीति तत्र
संशयः किमात्मन ईश्वरेणैकत्वविषयमेकरूपमेव चिंतनं विधीयते उत जीवेश्वरयोरन्यो
न्यानुवादेनान्योन्यात्मकत्वरूपव्यतिहारेणोभयविषयं चिंतनमिति अत्र पूर्वपक्षमनेएक
रूपत्वात्मा चवेसिद्धांतमुनेउभयत्वांगीकारेण व्यतिहारे सार्थक्यमिति भेदः तत्राभ्यासस्या
दरार्थत्ववत् व्यतिहारोपदेशस्याप्यादरार्थत्वान्न तदवरोधेन चिंतनस्योभयरूपत्वं किंत्वेकरू
पत्वमेवेति दृष्टांतेन प्राप्ते ब्रूमः व्यतिहार एवात्रोपास्यत्वेनोपदिश्यते न त्वात्मन ईश्वरेणैकत्वा
मात्रमितरवत् यथैतरेसर्वात्मत्वादयो गुणाउपास्यत्वेनोपदिश्यंते तद्वत् व्यतिहारेपि तदेत्त्वद्विशे

वे॰ सू॰ टी॰
७६

वंति हीति समाम्नानाज्जीवपरमात्मनोर्व्यतिहारेण विशेषंति तद्योऽहमित्यादिना तच्च व्यतिहा
रेण विशेषणं व्यतिहारस्योपास्यत्वे सार्थकं स्यात् अन्यथा जीवस्येश्वरेणैकत्वमात्रस्योपास्यत्वे
तत्प्रतिपादकमुत्तरंशास्त्रं वैयर्थ्यं वत्वं नत्वीश्वरस्य जीवेनैकत्वप्रतिपादकांशस्येति तस्मादुभयां
शास्त्रार्थक्योभयरूपं चिंतनं विधेयमिति सिद्धं पूर्वसूत्रेऽपदेशांतरवदिति दृष्टांतत्वेन तत्त्वमसी
त्येकत्ववाक्यकथनप्रसंगे नैकत्ववाक्यस्य तद्योऽहमित्यादिर्विचारात्प्रासंगिकी पादसंगतिः यद्वा
यस्यामहंग्रहोपास्तौ व्यतिहारस्यान्योपास्यत्वान्न सर्वत्राहंग्रहोपास्तौ तस्य व्यतिहारस्योपसंहारः।
इति पूर्वपक्षे फलेऽसिद्धांते तत्सोपास्यत्वात्सर्वत्रोपसंहार इति सावादेवपादसंगतिः ३७ सैव हि स
त्यादयः ३८ वाजसनेयके बृहदारण्यके हिरण्यगर्भं प्रकृत्य स यो हैतन्महद्यक्षं प्रथमजं वेद
सत्यं ब्रह्मेति जयतीमांल्लोकानिति सत्यविद्यां विधाय तदंगत्वेन तदेतत्त्र्यक्षरं सत्यमिति स इत्येक
मक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परि
गृहीतं सत्यभूयमेव भवतीति सत्यनामाक्षराणामुपासनमुक्त्वानंतरं श्रूयते तद्यत्तत्सत्यम
सौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष इत्यादिश्चापमर्थ्यः दृशाहः उप
स्य प्रसिद्धयर्थं एतदिति हिरण्यगर्भात्मकं ब्रह्मोपास्यं परामृशति महद्व्यापकं पदं तं यजं प्रथमजं
भौतिकापेक्षयेति शेषः वेदनाप्रकारमाह सत्यं ब्रह्मेति सच्च त्यच्चेति सत्पंचभूतात्मकं हिरण्य

७६

गर्भोऽखं ब्रह्मयो वेद उपास्ते स इमांल्लोकान् जयतीत्यर्थः लीनमेकमक्षरमित्यत्र तकारोपरि नकारइकार
उच्चारणार्थः निरुक्तः तकारो बोध्यः अत्र हि प्रथमोत्तमे अक्षरे सत्यं मृत्युसाम्याभावात् मध्यतोऽस्य म
ध्यमक्षरमनृतं मृत्युः मृत्युऽनृतयोस्तकारसाम्यात् तदेतत् अनृतं मृत्युरूपमुभयतः सत्येन परिगृहीत
मेतद्भावितमनसोऽकिंचित्करं तत्सत्यभूयं सत्यबाहुल्यमेव भवतीत्यर्थः तत्रात्र हृदयात्मकत्वे
सत्यात्मकत्वे च ब्रह्मणः सिद्धे इत्यर्थः यत्तत्सत्यमित्यादिकं सेव यादेवमन्यत्रापीत्यधिकरणे
व्याख्यातं तत्र संशयः किं तत्र तत्सत्यममोमसइत्यादिना श्रुता विद्या पूर्वसत्यविद्यातो भिद्यते
न वेति पूर्वपक्षे विद्याभेदात् गुणानुपसंहारः सिद्धान्ते तदुपसंहार इति बोध्यं तत्र पूर्वं जीवब्र
ह्मणोऽभिन्नत्वोक्तिभेदाद्विद्यायां हि रूपत्वमुक्तं तद्विद्यायाः सत्यविद्यायां लोकजयसफलत्वादनं
तरविद्यायां च हंति पाप्मानं मित्यादिना पापप्रनिवृत्तेः फलत्वात् फलोक्तिभेदाद्विद्याभेद इति दृष्टा
तेन प्राप्ते ब्रूमः इयमनंतरविद्या सैव सत्यविद्येति तो न भिद्यते कुतः तद्यत्तत्सत्यमिति प्रकृत
स्यैवोपास्यस्य हिरण्यगर्भस्याकर्षणात् इति हि शब्दसूचितो हेतुर्बोध्यः नहि वेद्याऽभेदे विद्या
भेदो युक्तः न च फलभेदाद्विद्याभेदः सत्यविद्याप्रकरणोपदिष्टस्य फलस्य सर्वस्यापि सत्यविद्याफ
लत्वादिति तस्माद्धि द्वैकात्पूर्वापरवाक्ययोः सर्वे सत्यादयो गुणा उपसंहर्तव्या इति सिद्धं ३९
कामादीतरत्र तत्र चायतनादिभ्यः ३९ दहरविद्यायां दहराकाशमात्मानं प्रकृत्य छंदोगाम्ना

वे.सू.वृ. 77
७८

मनंतिएषआत्माऽपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्प
इत्यादि तथा वाजसनेयिनोपि स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेषु य एषोंतर्हृदय आ
काशस्तस्मिंछेते सर्वस्य वशी सर्वस्येशान इत्यादि तत्र संशयः किमनयोर्गुणोपसंहारोस्ति न वेति त
त्र एवं विद्याऽभेदे विद्यैक्याद्गुणोपसंहार इत्युक्तं तर्हि प्रकृते छांदोग्ये दहराकाशस्यैवोपास्यत्वात् वा
जसनेयिके आकाशनिष्ठस्यात्मनो ज्ञेयत्वाद्वेद्यभेदेन सगुणनिर्गुणविद्ययोर्भेदान्नोपसंहार इति
प्रत्युदाहरणेन प्राप्ते ब्रूमः कामादिसत्यकामत्वादिगुणजातमितरत्र वाजसनेयिके उपसंह
र्तव्यं यच्च सर्ववशित्वादिकं तदपि तत्र छांदोग्ये उपसंहर्तव्यं कुतः आयतनादिभ्यः हृदयस्यायतन
स्य ब्रह्मण उपास्यस्य ब्रह्मणः सेतुत्वव्यपदेशानामुभयत्राविशेषादित्यर्थः अयमर्थः दहराधिक
रणे दहराकाशस्य ब्रह्मत्वसमर्थनान्न वेद्यभेदः ननु तथापि सगुणनिर्गुणविद्ययोरनयोर्भेदो दु
र्वार इति चेत् सत्यमस्ति भेदः कथं तर्हि गुणोपसंहार इति चेत्तत्र स्तुत्यर्थोपासनार्थं गुणोपसंहारं ब्रूमः ॥
किंतु विद्यान्तरस्थत्वेपि तत्स्तुत्यर्थं गुणोपसंहारः सविद्याभेदापि संभवति तत्र हेतुः उभयत्राविशेषादिति आ
दरादलोपः ४० छांदोग्ये वैश्वानरविद्यायां प्राणाग्निहोत्रं श्रूयते तद्यद्भक्तं प्रथममागच्छेत्तद्धोमी
यं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेत्यादिना भक्तमन्त्रं जाबालश्रुतौ पूर्वोतिथिभ्यो
ऽश्नीयादिति वैश्वानरोपासकस्यातिथिभ्यः पूर्वं भोजनं विधायातिथिभोजनप्राप्यस्य निंदयापूर्व

७८

भोजनंस्तोति यथा हवे स्वयमहुत्वाग्निहोत्रं परस्य जुहुयादेवं तद्वितीय यथा स्वाग्निहोत्राकरणे पराग्नि
होत्रकरणमयुक्तमेवं तत्स्त्रातिथिभ्यः पूर्वं भोजनदानमित्यर्थः तत्र संशयः किं भोजनलोपे प्रा
णाग्निहोत्रस्य लोप उत नालोप इत्यालोपसिद्धिः पूर्वपक्षे फलं सिद्धान्ते लोपसिद्धिरिति उ
पात्तिविचारप्रसंगेन दग्धपूर्वभोजनाम्नि तत्प्राणाग्निहोत्रविचारादस्मिन्पादे संगतिः उपास्थिते लो
पेपि लुप्तपूर्थतनगुणोपसंहारवद्भोजनलोपेपि पूर्वभोजनं लक्षणपत्त्यर्थं प्राणाग्निहोत्रालोपद्र
त्यवान्तरसंगतिः तत्र पूर्वपक्षसूत्रं आदरादलोपः इति भोजनलोपेप्यग्निहोत्रस्याऽलोपः पूर्व
भोजनस्य प्राथम्यरूपस्य धर्मस्य लोपसहमानेषाजावालश्रुत्या प्राणाग्निहोत्रस्यादराकरणा
त् नहि धर्मलोपमसहमाना श्रुतिः प्राणाग्निहोत्रस्य धर्मिणो लोपं सहते तस्मात् भोजनलो
पेप्यन्येन भक्ष्यद्रव्येण प्राणाग्निहोत्रं कर्तव्यमित्येवं प्राप्ते ४० सिद्धान्तः इति उपस्थितेऽतस्तद्व
चनात् ४१ भोजने उपस्थितेऽतः अस्मादेव भोजनद्रव्यात् प्राणाग्निहोत्रं कर्तव्यं अनु
पस्थिते प्राणाग्निहोत्रं न कर्तव्यमेव कुतः तस्य द्वचनात् तद्धायीयमिति वचना त्सन्निहि
तस्याकांक्षातज्जकं प्रथममागच्छेदिति तेन सन्निहितस्य भोजनार्थं प्रा त द्रव्यस्य होमसाध
नत्वप्रतीतेरित्यर्थः तथा च भक्तागमनभोजनप्रयुक्तस्य भोजनलो पे लोपः द्रव्यस्य लोपे
ग्निहोत्रस्य लोप एव आदरवचनं तु भोजनं प्रसक्ति दशायां द्रष्टव्यं ४१ तन्निर्धारणानिय

मस्तदृष्टेः पृथग्घ्यप्रतिबंधफलं ४२ संतिकर्मांगेषूद्गीथादिषु प्राणाद्युपासनानि तानि किं
पर्णतावत्कर्मांगानि नित्यकमेव दन्नेष्टपानित्न गोदोहनवत्स्वतंत्रफलसाधनान्यानीति संशयः
पूर्वोत्तरकोटिसिद्धेरेव पूर्वोत्तरपक्षयोः फलेउपासनाविचारात्मकत्वाद स्यपादसंगतिः अत्र
नित्यभोजनांगाश्रितप्राणाग्निहोत्रस्याऽनित्यत्ववन्नित्यकर्मांगाश्रितोपासनानां नित्यत्वमिति वा
तरसंगतिः तत्रेयस्य पर्णमयी जुहूर्भवतीति कंचिन्क्रतुमनारभ्याधीतस्य पर्णमयीत्वस्य
व्यभिचरेतत्क्रतुसंबंधिजुहूद्वारा क्रत्वंगत्ववदनारभ्याधीतानामुद्गीथाद्युपासनानामुद्गीथादि
द्वारा क्रत्वंगत्वमिति प्राप्ते ब्रूमः तन्निर्धारणानियम इति तेषां कर्मांगाश्रितानां निर्धारणानामु
पासनानामनियमः नित्यत्ववदनुष्ठानाभावः कुतस्तद्दृष्टेः तस्यानियमस्य श्रुतौ दर्शनादित्यर्थः ॥
तथाहि तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यनुपासकस्यापि कर्मणां कर्तृत्वं वदति श्रुतरुपा
सनस्यानियतत्वं दर्शयति उपासनस्य पृथक्फलश्रवणादपि पशुप्राप्तिफलकगोदोहनवत्कर्मां
गत्वमित्याह पृथग्घ्यतिहि यतः पृथगप्रतिबंधः कर्मणो वीर्यवत्तरत्वात्मकस्य समृद्धिरूपः फल
मुपलभ्यते श्रुतावपि नत्कर्मांगत्वमुपासनस्येत्यर्थः तथाह्युपासनस्य पृथक्फलत्वे श्रुतिः तेनोभौ
कुरुतः यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा
तदेव वीर्यवत्तरं भवतीति तेनोंकारेणोभावपि कर्म कुरुतः यश्चैतदोंकाराख्यमक्षरमेवं रसतमत्वादि

गुणकं यज्ञनवेदनावुभावितिसंबंधः एवमनभिप्रेतपक्षमुक्त्वाभिप्रेतमाह श्रुतिः नानात्विति तुशब्दः पक्ष
निरासार्थः कर्मांगोंकारमात्रज्ञानापेक्षयारसतमत्वादिगुणकोंकारज्ञानं नानैव पृथक्फलकं दृष्टो हि
मणिविक्रये शाबरवणिजे सामान्यविशेषज्ञानाभ्यां फलभेदः तस्माद्यदेव कर्मविद्ययोद्गीथादिविष
याश्रद्धयावास्याहितश्रुत्युष्मा उपनिषदा तत्तद्देवताध्यानेन युक्तः करोति तदेव कर्म वीर्यवत्तरं भवती
त्यर्थः अनेन विद्याहीनकर्म वीर्यवन्मात्रं विद्यासहितं वीर्यवत्तरमिति गम्यते न हीदं विद्यायाः कर्मांग
त्वे संभवति अंगहीनस्य कर्मणो वीर्यवत्त्वात्तत्र स्वफलजनकत्वलक्षणस्याऽनुपपत्तेः तस्मात्पृथगेता
याः अक्रियात्मकत्वेन कर्तृसंबंधविनाश्यात् श्रेयःफलजनकत्वाभावेन विषमसत्त्वाद्विद्यायाः क्रिया अ
त्मकत्वेन कर्तृसंबंधविनाशात् श्रेयःफलजनकत्वाभावेन विषमसत्त्वाद्विद्यायाः क्रियात्मकत्वेन ।
स्यात् श्रेयःफलसाधनत्वसंभवात् गोदोहनवत्स्यात् तत्समेवेति सिद्धं ४२ प्रदानवदेव तदुक्तं ४३ बृ
हदारण्यके छांदोग्ये च संवर्गविद्यायां वागादिभ्यः प्राणः श्रेष्ठः अग्न्यादित्यादिदेवताभ्यः श्रेष्ठो
वायुरित्यवधारितं तत्र संशयः किमनयोर्विद्ययोर्वायुप्राणयोः प्रयोगैक्यं उत प्रयोगभेदः इति फल ७
पादसंगतीः पूर्ववत् पूर्वं फलभेदात् कर्मांगानां तदाश्रितोपासनानां च नित्यत्वानित्यत्वलक्षणः प्रयो
गभेद उक्तः तर्हि प्रकृते वायुप्राप्तिलक्षणफलैक्यात् वायुप्राणयोः स्वरूपतः एकत्वेन ध्येयाभेदेन विद्यै
क्यात् प्रयोगैक्यमिति प्रत्युदाहरणेन प्राप्ते ब्रूमः यथैकस्मिन्नग्निहोत्रे दध्यादितंडुलादिभिर्गुणैः प्रयोग

भेदः एकमेकस्यामपि विवक्षायां वायुप्राणयोः स्वरूपाभेदेप्यधिदैविकत्वाऽध्यात्मिकत्वस्वरूपावस्थाभे
देन गुणभेदात् प्रयोगभेद इति प्रदानवदेवेदं द्रष्टव्यं तथाहि इंद्राय राज्ञे पुरोडाशमेकादशकपालमिं
द्रायाधिराजायेंद्राय स्वराज्ञ इति पुरोडाशत्रयं वत्सामिष्टौ श्रुतानां किं त्रयाणां पुरोडाशानां सह प्रदान
मुत प्रदानभेद इति विशये देवतैकात्म्ये सह प्रधाने प्राप्ते राजाधिराजस्वराजगुणभेदेन तद्विशिष्टदे
वताभेदात्पुरोडाशानां प्रदानस्य प्रत्येयस्य भेद इति यथा तद्वत् प्रकृतेप्ययं भेदात्प्रयोगभेद इत्यर्थः
तदुक्तं देवताकांडे नानावा देवता पृथक्त्वानादिति वा शब्दो दैवतक्यं निरासार्थः नानादेवतेत्यत्र हे
तुमाह पृथग्ज्ञानादिति उभयत्रापि वा कार्य एव राजाधिराजस्वराजगुणानां पृथग्ज्ञानात्तद्विशिष्टदेवतानां नाना
नात्वमुक्तमित्यर्थः ४३ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ४४ वाजसनेयिनोऽग्निरहस्ये नैव वा इदमग्रे
सदासीत्तान्यसदित्युपक्रम्य मनसः प्रादुर्भावमुक्त्वा तन्मनश्चात्मनोऽग्नीनपश्यदिति मनोचित्त
पठंति षट्त्रिंशतसहस्राण्यपश्यदात्मनोऽग्नीनर्कानात्मनो मयान्मनश्चित्त इत्यादि तथैव वाक्चितः
प्राणचितः चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचित इत्यन्यानग्नीनामनंति अस्यायमर्थः पुरुषस्या
युषे तत्त्वं प्रशतं वर्षाणामहोरात्राणि षट्त्रिंशत्सहस्राणि तैरवच्छिन्ना मनोवृत्तयोऽपि षट्त्रिंश
त्सहस्राणि भवंति एकस्मिन्नहोरात्रेऽप्यन्यत्र सर्वमनोवृत्तिष्वहोरात्रगतैकत्वारोपात् ता एतावत्त्वं
ल्लोकाः मनोवृत्तयः इष्टिकात्वेनाग्नित्वेन च संपाद्यंते षट्त्रिंशत्सहस्राणीत्यादिना मनएव स्ववृत्तिभि

पानऽग्नीनार्कान्नश्चर्यान् अत एव मनोविकारात्मनश्चितः मनसा चीयन्ते संपाद्यन्ते इति मनश्चितः तान
पश्यदित्यर्थः एवमेव वागादयोऽप्युह्यन्ते ऽग्नित्वेनाध्यवसिताः निन्द्रियस्कन्धके कर्मण्यग्निवमनं संध्यायं प्राणा
ग्राणं कर्मपद्मनसः क्रममर्मेन्द्रियपरे एते ग्नयः कर्मप्रकरणे पठिताः तत्र संशयः किमिते मनश्चिदा
दयो ग्नयः कर्माङ्गभूताः उत स्वतन्त्रा इति पादसंगति फले पूर्ववदेव पूर्वमेक प्रयोगाद्योगाद्धा मप्रा
णयोः प्रयोगभेदस्यानुक्ते तर्हि मनश्चिदादीनां प्रकरणात् कर्माङ्गत्वे नैकप्रयोगसंभवात्प्रयोगैका
मितिप्रत्युदाहरणे न प्राप्ते सिद्धो तमप क्रमते लिङ्गेति मनश्चिदादयो ग्नयः स्वातन्त्र्येणैव क्रतवः लि
गम्ययत्वात्वा तत्र ज्ञापक लिङ्गानामसंप्रसमासत्वादित्यर्थः तथा हि यत्किंचेमानि भूतानि मनसा सं
कल्पयन्ति तेषामेव सा कृतिरिति तान्हैतानेवं विदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपत इत्यादीनि
लिङ्गानि सन्ति अयमर्थः सर्वाण्यपि भूतानि जन्तवो यत्किमपि मनसा संकल्पयन्ति तेषामेवाग्नी
नां सा कृतिः संपादनं सर्वजन्तुमनव्यापारसंपत्तीनामग्नित्वेन ध्येयत्वादित्येक लिङ्गं न हि यत्किंचित्कर
णे कर्माङ्गं संभवतीति एवं विदे स्वपते जाग्रतेऽपि सर्वदा सर्वाणि भूतानि तानेतानग्नीश्चिन्वन्तीति॥
लिङ्गान्तरं न हि कर्माङ्गं सर्वदानुष्ठीयमानं दृष्टं कालविशेष एव तद्विधानादिति तद्धि लिङ्गं प्रक
रणाद्बलीयः तदपि बलीयस्त्वमप्युक्तं पूर्वकाण्डे श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां सम
वाये पारदौर्बल्यमर्थविप्रकर्षादिति एतत्सूत्रार्थो विस्तरेण वाचस्पतिमिश्रैरेतस्मादादावेवाधिकर

वे.सू.वृ.
८०

ऽोवर्तितः इतीह विस्तरभयान्नोच्यत इति ४४ एवं सिद्धांतमुपक्रम्य पूर्वपक्षयति पूर्वविकल्पः
प्रकरणात्स्यात्क्रियामानसवत् ४५ संकल्पात्मका मनश्चिदादयोऽग्नयो न स्वतंत्राः किंतु इष्टकाभि
रग्निं चिनुत इति प्रकृतस्य पूर्वस्य क्रियामयस्याग्नेरयं विकल्पः संकल्पात्मकोऽग्निः प्रकरणात् स्यान्न
च लिंगादग्नीनां स्वातंत्र्यं प्रकृते ऽनुक्तलिंगस्यार्थवादादिकार्यदर्शनलक्षणस्यार्थवादस्थत्वेन विहित
मानसिकाग्निस्तुतिपरत्वेन विध्येकवाक्यतया स्वार्थपरत्वाभावात्सिद्धे हि स्वार्थतद्दर्शनलिंगमग्नीनां
स्वातंत्र्ये ऽगमयेत् न त्वन्यस्वार्थसिद्धिः तस्मात्क्रियानुप्रवेशिन एवेति मानसिकाग्नयस्तेन सौत्रं क्रि
यापदं व्याख्यातं मानसवत् तथाहि द्वादशाहे श्रूयते अनया त्वा पात्रेण समुद्रं रसया प्राजापत्यं म
नोग्रहं गृह्णामीति तत्त्वां समुद्रं अनया रसया पृथिव्या पात्रेण प्रजापतिदेवताकं मनोग्रहं ध्यानमयं
ग्रहं मायाधीयेऽहं गृह्णामीत्यर्थः तत्र किमिदं मानसं द्वादशाहाद्दशरात्रे ऽतः तन्मध्यपातिनो दशा
मस्याह्नोंगमिति संदेहे वाक्ये द्वादशाहो मनो मानसमिति भेदव्यपदेशाद्दशरात्रमिति प्राप्ते मान
मस्याहरंतरत्वमानाभावाद्भेदव्यपदेशस्यांगांगिभावेनाप्युपपत्तेर्दशरात्रत्वे द्वादशाहसंज्ञाया
गौणत्वप्रसंगात् न विरोधो भवति गौणत्वायोगात् द्वादशाहमध्यपातिनो दशमस्याह्नोंग मानसमि
ति यथा तथैवेमे मानसिकाग्नयः प्रकृतकर्मशेषा इत्यर्थः ४५ अतिदेशाच्च ४६ मानसिकाग्नीनां
मध्ये एकैकोऽग्निस्तावान् यावानसौ पूर्व इति पूर्वेणेष्टकाचितेनाग्निना मानसिकाग्नीनां साम्योपदेश।

स्वतन्त्वेषतं एकक्रियानुप्रवेशात्तिरिमाह इष्टाभावादित्यर्थः ४६ सिद्धान्तयति विद्यैव तु निर्धार
त् ४७ तु रुक्तपक्षनिरासार्थः विद्यात्माकारा एते मनश्चिदादयः स्वतन्त्रा एव न कर्मानुप्रवेशि
नः कुतः ते हि ते विद्याचितः एवेत्यवधारणादित्यर्थः एवकारश्रुत्या कर्मप्रकरणं बाध्यमिति
भावः ४७ लिङ्गादपि तद्बाध्यमित्याह दर्शनाच्च ४८ मानसिकाग्नीनां स्वातन्त्र्यज्ञापकलिङ्ग
स्य दर्शनाच्च प्रकरणं बाध्यमित्यर्थः लिङ्गं पूर्वं दर्शितं ननु इदं लिङ्गं न साधकमित्युक्तमित्यत
आह श्रुत्यादिबलीयस्त्वाच्च न बाधः ४९ श्रुतिरेवकारः आदिपदेन लिङ्गवाक्ययोर्ग्रहणं
लिङ्गमप्युक्तमेव विद्यया हैवैत एवंविदश्चिता भवन्ति तेन तेषां मानसिकाग्नीनां पुरुषस्येव यथा च ग्रह
णं वाक्यं स्यात् तत्र बाधकं तया चैते तेषां श्रुतिलिङ्गवाक्यानां बलीयस्त्वात् दुर्बलेन कर्मप्रकरणेन अग्नी
नां स्वातन्त्र्यं बाधयितुमर्थः न च लिङ्गस्यार्थवादस्थत्वेनासाधकत्वं लिङ्गप्रदर्शनार्थ उदाहृतं वा
क्यानां विधिप्रत्ययसामीप्याभावात् पूर्वार्थवाचकत्वाद् विधायकत्वेनार्थवादत्वाभावादिति भावः
इतोऽपि मनश्चिदाद्यग्नीनां स्वातन्त्र्यमित्याह अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तं ५०
ते मनसैवाधीयन्त मनसा चीयन्त मनसैव ग्रहा अगृह्यन्त मनसास्तुवन्मनसाशंसन् यत्किंच यज्ञे
कर्म क्रियते यत्किंच यज्ञीयं कर्म मनसैव तन्मनोमयेषु मनश्चित्सु मनोमयमेव क्रियते इत्यादिना म
नश्चादिवृत्तिषु कर्माङ्गानामनुबन्धात् संपादनादग्नीनां स्वातन्त्र्यं कर्माङ्गत्वे अङ्गानां प्रत्यक्षसिद्ध

वे॰सू॰वृ॰
८१

तेनसंपादनवैधर्म्यात् आदिपदेनातिदेशो गृह्यते अतिदेशोहिक्रियामयस्याग्नेर्माहात्म्यमे
कैकस्मान्मानसिकाग्नेर्दर्शयन्स्वतंत्रमेषां दर्शयति यत्त्वयमतिदेशः पूर्वपक्षानुकूल इति त
न्नप्रयुक्तत्वसादृश्येनास्यातिदेशस्य सिद्धांतेप्युपपत्तेः सत्रेबहुवचनंमित्यप्यर्थपूर्वोक्तन्यायेनलिं
गादिकंबोध्यं उक्तमुक्तमर्थंस्तौति तेऽग्नयो मनसैवाधीयंत तत्राधानकर्मणा संपादिताः अचीयंत चि
ताएवाग्निषु ग्रहाः पात्राणि ऽगृह्यंत गृहीताः अस्तुवन्स्तोत्रं कृतवंतः उद्गातारः अशंसन्
शंसनं कृतवंतो होतारः किंबहुना यत्किंचकर्मणामुपकारकं यत्किंचयत्तीयं यज्ञनिष्ठुत्वर्थः
सन्निपत्योपकारकं चक्रियते तेनहि दुषो मनसैवाक्रियत कृतमिति एवमनुबंध्यादिभ्यो हेत
भ्यः स्यात्तेषां मनश्चिदादीनां प्रत्यांतरपक्षयत्कावत् यथाप्रत्तां तराणां शांडिल्यादिविद्यानां स्यात्तत्र
नहुत नत्वग्नीनां स्यात्तेषां कर्मप्रकरणादुत्कर्षः काप्यहष्टः कल्पितः स्यादनत्राह ह
ष्टश्चेति राजा स्वाराज्यकामो राजसूयेन यजते तिराजसूयप्रकृत्याग्रेयोष्टाकपालो हिरण्यप
दक्षिणेत्यादिनाम्नातापार्थ्यंतेष्टेर्ब्राह्मणादिकर्तृकापाराजमात्र कर्तृकराजसूयप्रकरणादुः
कर्षो दृष्टस्तिद्वदत्राप्यग्नीनां कर्मप्रकरणोदुत्कर्ष इत्यर्थः इदं सर्वं प्रथममतेऽङ्गमित्याह ॥
तदुक्तमिति ५० यदुक्तमानसवदग्नीनां क्रियाशेषत्वमिति तदूषयति नसामानादप्युपल
ब्धेर्मृत्युवन्नहिलोकायत्ति ५१ मनश्चिदादीनां मानसेन मानसिकत्वसामान्यादपि क्रिया

८१

शेषत्वेन कल्प्यं उक्तं श्रुत्यादिभ्यः स्यात् तस्मादयं लब्धेर्मनस्वत् यथा स एव मनस्तुर्यं च एतस्मिन्मंड
लेपुरुषश्चेति अग्निर्वै मनस्तुरिति वादिनः पुरुषस्याग्नेः मनसस्तु श च तत्र मान्येपि परस्परं वैषम्यं
यथा वा द्युलोकोग्निस्तस्यादित्यः समिदित्यादौ समिदादिसाम्यात्तत्र हि द्युलोकस्याग्नित्वापत्तिः
किंतु परस्परं वैषम्यं तद्वत मानस मानसिकाग्नेर्मानसिकत्वसाम्येपि परस्परं वैषम्यमित्य
र्थः ५१ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः ५२ मानसिकाग्निर्वाह्मणान्तरस्मिन्ब्राह्म
णे अयं वाव लोक एषोग्निश्चित इत्यादि श्रूयते ताद्विध्यं चित्ते ग्रौ पृथिवी च द्विरूपस्यते त्र वि
द्याविधित्वमेव लभ्यते न कर्मांगविद्याविधित्वं तथापदेतन्मंडलं तपतीति पूर्वस्मिन्नपि ब्रा
ह्मणे विद्याप्राधान्यं दृश्यते इति चकारार्थः तया च तत्समभिव्याहारात् अस्मिन्नपि ब्राह्मणे वि
द्यायाः प्राधान्यमिति भावः ननु अस्मिन्ब्राह्मणे मानसिकाग्निविद्यायाः प्राधान्ये किं मध्ये कर्मो
पक्रमस्तत्राह भूयस्त्वादिति कर्मांगानां मानसिकाग्निविद्यायां संपाद्यानां बहुत्वाद्विद्या।
वास्तदुपक्रम एवानुबंधः प्रतिपादनमित्यर्थः तस्मादियं मानसिकाग्निविद्या स्वतंत्रपु
रुषार्थहेतुरिति सिद्धं ५२ ननु विद्यायाः पुरुषार्थहेतुत्वमयुक्तं देहातिरिक्तस्य पुरुष
स्याभावादित्याक्षिपति एक आत्मनः शरीरे भावात् ५३ प्रसंगात्सपादसंगतिर्बोध्या।
अत्र किमात्मा देह एव उत तदतिरिक्त इति संशयः पूर्वपक्षे देहातिरिक्तात्माभावात्स्वर्गा

धर्मादिशास्त्रवैयर्थ्यमिति सिद्धांतेन न्यायार्थक्यमिति विभागः तत्र एके देहात्मवादिनो लोकायतिका
देहातिरिक्तस्यात्मनोऽसत्त्वं मन्यमाना देह एवात्मेति वदंति कुतः शरीरे सति चैतन्यसत्त्वाद्दी
नोभावात्तदभावे चाभावादित्यन्वयव्यतिरेकाभ्यां तेषां देहधर्मत्वेनातिरिक्तात्मसिद्ध्यभावादि
ति प्राप्ते सिद्धांतयति व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ५४ न त्वात्मनो देहाद्व्य
तिरेकः किं तु व्यतिरेक एवत्याप्यः कुतः चैतन्यादीनामात्मधर्माणां तस्य शरीरस्य मरणा
वस्थायां भावेप्यभावित्वाद्देहधर्मत्वासंभवात् यथा देहभावे भावाद्देहधर्मत्वं तथा देहभावे
प्यभावाददेहधर्मत्वमेव कुतो न स्यादित्यर्थः किंच निश्चितान्वयव्यतिरेकाभ्यां देहधर्मत्वं
वक्तव्यं न चात्र देहाभावे चाभाव इति व्यतिरेकनिश्चयः संभवति एतद्देहाभावेपि देहांतरसंबं
धेन तद्धर्मसत्त्वसंभवादिति उपलब्धिवत् तथाहि अस्ति तावत् घटाद्युपलब्धिः सा च
न देहधर्म इत्युक्तं किंच देहधर्मत्वे तस्याः प्रकाशकत्वानुपपत्तिः देहरूपादिवदिति यथा
यथा देहाद्विविक्ताया उपलब्धेः सत्त्वं मन्यते तथा तस्याः देहाद्व्यतिरेकोऽभ्युपगंतव्यो
र्यः सैव चोपलब्धिः नः आत्मेति तस्माद्देहातिरिक्तस्यात्मनोऽस्तित्वमिति सिद्धं ५४ अंगा
वबद्धास्तु न शाखासु हि प्रतिवेदं ५५ संति कर्मांगाश्रिता उपासनाः उद्गीथावयवोंकारे
प्राणदृष्टिः उक्थे पृथिवीदृष्टिः लोकेषु पंचविधं सामोपासीतेति च लोकशब्दः

पृथिव्यग्न्यंतरिक्षादित्यद्युलोकपरः पृथिव्यादिविषयकदृष्ट्या पंचविधं सामोपासीतेत्यर्थः पृ
थिवी हिंकारः अग्निः प्रस्तावः अंतरिक्षमुद्गीथः आदित्यः प्रतिहारः द्यौर्निधनमिति हिंका
रादिपंचविधे साम्नि पृथिव्यादिदृष्टिरिति विभागः अत्र संशयः किमेता उपासना यथाशा
खायां विहितास्तच्छाखोद्गीथाद्यालंबनाः उत सर्वशाखागतोद्गीथाद्यालंबना इति पूर्वोत्तर
पक्षयोः पूर्वोत्तरकोटिसिद्धिः फलं उपासनाविचारात्मकत्वात्तदादस्य पादसंगतिः त
त्र यथा शारीरात्मनो भेदात्तद्धर्माणां शारीरे न संभवः तद्वदेकशाखागतोद्गीथाद्युपे
क्षया शाखांतरगतोद्गीथादौ न संभवः इति दृष्टांतेन प्राप्ते भ्रमः अंगावबद्धा इति तुः पूर्वप
क्षनिरासार्थः एता अंगाश्रिता उपासनाः प्रतिवेदं स्वशाखास्व विद्यमानोद्गीथाद्यालंबनेना
एव न भवंति किंतु शाखांतरोद्गीथाद्यालंबना अपि कुतः उद्गीथमुपासीतेत्यादौ उद्गीथादिश्रु
तेरविशेषादिति दिशाद्वस्य चिंता हेतुर्बोध्यः ५५ इममर्थं दृष्टांतमुखेनापि साधयति मंत्रा
दिवद्वाविरोधः ५६ एकशाखाविहितोपासनानां शाखांतरगतोद्गीथादिषु प्रयोगे न विरो
धः मंत्रादिवत् तथा हि यथा तंडुलपेषणार्थमश्मादानमंत्रः कुटरुरसीत्येकत्राम्नातः
शाखांतरेपि प्राप्नोति यथा वा प्रयाजा एकत्राम्नाताः शाखांतरेपि प्राप्नुवंति तद्वदत्राप्यवि
रोधः वाशब्दो दृष्टांतप्रदर्शनरूपहेतुं तरस्तूत्रनार्थः तस्मादेकत्र विहितानामप्युपासना

83

वे॰ सू॰ वृ॰
८३

शाखांतरोद्गीथादिषु प्राप्तिरिति सिद्धं ५६ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ५७ वैश्वानरा
ख्यायिकायां प्राचीनशालादिषु षण्णां राज्ञा सह प्रश्नप्रतिवचनाभ्यां द्युलोकसूर्यवाय्वादिषु व
लिषु वैश्वानरोपास्तिः श्रुता तथा समस्तेष्वपि वैश्वानराधिकरणोक्तिं विना रूपाधिकात्राप्यनुसं
धेयाः तत्र संशयः किमिहोभयथाप्युपास्तिर्विवक्षिता उत समस्तोपास्तिरेवेति अत्र ह्युदे
वाक्यभेदः सिद्धांतेन हैक्यमिति वाच्यं तत्रोद्गीथादिष्वस्तां सन्निधिप्राप्तव्यवस्थां बाधित्वा उद्गीथा
द्युपास्तीनां सर्वशाखास्वव्यवस्थावदत्रापि व्यस्तोपास्तीनां विधिप्रसमासमस्तोपास्तिसन्निधिप्रा
प्तस्य समर्थनं बाधित्वादिविधेयत्वप्रयुक्तमिति सिद्धांतेन प्राप्ते ब्रूमः भूम्नः समस्तोपासनस्यैवास्ति
त्वाके ज्यायस्त्वं प्राधान्येन प्रतिपाद्यत्वेन व्यस्तोपास्तीनामपि क्रतुवत् यथा दर्शपूर्णमासादेः
क्रतोः सांगप्रधानस्यैकस्यैव प्रयोगो विवक्षितेन व्यस्तानामपि प्रयाजादीनां तद्वत् ननु भूम्नः
एव ज्यायस्त्वं कुतः इत्यत आह तथा हि दर्शयति प्राचीनशालादिभिरुक्तानि व्यस्तोपासनानि निंदित्वा
कैकेन राज्ञा समस्तोपासनस्योक्तत्वादेकवाक्यता श्रुतेरेव गम्यते तथा चैकवाक्यतामापन्ने
यं श्रुतिर्भूम्नः एव ज्यायस्त्वं दर्शयतीत्यर्थः ननु तर्हि राज्ञः प्राचीनशालादीन्प्रति हे औपमन्य
व कं त्वमात्मानं वैश्वानरमुपास्स इति प्रश्ने हे राजन् सुतेजा द्युलोको वैश्वानरो यं त्वं वैश्वानरमुपा
स इत्यादौ व्यस्तोपास्तिषु विधिश्रुतीनां का गतिरिति चेत्प्राचीनशालादिभिरेव गतव्यस्तोपा

८३

स्यानुवादेनसमस्तोपासनस्यविधेयत्वादनुवादत्वमेवविधिश्रुतीनांगतिरिति तस्मात्समस्तोपा
सनमेवज्यायइतिहं ५७ नानाशब्दादिभेदात् ५८ एकसगुणब्रह्मोपासकाः शांडिल्यद
हरादिविद्याः संतिएवमेकमात्मप्राणविद्यास्वपिसंति तत्रसंशयः किमेकोपासकविद्यानां
भेदोस्तिनवेतिपादसंतिफलेप्येववत् तत्रसमस्तोपास्तिषुविधिश्रुतीनांसत्वेपिसमस्तोपा
स्तेरेवज्यायस्त्ववत् एकोपासकोपास्तिषुप्रत्येकंविधीनांसत्वेपिसमस्तोपास्तेर्वज्यायस्त्वा
न्नास्तिविद्यानाभेदइतिदृष्टांतेनप्राप्ते ब्रूमः एकोपासकविद्यानानैवकुतः शब्दादिभेदा
द्वेदउपासीतेसक्रतुंकुर्वीतेत्यादिशब्दभेदात् आदिपदेनोपास्यगुणभेदाच्चेत्यर्थः
यथायागदानहोमानांकर्मणांयजेद्दद्यात्जुहुयादितिशब्दभेदाद्भेदस्तद्वदितिद्रष्टव्यं ५८
विकल्पोविशिष्टफलत्वात् ५९ यासगुणब्रह्मादिविद्याउपास्यसाक्षात्कारेणनफलहेतव
स्तासांकिंवैकृपाविकल्पसमुच्चयाभ्यामनुष्ठानमनविकल्पइतिसंशयः एवंप्राप्तेस्वेच्छ
याप्रवृत्तेर्यथाकाचिदेकैवविद्यायावज्जीवमनुष्ठेयेतिविकल्पोपिनास्तिद्वित्रादयोविद्याःस
मुच्चयेनानुष्ठेयाइत्यपिनास्त्यनियमः फलेसिद्धेतेविकल्पएवेतिनियमइतिभेदाः एवंविधि
करणेनविद्यानानात्वेसिद्धे अथैवविचारः प्रवर्ततेनोचेत्रास्तीतिद्रष्टव्यं तमज्ञावः संगतिः।
तत्रानुष्ठाननियमहेतभावाद्यथेच्छमनुष्ठानमितिप्राप्ते ब्रूमः विकल्पएवासांविद्यानांयु

क्तेः कुतः अविशिष्टफलत्वात् अविशिष्टस्यासां विद्यानां नानामुपास्यसाक्षात्करणाख्यं फलं तत्रैकया विद्य-
योपास्यसाक्षात्कृते तेन विद्यान्तरमफलं विरुद्धोपास्यद्वयसाक्षात्कारस्य युगपद्योगाच्च विद्यान्तरं व्यर्थं तं
तमेवैति कौन्तेय सदा तद्भावभावित इति भगवद्गीतास्वप्येकविद्यया एवानुष्ठेयत्वं दर्शयति तस्मादुपा-
स्यसाक्षात्कारद्वारा फलहेतुभूतासु विद्यास्वेकैवानुष्ठेयेति सिद्धं ५९ काम्यास्तु यथाकामं समुच्चीयेरन्नवा पू-
र्वहेत्वभावात् ६० याश्च प्रतीकोपास्तयो नाम ब्रह्मेत्युपासीत तस्य यथाकामचारो भवतीत्याद्याः क-
स्या उपास्यसाक्षात्कारोऽनपेक्षा स्वादृष्टद्वारा फलहेतवस्तत्र पूर्ववत्संदेहे उपास्तित्वाविशेषात्पूर्व-
वद्विकल्पनियम इति प्राप्ते ब्रवीति काम्यास्त्विति काम्यास्त्वदृष्टद्वारा फलहेतवो विद्याः यथाका-
मं समुच्चीयेरन्नवा समुच्चीयेरन् पूर्वहेतोरविशिष्टफलत्वस्य विकल्पनियमप्रयोजकस्यात्राभावादित्य-
र्थः तथा याश्च प्रतीकोपास्तयो विकल्पेनैवानुष्ठेया उपास्तित्वात्पूर्वोक्तविद्यावदित्यनुमाने उपास्य-
साक्षात्कारहेतुत्वमुपाधिरिति भावः ६० अङ्गेषु यथाश्रयभावः ६१ कर्माङ्गेषूद्गीथादिषु या आ-
श्रिता विद्यास्तासां किं समुच्चयेनैवोत वदनुष्ठानं यथाकाममिति संशयः पूर्वपक्षे समुच्चयेनानु-
ष्ठानमितरत्वाङ्गस्य सिद्धान्ते यथाकाममनुष्ठानात्र योगसौकार्यमिति वाच्यं तत्र प्रतीकोपास्तीनां
स्तनेन ब्रवीति यथाकाममनुष्ठाने युक्ते अङ्गेष्वनङ्गाश्रितोपास्तीनामपि तत्र त्वाह यथाश्रयभावः यथा-
श्रयाणामङ्गानामनुष्ठानस्वभावः तद्वदनुष्ठानस्वभावत्वमिति प्रसिद्धोदाहरणेन पूर्वपक्षः ६२ शिष्टे-

सू॰ ६२ शिष्टेश्च शासनं विधानमित्यर्थः यथांगानां प्रतिवेदं विधानं तथा तदाश्रितोपास्तीनां विधाना
विशेषाच्चांगवत्समुच्चयनियमः ६२ इतश्चैवमेवेत्याह समाहारात् ६३ ऋग्वेदोक्तप्रणवस्य
सामवेदोक्तोद्गीथस्य चैक्योपासने उक्तात्र होतृनेफलमाह श्रुतिः होतृषदनाद्धैवापि दुरुद्गीथम
नुसमाहरतीति होतृषदनशब्देन होतृकर्मशंसनस्थानवाचिना होतृकृतशंसनात्मककर्म लक्ष्यते॥
उद्गाता प्रणवोद्गीथयोरैक्यज्ञानमाहात्म्यात्स्वेन कृतादुरुद्गीथमपि स्वरादिप्रमादादुत्पन्नमुद्गाने
होत्रा सम्यक्कृतेन शास्त्रमहापादनं समाहारं सेवृह प्रतिसमादधात्येवाबल्लहोतृकर्मसंबद्धोंका
रस्य ऋग्वेदोक्तस्य सामवेदोक्तसोद्गीथस्य चैक्यो न चिंतितन्नादित्यर्थः तथा चैवदर्श्योक्तप्रणवोद्गी
थयोरैक्यज्ञानस्य हर्षफलबुवहार्त्कं सर्ववेदोक्तानामप्याश्रितोपासनानां समुच्चयं स्च चयति सर्वो
पासनेषु वेदांतरोक्तोपासनस्य वेदांतरोक्तोद्गीथादिनासंबंधस्य समानत्वादिति सूत्रकृताशयः॥
६२ गुणसाधारण्यश्रुतेश्च ६४ उद्गीथोपासनायां गुणभूतस्योपास्यस्योंकारस्य तेनेयं त्रयी वि
द्या वर्तते तेनेनोंकारेणैव दत्रयोक्तं कर्म भवतीति कसर्वकर्मणि साधारण्यस्य श्रवणात्तदाश्रितो
पासनानामपि साधारण्यं समुच्चयानुष्ठानमित्यर्थः यद्वा कर्मगुणानामुद्गीथादीनां सर्वे
षां समुच्चित्यानुष्ठानात्मकसाधारण्याभावे हि तदाश्रितोपासनानां समुच्चयो न भवेत् नैतद
स्ति प्रयोगवचनेन सर्वांगग्राहिणं तेषां साधारण्यश्रुतेः तथा च तदाश्रितानामुपासनाना

मपि समुच्चय इत्यर्थः ६४ एवं प्राप्ते सिद्धान्तयति नवा तत्सहभावाश्रुते ६५ वाशब्दस्त्वर्थेः पक्षव्या
वर्तनार्थः नांगाश्रितोपासनानामंगवत्समुच्चयनियमः तत्सहभावाश्रुतेः यथांगानां सहभा
वः श्रूयते ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादित्यादिना तथा तेषामुपासनानां सह
भावस्याश्रुतेरित्यर्थः नचांगतंत्रत्वादुपासनानां समुच्चयनियमः अंगतंत्रस्यापि गोदोहनस्याऽ
वहितानानियमात् यदुक्तं शिष्टेश्चेति सूत्रे अंगवद्विहितानां विशेषात्समुच्चय इति तत्र तेन हीदम
नुमानं लभ्यते उपासनानि समुच्चित्यानुष्ठेयानि विहितत्वादंगवदिति तत्र च क्रत्वर्थत्वमुपाधिः प
रं च सूत्रद्वयोक्तं लिंगद्वयमप्रयोजकत्वेन दूषणीयं ६५ दर्शनाच्च ६६ दर्शयति च श्रुतिरंगा
श्रितोपासनानामसमुच्चयं एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोभिरक्षतीति ऋग्वेदादिवि
हितांगलोपे व्याहृतिहोमप्रायश्चित्ताभिज्ञत्वं ब्रह्मण एवंवित्त्वे सर्वोपासनानां समुच्चये हि विज्ञान
वता ब्रह्मणा परिपाल्यत्वमितरेषामृत्विजां न स्यात्सर्वेषां सर्ववित्वात् अस्ति च परिपाल्यत्वकीर्तनं
तस्मान्न सर्वोपासनासमुच्चय इति सिद्धं ॥ ० ॥ ॥ ॥ ॥

राम ॥ राम ॥ इति श्रीब्रह्मसूत्रवृत्तौ तृतीयस्या ॥ राम ॥
॥ शिव ॥ ध्यायस्य तृतीयः पादः ॥ शिव राम
शिव ॥ शिव ॥ समाप्तः ॥ ३ ॥ शिव ॥ शिव

ओम् ॥ पुरुषार्थोऽतः शब्दादिति बादरायणः १ पूर्वस्मिन्पादे परापरब्रह्मविद्यानां गुणोपसंहा
रोत्क्रान्तिपरिमाणमवधारितं इदानीं तासां कर्मानपेक्षाणामेव पुरुषार्थसाधनत्वं निरूप्यते तत्र
कर्मानपेक्षाणामासां विद्यानां कर्माङ्गानीत्याकाङ्क्षायां यज्ञादीनि बहिरङ्गाणि शमादीन्यन्तरङ्गाणि
च निरूप्यन्त इत्येकविद्याविषयकत्वमनयोः पादयोः संगतिः तत्र परब्रह्मविद्यामाश्रित्य वि
चार्यते किमौपनिषदात्मविद्या कर्मकर्तृद्वारा क्रत्वनुप्रवेशिनी उत स्वतन्त्रैव पुरुषार्थसाधन
मिति अत्र पूर्वोत्तरपक्षयोः पूर्वोत्तरकोटिसिद्धिः फलं पूर्वपादान्त्याधिकरणे कर्माङ्गविद्यो
क्तिप्रसंगात् ब्रह्मज्ञानस्य कर्माङ्गत्वमाशङ्क्य सिद्धान्तमुपक्रमते पुरुषार्थ इति अतोऽस्मादौप
निषदात्मज्ञानात्स्वतन्त्रात्पुरुषार्थो मोक्षः सिध्यतीति बादरायण आचार्यो मन्यते कुतः तरति शो
कमात्मवित् ब्रह्मवेद ब्रह्मैव भवतीत्यादेः केवलविद्यायाः प्रोक्तहेतुत्वबोधकशब्दादित्यर्थः इदमु
पलक्षणं सगुणविद्यानामपि स्वातन्त्र्येण फलहेतुत्वं तत्तत्फलश्रुतेरिति बोध्यम् १ एवं सिद्धान्तमु
पक्रम्य पूर्वपक्षयति शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः २ कर्तृत्वेनात्मनः कर्मशेष
त्वात्तज्ज्ञानमपि पर्णतावत्कर्मशेषात्मद्वारा क्रत्वङ्गं अत्रायं प्रयोगः तत्त्वज्ञानं कर्माङ्गफल
श्रुत्यत्वे सति कर्माङ्गाश्रयत्वात्पर्णतावदिति ननु विशेषफलश्रुतेर्हेतुः तरति शोकमात्मविदित्या
दिफलश्रुतेः सत्त्वादित्यत आह पुरुषेति यथान्येषु द्रव्यसंस्कारकर्मसु पर्णमयीद्रव्ययजमान

86

वे॰ सू॰ वृ॰
८६

स्योजनादिसंस्कारप्रयाजादिरूपेषु श्रयापश्लोकश्रवणादिफलश्रुतिरर्थवादः तथात्रापि पुरु
षार्थश्रुतिरर्थवाद इति जैमिनिराचार्यो मन्यते तथा च न हेतोर्विशेषणासिद्धिरिति भावः २ आचार
दर्शनात् ३ जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे इत्यादौ ब्रह्मविद्यावतां जनकादीनां विद्यया
सकर्माचारदर्शनाल्लिङ्गाद्विद्यायाः स्वातन्त्र्याभावेन कर्माङ्गत्वमित्यर्थः विदेहानामधिपतिर्जन
को नाम राजा बहुदक्षिणसंज्ञेनाश्वमेधेन बहुदक्षिणायुक्तेन यागकृतवानित्यर्थः ३ तच्छ्रुतेः ४
किंच यदेव कर्म विद्यया करोति तदेव वीर्यवत्तरं भवतीति तृतीयया श्रुत्या विद्यायास्तु सकर्मशेष
त्वश्रवणान्न स्वातन्त्र्येण मुक्तिफलत्वमित्यर्थः ४ समन्वारम्भणात् ५ तं विद्याकर्मणी समन्वार
भेते इति फलारम्भे विद्याकर्मणोः साहित्यदर्शनादपि न मुक्तिफलत्वं विद्यायाः किंतु कर्माङ्गत्वमे
वेत्यर्थः तं परलोकं व्रजन्तं विद्याकर्मणी समनुगच्छत इत्यर्थः ५ तद्वतो विधानात् ६ आचार्य
कुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्याय
मधीयान इति श्रुत्या सकलवेदार्थज्ञानवतः कर्मविधानादपि लिङ्गात्कर्माङ्गत्वं वेदार्थब्रह्म
विद्याया इत्यर्थः यद्यपि वेदमधीत्येत्यध्ययनमात्रं श्रुतं नार्थबोधः तथापि फलवदर्थावबोधप
र्यन्तमध्ययनमिति बोध्यं आचार्यस्य कुलं गृहं ब्रध्ययनेयत्नं कृत्वा तदनन्तरं गुरोः शुश्रूषणरूप
कर्मविधायातिशेषेण शिष्टेन कालेन यथाविधानं यद्विज्ञायागीत्वप्राप्तः स्नानादिविधानम

८६ग॰

नतिक्रमम्य वेदमधीत्यानंतरमभिसमावृत्य विसर्गी कृत्वा कुटुंबे गार्हस्थ्ये स्थितः शुचौ देशे स्वाध्यायमध्य
यनं कुर्वन्कर्मोत्तराणि च विहितानि यथाशक्ति कुर्वाणो ब्रह्मलोकमभिसंपद्यत इत्यर्थः ६ नि
यमाच्च ७ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते
नर इत्यादिकाद्वा वज्जीवं कर्माचारनियमाच्च विद्यायाः कर्मशेषत्वमेवेत्यर्थः इह देहे शत
समाः शतसंवत्सरान् जीवितुमिच्छेदिति यावत्कर्माणि कुर्वन्नेवेति नियमविधिः एवं त्वयि
नरे वर्तमाने सत्यशुभकर्म न लिप्यते तेन त्वं न लिप्यस इत्यर्थः इतः प्रकारादन्यथा प्रकारां
तरं नास्ति यतः कर्मलेपो न स्यादित्यर्थः तस्माद्ब्रह्मविद्या कर्मांगमेवेति प्राप्ते समाधत्ते ७
अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ८ तुः पूर्वपक्षनिरासार्थः यदुक्तं तत्त्वज्ञानं
कर्मांगफलश्रुतेः सत्त्विकर्मांगाश्रयत्वादिति तत्र हेतोर्विशेष्यणासिद्धेः कुतो विशेष्यासि
द्धिः अधिकोपदेशात् कर्मकर्तुः संसारिणः कर्मांगादधिकस्याकर्तुरसंसारिणश्चिन्मात्रस्य
वेदांतेषूपदेशात् तथा च तत्त्वज्ञानं चिन्मात्राश्रयमेवेति भवति विशेष्यासिद्धिः एवं च तत्त्वज्ञा
नेऽश्रुतेरपि नार्थवादत्वं तस्मात्पुरुषार्थोऽतः शब्दादिति यन्मतं बादरायणस्य तदेवमेव तथैवेत्य
र्थः अधिकोपदेशासिद्धिमाशंक्याह तदिति तस्याधिकस्यात्मनो यः सर्वज्ञः स सर्ववित् इत्या
दिश्रुतिमंत्रार्थः त्रेषु दर्शनादित्यर्थः ८ यदुक्तमाचारदर्शनादिति तत्राह तुल्यं तु दर्शनं ९

87

वे.सू.टी.
८७

विद्यायाः कर्मशेषत्वाभावेप्याचारदर्शनं तुल्यमेव तथाहि एतद्ध स्म वै तत् पूर्वे विद्वांसोऽग्निहो
त्रं न जुहुवांचक्रिर इत्यादिका श्रुतिर्विदुषः कर्माचाराभावं दर्शयति तुशब्देनाकर्मांगत्वलिंग
दर्शनस्य प्राबल्यं सूचितं नहि ब्रह्मविद्यावतां जनकादीनां कर्माचारदर्शनं विद्यायाः कर्मशेषत्वे
लिंगं तेषामहमभिमानाभावेन चोदनाप्रवृत्त्यभावात् तत्कृतकर्मणश्चोदनालक्षणत्वाभावेना
चोदनाप्रवृत्त्यभावे तत्कृतकर्मणश्चोदनालक्षणत्वाभावेनाकर्मतया तथाचारदर्शनस्य विद्या
याः कर्मशेषत्वबोधने दुर्बलत्वादिति ९ यदुक्तं तच्छ्रुतेरिति तत्राह असार्वत्रिकी १० यदेव वि
द्यया करोतीति श्रुतिरसार्वत्रिकी विद्याविषया न भवति प्रकृतोद्गीथविद्यामात्रपरत्वात् न
यावच्छ्रुतिबलाद्ब्रह्मविद्यायाः कर्मांगत्वमित्यर्थः १० यदप्युक्तं समन्वारम्भणादिति तत्राह विभा
गः शतवत् ११ तं विद्याकर्मणी समन्वारभेते इत्यत्र विभागो बोध्यः विद्यान्यं पुरुषमन्वारभते
कर्मान्यमिति शतवत् यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते पंचाशदेकस्मै पंचाशदे
कस्मै तद्वदित्यर्थः वस्तुतो मुमुक्षुसमन्वारंभवाक्यममुमुक्षुविषयत्वाभावात् विद्याशब्देन विहितो
द्गीथादिविद्या प्रतिषिद्धा च नग्नस्त्रीदर्शनादिरूपा गृह्यते तादृशविद्यायाः फलारंभे कर्मसा
हित्येपि न क्षतिरिति मंतव्यं ११ यत्पुनरुक्तं तद्वतो विधानादिति तत्राह अध्ययनमात्रवतः १२
आचार्यकुलाद्वेदमधीत्येति वाक्ये वेदाध्ययनमात्रवतः कर्म विधीयते नात्मज्ञानवत इत्य

८७

र्थः मात्रपदेनोपनिषदात्मज्ञानमेव व्यावर्त्यते नेन कर्मकांडार्थावबोधः कर्मज्ञानं विनानुष्ठाना
संभवादिति १२ यच्चोक्तं नियमाच्चेति तत्राह नाविशेषात् १३ कुर्वन्नेवेह कर्माणीति नियमवा
क्यं न ज्ञानिविषयं विद्वांसमिति विशेषाभावादित्यर्थः १३ अस्य नियमवाक्यस्य ज्ञानिविषयत्वेप्य
विरोधः ज्ञानिस्तुत्यर्थत्वादित्याह स्तुतयेनुमतिर्वा १४ अथ विदुषः कर्मानुमतिः कर्मानु
ष्ठानं ब्रह्मविद्यास्तुतये ज्ञानव्यास्तुतिरस्य वैयाज्जीवं कर्म कुर्वत्यपि त्वयि विदुषि न कर्म लेपाय भवति
विद्यासामर्थ्यादिति अस्मिन्पक्षे नान्यथेतोस्तीत्यस्यायमर्थः एवं कर्म कुर्वत्यपि त्वयि नरे ब्रह्मभा
वाद्विद्यालभ्यात्र्यथा संसारायत्तिर्नास्ति यतो न कर्म लिप्यत इति १४ अपि च ब्रह्मविद्यायाः प
रोक्षफलं दर्शयतीति श्रुतिः कालान्तरभाविफलकं कर्माणिवारयतीत्याह कामकारेण चैके १५
एके विद्वांसः प्रत्यक्षीकृतविद्याफलाः परोक्षकर्मसाधनं प्रजादिकं कामकारेण स्वेच्छया त्य
क्तवन्त इति श्रूयते एतद्ध स्म वै तत्पूर्वे विद्वांसो प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽय
मात्मायं लोक इति विद्यायाः कर्मांगत्वाभावे विदुषः स्वेच्छया कर्मसाधनप्रजादित्यागो लिं
गमनेन सूत्रेणाभ्युच्यत इति वा बोध्यं विद्यायाः कर्मांगत्वे हि कर्मसाधनत्यागो न स्यादिति श्रुत्यर्थ
स्तु येषां नोऽस्माकमयमपरोक्ष आत्मायं लोकः प्रत्यक्षफलं भवति किं प्रजया करिष्याम इ
ति निश्चित्याग्निहोत्रादि कर्म न कृतवन्त इति १६ उपमर्दं च १६ किं च कर्मानुष्ठानहेतोः क्रि

याकारकफलविभागस्य समस्तस्याविद्याकृतस्य विद्यायाः सामर्थ्यादुपमर्दमभावमामनंति यत्र त्व
स्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिनादिना तथा च ब्रह्मविद्यायाः कर्मविरोधित्वान्न कर्मांगत्वमि
ति भावः १६ विद्यायाः कर्मानंगत्वे हेत्वंतरमाह ऊर्ध्वरेतस्सु च शब्दे हि १७ ऊर्ध्वरेतस्सु प्रतिष्ठब्रह्म
विद्यावगतानंदहितस्या कर्मांगत्वेन संभवति यतीनामग्निहोत्रादिकर्माभावात् तथा चायं प्रयोगः वि
द्या कर्मणां नांगं मिथोऽव्यभिचारित्वात् ऋतगमननैष्ठिकब्रह्मवदिति ननु यत्याश्रमसद्भावे
किं मानमित्यत आह शब्दे हीति वेदे ह्यूर्ध्वरेतस आश्रमाः श्रूयंते त्रयो धर्मस्कंधाः यज्ञोऽध्ययनं दा
नमिति प्रथमस्तप एव द्वितीयः ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यंतमात्मानमाचार्यकुलेऽवसाद
यन् सर्व एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेतीति ब्रह्मचर्यादेव प्रव्रजेदित्यादौ श्रुत्यर्थस्तु
यथाह श्वाश्रमपरः यज्ञादिधर्मप्रधानो गार्हस्थ्याश्रम एकः तपः प्रधानो वानप्रस्थाश्रमो द्विती
यः तृतीयः स्पष्टः एते चाश्रमिणो गृहिणो नित्यफलभाजः मुक्ता ब्रह्मसंस्थस्संन्यासिनो नित्यफलत्व
माह ब्रह्मेति ब्रह्मणि प्रत्यग्रूपे सम्यक् निष्ठा यस्य स ब्रह्मसंस्थः परिव्राडित्यर्थः तस्मात् ब्रह्मविद्या नक
र्मांगं किं ब्रह्मतंत्रा मुक्तिफलेति सिद्धं त्रयो धर्मस्कंधा इत्यादिश्रुतिराश्रमसद्भावे प्रमाणमित्युक्तं तद
द्विपति परामर्शं जैमिनिरचोदनाच्चापवदति हि १८ तत्त्वज्ञाननिष्ठांतरंगसाधनं पारिव्राज्यं अत्र
निरूप्यते इति स्मृत्वा साधनाध्यायपादसंगतिः अत्र संशयः किं पारिव्राज्यमनुष्ठेयं न वेति पूर्व

पक्षे पारिव्राज्यस्याभावाद्विद्यायाः कर्माव्यभिचारेण कर्माङ्गत्वमिति फलं सिद्धं तेन त्यक्तवाद्विद्यायाः स्वातंत्र्यं
इति बोध्यं तत्र पारिव्राज्यं प्रमाणाभावान्नानुष्ठेयमित्याह परामर्शमिति त्रयइति श्रुतौ चतुर्णा
माश्रमाणां परामर्शमनुवादमात्रं जैमिनिराचार्यो मन्यते न विधीयते इत्यर्थः श्रुतिरचोदना लिङाद्य
भावात् आश्रमस्य श्रुते ब्रह्मसंस्थतास्तुतिपरत्वं चेति चकारार्थः तथा चान्यपरत्वाद्वाक्यात् आश्रमानुमा
नेनाश्रमसिद्धिरिति भावः तपःशब्देनैव वानप्रस्थस्य गार्हस्थ्याश्रमयोरनुवादः इति दृष्टव्यं नियमा
नत्वात् पारिव्राज्यं नानुष्ठेयमित्याह अथ वदितिवीरहा वा एष देवानां योग्निमुद्वासयत इत्यादिश्रु
तिरन्यमुद्वासनप्रत्यानं पारिव्राज्यमपवदतीत्यर्थः यत्त्वाश्रमातिरिक्ताश्रमान्तरमग्निहोत्रादिविधा
नसामर्थ्यात्प्रामाणिकमेव त्रयइत्यादिश्रुतावनूद्यते यत्त्वाश्रमस्तु न श्रुतिसिद्धः किं तु स्मृतिसि
द्ध एवानूद्यते स्मृतिश्च यावज्जीवमग्निहोत्रं जुहुयादित्यादिप्रत्यक्षश्रुतिविरोधादप्रमाणमिति
पूर्वपक्षाभिमानः यद्यपि ब्रह्मचर्यादेव प्रव्रजेदिति प्रत्यक्षा श्रुतिरस्ति तथापीयं श्रुतिर्नास्तीक
वाचिनेयमिति मन्तव्यं १८ समाधत्ते अनुष्ठेयं बादरायणः साम्यश्रुते १९ पारिव्राज्यमनुष्ठेयं॥
भगवान्बादरायणो मन्यते कुतः त्रयइत्यादिश्रुतौ प्रामाणिकगार्हस्थ्येन साम्यश्रवणादित्यर्थः
अयं भावः तपःशब्देन वानप्रस्थाश्रमस्यैवानुवादः संन्यासिनां तपःश्रमत्वाद्ब्रह्मसंस्थ इत्यनै
नैव यत्याश्रमानुवादः आश्रमचतुष्टयानुवादेन ब्रह्मसंस्थतास्तुतिपरत्वमेव वाक्यस्य तथाप्य

परादपि वाक्यात्प्रतीयमानात्त्वाश्रमाः सिध्यंते देवताधिकरणन्यायात् न च वरिहेत्यादिश्रुतिविरोध
नेतस्याश्रुयरक्षानादग्निहोत्रनेष्ठुक्ताहिताग्निविषयत्वादिति १९ एवमस्य वाक्यस्यानुवादत्वमंगीकृत्या
नुवादस्य प्रमाणांतरसापेक्षत्वादाश्रमाणां प्रमाणिकत्वमुक्तमिदानीमस्मिन्नेव वाक्ये आश्रमाणां
विधिकल्पनमन्यथास्यानुवादकत्वे आश्रमविधायिवाक्यांतरकल्पनागौरवप्रसंगात् सिद्धे वा
क्ये विधिमात्रकल्पनायाश्च लघुत्वादित्याह विधिर्वा धारणवत् २० अस्मिन्वाक्ये आश्रमाणां वि
धेरेव नानुवादनं चानेकाश्रमविधाने वाक्यभेदः स्यादिति वाच्यं अपूर्वत्वेनाश्रमाणां विधेयत्वस
कत्वेन वाक्यभेदस्येष्टत्वात् एकवाक्यताप्रतीतावपि तत्त्यागेनापूर्वर्थ्याविधौ दृष्टांतमाह धारणेति
स्ताग्निहोत्रप्रकरणेन्तरीये पित्र्ययते स्रुविप्रच्छिन्नं हविराहवनीयं प्रतियदानीयते तत्र श्रूयते अ
धस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीति तत्र संदेहः अधस्तात्समिद्धारणं विधेयं किंवा
क्यत्वस्योपरिहीत्यादेरनुवादतया प्रतीतावपि स्रुचिस्थहविरुपरिसमिद्धारणस्यापूर्वत्वादेकवाक्य
ताभंगेन विधिर्यथा कल्पितः तथेहापीत्यर्थः वस्तुतस्तु ब्रह्मसंस्थत्वमेव पारिव्राज्यलक्षणमत्र
वाक्ये विधीयते आश्रमत्रयस्यानुवादेनानित्यफलत्वेनाश्रमत्रयनिंदया ब्रह्मसंस्थत्वस्यैव नित्यफल
त्वेन स्तूयमानत्वात् यत्प्रशस्यते तद्विधेयमिति न्यायात् न च ब्रह्मसंस्थत्वस्य योगिकार्थस्य गृहस्थादे
रपि संभवात्कथं ब्रह्मसंस्थत्वेन पारिव्राज्यमेवेति वाच्यं गृहस्थादीनां स्वस्वकर्मासक्ततया ब्रह्मसंस्थ

त्वायोगात्प्रतिषिध्यमाणः परिव्राडेव ब्रह्मसंस्थ इति तथा च नास्मिन्नद्वैवाक्यभेद इति तस्मात्पारि
व्राज्यस्य प्रामाणिकत्वात्तेषां च कर्ममात्रान्निवृत्तेः ब्रह्मविद्याधिकारः सा तंत्र २० स्तुतिमात्रमुपादानादि
ति चेन्नापूर्वत्वात् २१ उद्गीथादिविद्यास्वश्रूयते स एष उद्गीथो रसानां रसतमः परम इत्यादि तत्र सं
शयः किमिदं कर्मांगोद्गीथस्तुतिमात्रमुतोद्गीथोपासनायां गुणविधायकमिति पूर्वपक्षे उद्गी
थमुपासीतेत्यादेः सर्वस्यापि स्तुतिमात्रत्वात्कर्मांगाश्रितोपासनानुष्ठानसिद्धिः फले सिद्धांते क
र्मांगाश्रितोपासनानां विधिर्यत्नादनुष्ठानमितिरिति एवं चांगपरतंत्राणामपि विद्यानामनुष्ठानस
मर्थत्वेन पुरुषार्थहेतुत्वोक्त्या नोगानाम्नातब्रह्मविद्यायाः पुरुषार्थहेतुत्वं किमु वक्तव्यमिति सिद्धेः
पादसंगतिः तत्रानुष्ठेयाश्रममात्रस्य श्रुतेः पारिव्राज्यस्यानुष्ठेयत्ववत् रथमेवजहुरादिमरस्या
दिकर्मांगस्तुत्या रसतमत्वादिवाक्यस्यापि स्यात्स्तुतिमात्रत्वमिति दृष्टांतेन पूर्वपक्षयति स्तुति
मात्रमिति रसतमत्वादिवाक्यं सर्वमपि कर्मांगविधिस्तुतिमात्रं कर्मांगोद्गीथाद्युपादानादिति चेन्न
कुतः अपूर्वत्वात्कर्मांगोद्गीथाद्युपासनानां रसतमत्वादिगुणानां चापूर्वत्वात् अन्यतोऽप्राप्तत्वा
द्यागादिवद्विधेयमेवेत्यर्थः प्रकृत एवं विधिसंभवे प्रकरणांतरगतोद्गीथादिविधिस्तुति लक्षणा
कल्पनमन्याय्यतरमिति भावः २१ भावशब्दाच्च २२ उद्गीथमुपासीत सामोपासीतेत्यादिविधि
वाचकविधेयत्वमेवेत्यर्थः २२ पारिप्लवार्था इति चेन्न विशेषितत्वात् २३ वेदांतेषु तत्र तत्र

90

वे॰सू॰वृ॰
९०

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी चेत्याद्या आख्यायिकाः श्रूयंते तत्र संशयः
किमेताः पारिप्लवार्थाः उत सन्निहितविद्यास्तुत्यर्था इति पूर्वपक्षे कथानामासां पारिप्लवप्रयोगशेष
त्वात्तदेकवाक्यतापन्नशब्दबोध्यविद्यायाः प्राधान्याभावेन पुरुषार्थहेतुत्वासिद्धिः फलं सिद्धांते
तत्सिद्धिरिति मंतव्यं एवं फलपर्यवसानादेवास्य पादसंगतिर्बोध्या तत्र रसतमत्वादेरुद्गीथादि
स्तुत्यर्थत्वापेक्षया उपास्यविषयसमर्थकत्वस्य जाग्रत्त्वं कथनामपि विद्यास्तुत्यर्थत्वापेक्षया
पारिप्लवशेषत्वं ज्याय इति दृष्टो तेन पूर्वपक्षयति पारि इति अश्वमेधे पुत्रादिपरिवृताय राज्ञे यजमा
नायाधिकथाकथनं तत्पारिप्लवशब्देनोच्यते तदर्था एवौपनिषदकथा अपीत्यर्थः समाधत्ते ॥
नेति कुतः विशेषितेति पारिप्लवमाचक्षीतेत्युपक्रम्य मनुर्वैवस्वतो राजेत्यादिनाख्यानविशेषकाणां विदे
वकथानां पारिप्लवशेषत्वेन विशेषितत्वादित्यर्थः तस्मादौपनिषदकथानां नापारिप्लवशेषत्वं ॥
२३ ननु तर्हि किमार्था इमाः कथा इत्याशंक्य सन्निधिबलाद्विद्यार्था इत्याह तथा चैकवाक्यतोपबंधात्
२४ तथा चोक्तेषु न्यायात् पारिप्लवार्थत्वाभावे सति सन्निधिबलाद्विद्याशेषत्वं कथानां वाक्यतो सन्निहि
ततत्तद्विद्यैकवाक्यतादर्शनादित्यर्थः कथानां विद्यास्तुतिलक्षकत्वेन विद्यासौकार्यार्थत्वेन च वि
द्यैकवाक्यत्वं बोध्यं तस्मात्सन्निहितविद्याशेषत्वमेव कथानामिति सिद्धं २४ एवं पुरुषार्थाधिकर
णे ब्रह्मविद्यायाः स्वातंत्र्यं प्रतिपाद्य तत्प्रसक्तात्प्रासंगं विचारं परिसमाप्य पुरुषार्थाधिकरणस्य फलमा

ह अत एव चाग्नीन्धनाद्यनपेक्षा २५ किं ब्रह्मविद्यास्वरूपफले मोक्षे शेषत्वेन यज्ञादिकर्माण्यपे-
क्षते न वेति संदेहे कथानां विद्याशेषत्वेनापेक्षावत्कर्मणामपि फले विद्याशेषत्वेनापेक्षाव्याप्या
यज्ञादिश्रुत्या विविदिषायां विनियुक्तयज्ञादीनां विषयसौन्दर्यलभ्यायां तस्यामनन्वयादिन्द्रियादि
षयत्तानसाध्यमोक्षेन्वयसंभवादपेक्षा तद्भुतिप्राप्तेक्षमः अस्याधिकरणे ब्रह्मविद्यायाः
कर्मशेषत्वनिरासेन यत्पुरुषार्थहेतुत्वमुक्तं तदनेन शब्देन परामृश्यते अत एव ब्रह्मवि-
द्यायाः स्वातन्त्र्येण पुरुषार्थहेतुत्वादेव अग्नीन्धनशब्देन स्वस्वाश्रमविहितानि कर्माणि लक्ष्य-
ते विद्याफले मोक्षे कर्मापेक्षा नास्ति मुक्तिज्ञानस्यैव रज्जुतभ्रमनिवर्त्तकत्वादिवत्यर्थः अयं भावः यज्ञा-
दिश्रुत्या विविदिषायामेव कर्मणां विनियोगश्रवणान्न मोक्षे कर्मापेक्षा न च विषयसौन्दर्यलभ्या-
यां तस्यामनन्वयः कर्मणामिति वाच्यं ब्रह्मज्ञानेच्छोत्पत्तिप्रतिबंधकल्मषनिवृत्तिजनन-
द्वारेच्छायामन्वयसंभवादिति अस्याधिकरणफलपरत्वान्न पृथक्पादसंगत्याद्यपेक्षा २५
सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् २६ ब्रह्मविद्या किं स्वोत्पत्तौ कर्माण्यपेक्षते न वेति संदेहे पू-
र्वपक्षे ज्ञानार्थयज्ञाद्यनुष्ठानाभावः फले सिद्धान्ते तदनुष्ठानावश्यंभावः अत्र यज्ञादीनां शमा-
दीनां च ज्ञानसाधनानां निरूपणादस्ति पादसंगतिः तत्र यथा ब्रह्मविद्यायाः प्रमाणत्वाच्च
कज्ञानस्यैव स्वफले न कर्मापेक्षा तथा स्वोत्पत्तावपि न कर्मापेक्षा प्रमाणादेवेति दृष्टान्तेन

प्राप्तेः क्रमः विद्यायाः स्यात्ततो सर्वेषां माश्रमाणामपेक्षास्ति कुतः यज्ञादिश्रुतेः तमेतं वेदानुव
चनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेत्युपायाः कर्मणां सर्वेषां ज्ञानसा
धनत्वबोधिकायाः श्रुतेः यद्यप्यत्र विविदिषन्तीति वर्तमानोपदेशः प्रतिभाति न विधिः तथा
पि यज्ञादीनां ज्ञानसंयोगस्यापूर्वत्वाद्विधिः कल्प्यः ब्रह्मानुभवकामो यज्ञादि कुर्याच्चानुभ
वस्य प्रमाणाधीनत्वात्तत्र यज्ञाद्युपयोगेति वाच्यं मलिनांतःकरणस्य सत्यपि प्रमाणेनानुभवानुत्प
त्तेरनुभवोत्पत्तिप्रतिबंधकांतःकरणमालिन्यनिवृत्त्यादिपरंपरया ज्ञानस्य यज्ञादिजन्य
त्वेन तदपेक्षायाः आवश्यकत्वादिति ननु परंपरया ज्ञानोत्पत्तौ कर्मापेक्षा चेन्मोक्षेप्यपेक्षास्ति
तत्राह अश्ववदिति यथाश्वस्य योग्यतावलाद्रथचर्यायां विनियुज्यते न लांगलाकर्षणे तद्वत्क
र्मणां मोक्षे योग्यताभावान्नापेक्षेत्यर्थः २६ ज्ञानोत्पत्तौ बहिरंगमुक्त्वांतरंगमाह शमदमा
द्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् २७ यदि कश्चिद्यज्ञादीनां ज्ञा
नसाधनत्वविध्यभावात् ब्रह्मविद्यार्थिना नानुष्ठेयत्वमन्येत तथापि शमदमाद्युपेतः स्याद्ब्र
ह्मविद्यार्थी स्यादेव कुतः तद्विधेः तस्मादेवंविच्छांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्म
न्येवात्मानं पश्यतीति तदंगतया विद्याहेतुत्वेन तेषां शमादीनां विद्यानाहितानां चैतेषाम
वश्यानुष्ठेयत्वादित्यर्थः यज्ञादीनां ज्ञानसाधनत्वे विधिर्नास्तीति यदभ्यधायि तमभ्युपेत्यैवमुक्तं

भगवतास्त्वत्रुक्तं तातघायितिवितिवृत्तो विधिरस्तीत्युक्तमेवेति वोध्यं यस्मादेवमात्मानं विदि-
त्वा पापेन कर्मणा न लिप्यते तस्मादेवंवित् शमाद्युपेतो विचारयेदिति सूत्रार्थः अत एवैवंविदि-
ति विद्यासन्निधानाच्छमादीनामंतरंगत्वं विविदिषासन्निधानाद्यज्ञादीनां बहिरंगत्वमिति बो-
ध्यं २७ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् २८ बृहदारण्यके श्रूयते प्राणसंवादे न
हवास्यानन्नं जग्धं भवतीत्यर्थः अस्य प्राणोपासकस्य यज्जनमात्रस्य जग्धं भक्ष्यं तत्सर्वम
नन्नं न भवति ह अन्नमेव भवतीत्यर्थः तत्र संशयः किमयं प्राणोपासकस्य सर्वान्नानु
मतिः शमादिवद्विद्यांगं विधीयते उत नेत्यर्थः कथं तर्हीति पूर्वपक्षे प्राणविदो मत्स्याभ-
क्ष्यविभागादिसिद्धिः सिद्धांते न सिद्धिरिति अत्र ब्रह्मविद्यासाधनस्य प्राणविद्यायाः स्वतन्त्रपुरुषा-
र्थहेतोः फलत्यर्थः सर्वेच्छानुज्ञानमिति निरूपणात् पादसंगतिः अत्र विद्यासन्निधानाच्छमा
दिवद्विद्यांगमेव सर्वान्नानुमतिरिति प्राप्ते ब्रूमः न सर्वान्नानुज्ञानं विद्यांगं विधीयते विध्यभा
वात् श्वादिमर्यादस्यान्नस्य प्राणोपासकेनानुमशक्यत्वाच्च न ह्यशक्यो विधिः संभवति तस्मात्प्रा-
णविद्यायां प्राणस्यान्नमिदं सर्वमिति यच्चिंतनं विहितं तत्प्रशंसार्थोयमर्थवादः इदमभिप्रेत्याह
सूत्रकारः सर्वान्नानुमतिश्च प्राणात्यय इति सावधारणमिदं सूत्रं प्राणात्यय एव हि परस्मि-
न्नापदि सर्वमन्नं स एवं जैविंदांसमविद्वांसं प्रतिवादनीयत्वेनानुमतिं नस्वस्थं प्रति तद्दर्शना

त् अभक्ष्यभक्षणस्यापत्काल एव श्रुतौ दर्शनादित्यर्थः तथा हि मठचीहतेषु कुरुष्विभ्येन तस्मिन्ना
स्यौषस्तिश्चाक्रायणः किल ऋषिः कुरुदेशे दुर्भिक्षे जाते दुःखपीडितो देशान्तरमागतः कदाचिद्ध
स्तिपालकदेशं संप्रविष्टः तेन हस्तिपालकेनार्धभक्षितान्कुल्माषान्भक्षितवान् ते
नोदपानं गृहाणेत्युक्ते स त्वच्छिष्टं न मे पीतं स्यादिति प्रतिषिध्य किमेते माषा अच्छिष्टा नेति हस्तिपा
केनोक्ते नेत्यत्र हेतुमाह चाक्रायणः कुल्माषभक्षणं यद्यहं न कुर्यां तर्हि मे जीवनमेव न स्यात् उ
दपानं तु तदा कामं द्विघुष्टे नो भविष्यतीति एवमिभ्योच्छिष्टान्माषान्खादित्वा शिष्टान्जायायै ददौ त
या च भर्तुः स्वभावज्ञे या निहितान् तद्दिनेऽपि भक्षितवानिति श्रुत एवं सपरोच्छिष्टपर्युषितान्नभ
क्षणं दर्शयन्त्याः श्रुतेरयं भावः परस्यामापदि प्राणनिर्वाहार्थमन्नस्य मयि भक्षणीयं स्याद्वा
स्यायां विदुषापि तत्कर्तव्यमिति मठचीशब्देन या पाषाणवृष्टयो रक्तवर्णाः क्षुद्रपक्षिविशेषा
वा ग्राह्याः तस्मात्सर्वान्नानुज्ञानमर्थवादमात्रं २८ अबाधान २९ भक्ष्याभक्ष्यविभागशास्त्र
स्याबाधाच्चार्थवादमात्रमित्यर्थः अन्यथा सामान्यशास्त्रं विशेषपरतया नियम्यमानं बाधितं स्या
दिति भावः २९ अपि च स्मर्यते ३० अपि च परस्यामापदि विदुषो विदुषश्च सर्वान्नभक्षणं स्म
र्यते जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवाम्भसेति तथा य
द्यनिमं ब्राह्मणो वर्जयेदिति तस्मात्स्वस्थेन विदुषापि नाभक्ष्यं भक्षितव्यं ३० स्मृतिमूलभूतां श्रुति

मध्यादेः शब्दश्चास्यकामकारे ३१ अस्याभक्ष्यभक्षणस्य प्रतिषेधकः तस्माद्ब्राह्मणः सुरां न पिबे
दित्येवंरूपः शब्दश्चाकामकारे स्वेच्छाकृतप्रवृत्तिनिरासे वर्तत इत्यर्थः तस्मात्प्राणविदः सर्वा
न्नानुज्ञानमर्थवादमात्रमिति सिद्धं श्रुतौ तस्मादिति सुरापस्य ब्राह्मणस्योल्मुकसुरास्येकस्य मर
णान्नपापघ्नित्वस्य मरणादित्यर्थः ३१ विहितत्वाच्चाश्रमकर्मापि ३२ सर्वापेक्षेत्यत्र स्वस्वाश्रम
नित्यकर्मणां तत्त्वज्ञानसाधनत्वमुक्तं तानि नित्यकर्माण्यमुमुक्षुणा कर्तव्यानवेति संदेहे तत्र त
मेतं वेदानुवचनेनेत्यादिना विद्यासाधनत्वनिर्णयादकर्तव्यानीति प्राप्ते यद्वा सर्वान्नानुमतेः
शास्त्रान्तरविरोधात् स्तुतित्ववत् यावज्जीवमित्यादिकर्मनित्यत्वशास्त्रविरोधात् यज्ञादीनां
ज्ञानसाधनत्वश्रुतिः स्तुतिमात्रं अन्यथा नित्यत्वेनावश्यानुष्ठेयत्वं ज्ञानार्थत्वेन काम्यत्वं याव
श्यानुष्ठेयत्वाभावश्चैकस्मिन्कर्मणि विरुद्धमुभयं स्यादिति प्राप्ते ब्रूमः अमुमुक्षुणाप्या
श्रमकर्मानुष्ठेयमेव यावज्जीवमग्निहोत्रमित्यादिना विहितत्वादित्यर्थः ३२ नन्वेवमपि विद्या
साधनत्वं कर्मणां न युक्तं विरुद्धयोपपत्तेरित्युक्तमित्यत आह सहकारित्वेन च ३३ विद्यासहका
रित्वेनापि मनःशुद्ध्यादिद्वारा विद्यासाधनत्वेनापि नित्यकर्माण्यनुष्ठेयानि यज्ञादिश्रुत्या विद्यार्थ
त्वेन विहितत्वादेवेत्यर्थः यथैकस्य खादिरत्वस्य खादिरो यूपो भवति खादिरं वीर्यकामस्येति शा
स्त्रद्वयात् क्रत्वर्थत्वेन नित्यत्वं पुरुषार्थत्वेनानित्यत्वं चाविरुद्धं तद्वदिहापि शास्त्रद्वयबलात्क

93

वे·सू·वृ·
९३

र्मणो नित्यत्वकाम्यत्वं चाविरुद्धं सिद्धे हि वस्तु विरुद्धधर्मद्वययोगो बाधकः न ह्यस्याप्येकर्मण उभयथा
प्यनुष्ठानसंभवात् नच काम्यत्वे यावज्जीवमिति नित्यत्वश्रुतिविरोधः काम्यानुष्ठानेनैव नित्यसिद्धे
रिति तात्पर्यं अत्र पूर्वपक्षे यज्ञादिश्रुतेः स्तुतिपरत्वं फलं सिद्धान्ते विधायकत्वमिति वोध्यं ३३ न
नु ज्ञानकाण्डस्य यज्ञादिश्रुत्या कर्मकाण्डस्य यज्ञाद्यनुवादेन ज्ञानसाधनत्वविधानं न पुनः किं त्वपू
र्वयज्ञादीनामेव प्रकरणभेदेन कर्मभेदस्यावश्यकत्वादित्यत आह सर्वथापि त एवोभयलिं
गात् ३४ सर्वथापि नित्यत्वेन ज्ञानार्थत्वेन चानुष्ठेया यज्ञादयो धर्मास्त एव न कर्मभेदोस्ति कुतः
उभयलिंगात् श्रुतिलिंगात्स्मृतिलिंगाच्चेत्यर्थः तथाहि श्रुतिलिंगं यज्ञेन विविदिषन्तीति यज्ञादि
शब्देन प्रसिद्धयज्ञाद्यनुवादेन विद्यासाधनत्वं विधीयते न तु मासमग्निहोत्रं जुहोतीत्यत्रेव सिद्धा
ग्निहोत्रात्कर्मान्तरं तत्र हि जुहोतीति विधायकाख्यातप्रकृत्यर्थस्तस्य जुहोतेरयोग्निहोत्रमिति युक्त
स्य प्रसिद्धाग्निहोत्राभेदः जुहोतेः साध्यहोमव्यक्तिवचनत्वेन सिद्धाग्निहोत्रपरामर्शानुपपत्तेः
अत एव तदेकार्थाग्निहोत्रशब्देन नित्याग्निहोत्रानुवादकत्वं व्यक्तिवचनत्वादेव प्रकृते तु न यज्ञादि
विधायकाख्यातप्रकृत्यर्थः विविदिषाया एव तदर्थत्वात् तस्मादाख्यातप्रकृत्यर्थाद्विद्यार्थैर्यज्ञा
दिशब्दैः प्रसिद्धयज्ञाद्यनुवादेन विद्यासंयोगमात्रमपूर्वं विधीयते इति न कर्मभेदः स्मृतिलिंगम
पि अनाश्रितः कर्मफलं कार्यं कर्म करोति यः इति प्रसिद्धमेव कर्म ज्ञानार्थं दर्शनं दर्शयति तस्मा

९३शि·

त्रकर्मभेदः ३४ अनभिभवं च दर्शयति ३५ रागादिभिः क्लेशैरेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणा
नुविद्यात इत्याद्या श्रुतिर्ब्रह्मचर्यादेराश्रमकर्मणो मनःशुद्धिद्वारा ज्ञानसाधनत्वे आत्मानमिमं एवं
लिंगं दर्शयतीत्यर्थः तस्मात्सर्वेषामाश्रमनित्यकर्मणां ज्ञानार्थत्वमिति सिद्धं ३५ अन्तरा चापि तु
तद्दृष्टेः ३६ अन्तराश्रमान्तराले वर्तमानो विधुरः तस्य किं ब्रह्मविद्यायामधिकारोऽस्ति न वेति
संदेहे यज्ञादिश्रुत्याश्रमकर्मणामेव ज्ञानसाधनत्वविधानादाश्रमिणामधिकारेऽपि विधुर
कृतकर्मणां ज्ञानहेतुत्वाभावान्नास्त्यधिकार इति प्रत्युदाहरणेन प्राप्ते ब्रूमः अन्तरा चाप्याश्र
मं अन्तराले वर्तमानस्याप्यस्त्यधिकारः तस्य ब्रह्मविज्जपादीनां विद्याहेतुत्वाभिसिद्धिः फल सिद्धान्तेन
त्सिद्धिरिति बोध्यं ३६ अपि च स्मर्यते ३७ संवर्तकप्रभृतीनां च नग्नचर्यादियोगादनपेक्षिताश्रम
कर्मणामपि महायोगित्वं स्मर्यते इतिहासे ३७ ननु रैक्वादीनां जन्मान्तरकृतादपि कर्मणो वि
द्यासंभवात्तेषां विद्यादर्शनमयुक्तिकानाश्रमिणो विद्याधिकारे लिंगं विद्याहेतुभूतकर्माभावा
दित्यत आह विशेषानुग्रहश्च ३८ अनाश्रमिणो जपोपासनादेवताराधनादिभिः कर्मविशे
षैर्ज्ञानहेतुभिरस्त्येव विद्यायामनुग्रह इत्यर्थः तथा हि जपेनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः
इति स्मृतिर्ब्राह्मणमात्रसंबंधित्वं जपस्य दर्शयंती विधुरस्यापि विद्यायामधिकारं दर्शयति त
स्मादस्त्यनाश्रमिणोऽधिकारः ३८ ननु यदि विधुरस्यापि ब्राह्मणवर्णमात्रसंबंधिजपादिनैव वि

द्यासिद्धिः तर्ह्याश्रमित्वं व्यर्थमित्यत आह अतस्त्वितरज्ज्यायो लिंगाच्च ३९ अतस्त्वनाश्रमित्वादितर
दाश्रमत्वं वह्वज्ञानसाधनसमानाधिकरणं ज्यायः शीघ्रमेव विद्याहेतुः श्रुतिस्मृतिसिद्धत्वात् तेनैति
ब्रह्मवित्पुण्यकृत्तैजसश्चेति श्रुतौ पुण्यकृत्त्वविशेषणरूपश्रुतिलिंगाच्चेत्यर्थः तेनज्ञानेनएतिब्रह्म
प्राप्नोति ब्रह्मवित्पुण्यकृत्त्वाश्रमोक्तकर्मकृत् तैजसः स्वप्रकाशात्मनिश्चयात्मत्वेन वर्तत इति तैजसः तत्र पुण्य
कृत्त्वविशेषणादाश्रमित्वं ब्रह्मप्राप्तिहेतुत्वया ज्याय इति गम्यते ३९ ननु नाश्रमिणामपि कर्म वि
द्याहेतुश्चेदुत्तमाश्रमात्पूर्वाश्रमं प्राप्तस्य कर्म विद्याहेतुरिति किमु वाच्यमिति कैमुतिकन्यायसंगत्या
प्राप्ते पठ्यते तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ४० किमुत्तमात्पूर्वाश्र
मं प्राप्तस्य कर्म विद्याहेतुर्वा न वेति संदेहे पूर्वपक्षे आश्रमप्रच्युतस्याश्रमिणः कर्मणो विद्याहेतुत्वा
भावे अनाश्रमज्यायस्त्वं न स्यादिति फलं सिद्धांते प्रच्युतेः अप्रामाणिकत्वादाश्रमज्यायस्त्वमिति मंत
व्यं तत्राश्रमात्प्रच्युतस्यापि कर्म ज्ञानहेतुरिति प्राप्ते ब्रूमः तद्भूतस्य प्राप्तोत्तमाश्रमस्यातद्भावः उत्तमा
श्रमात्प्रच्युतिर्न कथमपि संभवतीति जैमिनेरप्याचार्यस्य संमतं अपिशद्वेन स्वस्य बादरायणस्य
संमतं चेति दर्शितं कुतः अरण्यमियादिति पदादिति नियमात् अरण्यशब्देनैकांतोपलक्षित उत्तमाश्र
म उच्यते न पुनरियाद्गच्छेदित्यपशास्त्रमार्गः तस्मादुत्तमाश्रमात्प्रत्यवरोहोदित्युपनिषद्रहस्यमित्यर्थः
अतद्रूपशब्देन प्रत्यवरोहबोधकस्मृत्यभाव उच्यते अभावशब्देन शिष्टाचाराभावः ततोप्याश्रमप्र

स्वरो हेन युक्तः इत्यर्थः तस्मात्प्रच्यवतेर प्रामाणिकत्वात्प्रच्युतस्य कर्मविद्याहेतुरिति सिद्धं ॥
४० एवं प्रत्यवरोहे शास्त्रीय इत्युक्ते यदि प्रमादात्प्रत्यवरोहो नैष्ठिकब्रह्मचारिणा कृतः तस्य किं
प्रायश्चित्तमस्ति नवेति संदेहे नास्तीति पूर्वपक्षमाह नचाधिकारकमपि यत्ननानुमानात्तदयो
गात् ४१ पूर्वं प्रच्युतस्य कर्मनविद्याहेतुरित्युक्तं इदानीं प्रच्युतस्याधिकृतप्रायश्चित्तस्य कर्मवि
द्याहेतुरिति पूर्वं सिद्धस्योत्सर्गस्यापवादोस्तु संगतिः पूर्वपक्षे प्रच्युतस्योर्ध्वरेतसः पातित्यमेति फलं
सिद्धांते कृते प्रायश्चित्तस्य फलं सिद्धिरिति मंतव्यं ब्रह्मचार्यवकीर्णी नैरृतं गर्दभमालभेतेति
प्रायश्चित्तश्रुतेस्तदधिकारलक्षणे अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वादित्यत्र निर्णी
तं अवकीर्णिशब्देन योनौ निषिक्तरेता उच्यते तदस्यास्तीत्यवकीर्णी तस्यायं पशुः स लौकिका
ग्नौ होतव्यः यथोपनयनकाले लौकिकाग्नौ होमस्तद्वत् आधानस्य प्रतिग्रहोत्तरकालतया
पूर्वं अप्राप्तकालत्वादिति तदिदमधिकारलक्षणे सिद्धं प्रायश्चित्तमाधिकारकं तदपि नैष्ठिक
स्यावकीर्णिनो नैवास्ति कुतः आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः प्रायश्चित्तं न पश्यामि येन शु
ध्येत्स आत्महेति यत्ननानुमानात् अनिवार्यपातित्यश्रुत्यनुमापकस्मरणात्तस्य प्रायश्चित्तस्यायोगादि
त्यर्थः समाधत्ते उपपूर्वमपि त्वेके भावमशनवत्तदुक्तं ४२ नेदं महापातकं येनोक्तप्रायश्चित्ता
भावः स्यात् अपि त्वेके आचार्या उपपदपूर्वमेवेदं पातकं मन्यंते यद्गुरुदारादिभ्योऽन्यत्रगमनं

तस्मादेतस्योपपातकत्वादुपकुर्वाणस्येव नैष्ठिकस्याप्युक्तप्रायश्चित्तभावमिच्छंति उभयोर्ब्रह्मचारित्वे
समेऽवकीर्णित्वाविशेषात् अशनवत् यथा ब्रह्मचारिणो मधुमांसाशिनो व्रतलोपः पुनः संस्कारश्च
तद्वत्प्रायश्चित्ताभावस्य शास्त्रप्रसिद्धाभावात्प्रायश्चित्तस्य च तस्मात्प्रायश्चित्ते पुनर्युक्ते अभ्युपगंतुम
स्मिन्नर्थे यवराहाद्यधिकरणसंमतिमाह तदुक्तमिति यवमयश्चरुः वाराही उपानहावुपमुंचत इत्य
त्र यववराहशब्दाभ्यां किं प्रियंगुहस्तशकुन्योर्ग्रहः उत दीर्घशूककसूकरयोरिति संदेहे उभयत्र प्रयो
गसाम्यादिकल्प इति प्राप्ते प्रियंगुहस्तशकुन्योः शास्त्रप्रसिद्ध्यभावाद्दीर्घशूकसूकरयोश्च वराहं।
गावोऽनुधावंतीत्यादिशास्त्रप्रसिद्धत्वात्तयोरेव ग्रहणमिति प्रमाणलक्षणे सिद्धांतितं तथेहापि स
र्वः तस्मात्प्रायश्चित्तेन पश्यामीति स्मृतिः कृतप्रायश्चित्तेनावकीर्णिना सव्यवहाराभावे यत्नगौ
रवं सद्भिः कर्तव्यमित्येतत्परोऽयं दोषः ४२ बहिस्तूभयथापि स्मृतेराचाराच्च ४३ कृतप्रायश्चित्तेन स
ह शिष्टाचाररूपं कर्म किं विद्यासाधनं न वेति संदेहे प्रागुक्तप्रायश्चित्तेनैव तस्य शुद्धत्वाद्विद्यासाध
नमिति पूर्वपक्षे सिद्धहेतुमुपजीव्य पूर्वपक्षे सिद्धांतः ऊर्ध्वरेतस्सांत्ताश्रमात्प्रच्युतिर्महापातकमुपपा
तकं वास्तु उभयथापि तेन कृतप्रायश्चित्तान्यपि शिष्टैर्बहिः कर्तव्याः प्रायश्चित्तेन पश्यामि आरूढ
पतितं विप्रं दृष्ट्वा चान्द्रायणं चरेदित्यादिनिंदास्मृतेः शिष्टाचाराच्चैतद्धावकीर्णिना सह शिष्टानाम
ध्यापनाद्याचारोऽस्ति तस्मात्प्रायश्चित्तेन परलोकशुद्धेनापि तेन सह कृतमध्ययनादिकं न विद्यासाध

नमितिफलितं ४२ स्वामिनः फलश्रुतेरित्यात्रेयः ४४ किमंगाश्रितोपासनानि यजमानकर्तृक
कान्युताहोस्विदृत्विक्कर्तृकाणीति संदेहे यः कृतप्रायश्चित्तः स संव्यवहार्य इत्युत्सर्गस्य निंदास्व
भावाद्यथा बहिष्ठामंगानुष्ठानेऽपि बह्वंगाश्रितोपासनकर्तृकत्वमित्युत्सर्गस्य वर्षति हास्मै यदुपास
इत्यादिफलश्रुतावाये य उपासनफलभोक्ता स एव तस्मिन्कर्मणि कर्तेति न्यायोपबृंहितया वाक्येन फलभा
जो यजमानस्यैव कर्तृत्वमिति दृष्टान्तेन पूर्वपक्षमाह स्वामिन इति स्वामिनो यजमानस्यैवांगाश्रि
तोपासनेषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते कर्मांगेषु च विधीयमानोपासकस्य वर्षति हास्मा इ
त्यादि फलश्रवणादित्यर्थः तस्मात्फलभाजो यजमानस्यैव कर्तृत्वमिति प्राप्ते ४४ समाधत्ते आ
र्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ४५ अंगोपासनमार्त्विज्यमृत्विक्कर्तृकमेवेत्यौडुलोम
िराचार्यो मन्यते तस्मै हि सांगाय कर्मणे ऋत्विक्परिक्रीयते यजमानेन तथा च यजमानगामिफलकमप्यं
गोपासनं यजमानेन स्वामिगामिफलककर्मार्थं परिक्रीतर्त्विक्कर्तृकमेव कर्मांगोपप्रणयनाश्रि
तगोदोहनवदिति न फलश्रुतिविरोधः किंच नेह प्रणवमुद्गीथाख्यं प्राणदृष्ट्या विदित्वा बको नाम ऋ
षिः सत्रिणामुद्गाता बभूवेति श्रुतिवाक्यशेषादुपासनस्यर्त्विक्कर्तृकमेवेति अत्र स्वतंत्रफलानामु
पासनानामृत्विक्कर्तृकत्वेऽपि यजमानगामिफलकत्वोक्तेरस्मिन्पादे संगतिः पूर्वपक्षे कर्तृत्वभो
क्तृत्वयोर्वैयधिकरण्यं सिद्धांते ऋत्विजः कर्तृत्वं स्वाम्यधीनमिति परंपरयैकाधिकरण्यमिति मत

मं ४५ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ४६ बृहदारण्यके श्रूयते तस्मा
द्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च निर्विद्याथ ब्राह्मणः
इति यस्मात्सर्वे ब्राह्मणः आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थाय भिक्षाचर्यं चरंति तस्मात् अधुनातनो विब्रा
ह्मण एवं अध्ययनजापाद्यब्रह्मधीः तद्वान् पाण्डित्यं तस्य कृत्यं पाण्डित्यं श्रवणं तन्निर्विद्य निश्चित्य येन लब्धा
बाल्येन ज्ञानबलभावेन मानेन स्पृहांतः करणत्वेन वा स्यात्तमिच्छेत्तत उपलब्ध्यर्थं श्रवणमनना
नंतरं मुनिर्मननशीलो निदिध्यासनपरः स्यात् अमौनं श्रवणमनने मौनं च निदिध्यासनं लब्ध्वा
उक्तत्रयस्य ब्रह्मसाक्षात्कारहेतुत्वात् तत्त्रयानंतरं ब्रह्मावगच्छतीति ब्राह्मणः साक्षात्कृतब्रह्मभव।
तीत्यर्थः तत्र संशयः किमत्र निदिध्यासनं रूपं मौनं विधीयते न वेति पूर्वपक्षे मौनस्यानुष्ठेयत्वासि
द्धेः सिद्धं तेन ज्ञानं प्रत्यन्तरंगस्यानुष्ठेयत्वसिद्धिरिति बोध्यं तत्र तद्वत एकोदालम्भो विदांचकार स ह
नैमिषीयानामुद्गातावभूवेति वाक्यशेषाद्दृष्टो योपासकस्य बकनाम्नः ऋत्विक्कर्तृत्वबोधकादृगो
पासनस्यार्त्विक्कर्मत्ववद्विद्वत्वं यथ ब्राह्मण इति वाक्यशेषाद्विधिविधुराद्यथ मुनिरित्यत्र न मौनविधि
रिति दृष्टं तेन प्राप्ते ब्रूमः सहेति फलमत्तसाक्षात्कारे श्रवणाद्यपेक्षया सहकार्यांतरस्य मौनस्य नि
दिध्यासनात्मकस्य विधिरित्यर्थः ननु गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यमित्यत्र मौनश
ब्दस्य पारिव्राज्यप्रयोगात्कथमत्र मौनं निदिध्यासनं स्यादत आह तृतीयमिति श्रवणमननेन

ह्यपेक्षयात्तृतीयं निदिध्यासनमेवात्र मौनं विधेयमित्यर्थः तत्रैतराश्रमसमभिव्याहारवला
न्निदिध्यासनप्रधानपारिव्राज्यं मौनपदेन लक्ष्यत इति भावः कस्माद्यं मौनविधिस्तत्राह त
द्वत इति ब्रह्मस्वरूपस्य ज्ञानवतः पूर्ववाक्ये प्रकृतस्य संन्यासिन इत्यर्थः ननु सर्वस्य वस्तुसाक्षात्का
रे निदिध्यासनस्य प्राप्तत्वान्न विधेयत्वमत आह पक्षेणेति यस्मिन्पक्षेऽप्राप्त्यभावाद्विधिर
र्थवानित्यर्थः ननु ब्रह्मपरवाक्ये कथं मौनविधिरित्याशंकां दृष्टांतमाह विध्यादिवदिति य
थादर्शपौर्णमासप्रधानपरे वाक्ये ॥ अन्वाधानादेरंगजातस्य विधिस्तद्वदित्यर्थः प्रधानमा
रभ्य अंगपर्यंतो विधिः तदादिविध्यादिः प्रधानमिति यावत् अत एव प्रयाजादिविधयस्तार
त्सुच्यन्ते ब्राह्मणपक्षस्य फलत्वान्न विधिकल्पनं विफलेति भावः ४६ ननु श्रवणादिप्रधानो यद्य
स्ति संन्यासः कथं तर्हि छंदोग्ये गृहिणोपसंहारः अभिसमावृत्य कुटुंबे इत्यत्र तेन न हि तदति
रिक्तः संन्यासो नास्तीति द्योत्यत इत्यत आह कृत्स्नभावात्तु गृहिणोपसंहारः ४७ गृहिणः कर्म
बाहुल्यात्तेनोपसंहारो न तु संन्यासाभावादित्यर्थः कृत्स्नाश्रमकर्मणां शमादीनां यथासंभवं गृ
हिणो भावादित्यक्षरार्थः ४७ एवं संन्यासगार्हस्थ्याश्रमद्वयोक्त्या मंदबुद्धेरितराश्रमाभावशंका
स्यात्तन्निरासार्थमाह मौनवदितरेषामप्युपदेशात् ४८ मौनशब्देन संन्यासगार्हस्थ्ययो
ग्रहः तद्वदितरयोरपि ब्रह्मचर्यवानप्रस्थयोरुपरावहितो यो ब्रह्मचर्यकुलवासौन्तीय इत्या

दादुपदेशादनुष्ठेयत्वमित्यर्थः बहुवचनं त्ववांतरभेदापेक्षया गायत्रो ब्राह्मणः प्राजापत्यो बृह।
न्निति ब्रह्मचारिभेदाः फेनपडौदुंबरो वैखानसो वालखिल्यश्चेति वानप्रस्थभेदा इति ४८ अनावि
ष्कुर्वन्नन्वयात् ४९ पूर्वोदाहृतवाक्ये मौनं विधेयमित्युक्त्वा तत्र त्ववाल्यं किमित्यपेक्षायां तत्स्वरूप
मत्र निरूप्यत इति संगतिः तत्र किं वाल्यशब्देन वालस्य कर्म तिष्ठन्मूत्रत्वादिकमुच्यते उत गंभी
पुरुषेंद्रियत्वाद्यभावरूपभावशुद्धिरिति संशयः पूर्वपक्षे पूर्वस्य ज्ञानांगत्वेनानुष्ठानफलं सि
द्धं तेउत्तरस्येति वोध्यं तत्र प्रसिद्धं वलात्तिष्ठन्मूत्रत्वादिकं वाल्यमिति ब्रूमः उक्ताभावशुद्धिरे
वात्र वाल्यं विद्यांगत्वात्सर्वस्य वालकर्मणो विद्याविरोधित्वादिति तदिहमाह अनाविष्कुर्वन्निदि
ध्यास्तत्वादिभिरात्मानं परार्थमविज्ञापयन्नगर्वादिरहितः स्यानुमिच्छेदिति वाल्येन तिष्ठासेदि
त्यस्यार्थः कुतः अन्वयात् अस्य वाक्यस्य विद्यायोगेऽन्वयस्यैवमेव संभवादित्यर्थः ४९ एवं यत्या
दिकर्मारभ्य वाल्यांतं विद्याहेतुमुक्त्वा तत्फलविद्यायाः कालमाह ऐहिकमप्यप्रस्तुतप्रतिबं
धे तद्दर्शनात् ५० किमिहैव जन्मनि विद्योत्पत्तिः उत कदाचिदमुत्रापीति संशयः पूर्वपक्षे श्र
वणादेर्विद्याहेतुत्वान्नियमः विद्याया ऐहिकत्वेन क्वचिद्दर्शनादिति सिद्धांते तु प्रतिबद्धश्रवणा
देस्तत्रियम इति मंतव्यं तत्रेहैव जन्मनि विद्याजन्मास्त्विति कामनया श्रवणादिषु प्रवृत्तैरैहिका
मेव विद्याजन्मेति प्राप्ते ब्रूमः विद्याविरुद्धफलकं देशकालविशेषापेक्षं फलोन्मुखं कर्म प्रस्तुत

तेन प्रतिबंधाभावे सत्यैहिकं विद्याजन्म सति श्रवणादियोग्यलाभे भवत्येव चित्राफलपशुवत् स
ति तु प्रतिबंधे स्वमन्त्रापि रनियम एव न त्विहैवेति नियमः कुतः तद्दर्शनात् प्रतिबंधाभ्यामनि
यमस्य श्रुतौ दर्शनात् तथाहि श्रुतिः जन्मान्तराभ्यस्तश्रवणादेः फलं जन्मान्तरे दर्शयति
गर्भस्थ एव च वामदेवः प्रतिबुबुधे ब्रह्मभावमिति सति तु प्रतिबंधे विद्याफलाभे व्यप्याह श्रु
ति श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतोपि बहवो यं न विद्युः आश्चर्योस्य वक्ता कुशलो
स लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति आत्मश्रवणमपि बहूनां दुर्लभं कुतश्चित्प्रागपा
र्जितश्रवणलाभेपि तत्फलज्ञानं दुर्लभं तत्र हेतुराश्चर्य इति यथापरमात्मनो वक्ता आश्चर्यः
अद्भुतः कश्चिदेव संभवति सम्यगाश्चर्यलाभेपि तस्माच्छ्रुतात्मनो लब्धा साक्षात्कर्ताप्याश्च
र्यः किं च साक्षात्कारः कुशलेनाचार्येणानुशिष्टोपि शास्त्रेणास्यात्मनः परोक्षत्वेन ज्ञा
नात्याश्चर्य एवेत्यर्थः तस्मादनियमो विद्याजन्मन इति सिद्धं ५० एवं मुक्तिफलानियमस्त
दवस्थावधृतेस्तदवस्थावधृते ५१ यथा विद्यायाः श्रवणादिसाधनोत्कर्षापकर्षाभ्यां ऐहिका
मुष्मिकत्वरूपो वयापचयत्वनियमः एवं तत्फले मुक्तावुपचयापचयत्वनियमोस्ति न
वेति संदेहे एवं पदेत्स्वर्गादिवत्कर्मसाध्यत्वे मोक्षस्य तत्साध्याद्यधिकरणसिद्धिफलं सिद्धा
न्ते तस्मिन्विशेषस्यतानेकलम्यत्वमिति तत्सिद्धिरिति मंतव्यं तत्र पूर्वोक्तविद्यादृष्टान्त

98

वे॰ सू॰ वृ॰
९८

मफलत्वेन हेतुना मोक्षस्य सादेशपत्वनियमे प्राप्ते ब्रूमः एवंविद्यावन्मुक्तिरूपफलस्यानियमः
निर्विशेषत्वमेव कुतस्तदवस्थावधृतेः मुक्त्यवस्थायां निर्विशेषब्रह्मरूपत्वेन ब्रह्मवेद ब्रह्मैव भवती
त्यादिषु अवधारणादित्यर्थः तथा च फलहेतुकानुमानस्यागमबाधः नहि सालोक्यादिरूपविद्या
यामुपचयापचययत्वमस्ति न हि पूर्वोत्तरभाविद्यासालोक्याकारयोः स्थिरत्वाचिरत्वमतिशयश्च इति क
श्चिदभ्युपैति तस्मान्निर्विशेषब्रह्मसालोक्याकारस्यैकरूपत्वात्तल्लाभो मोक्षे निरतिशयानंदात्मक
रूपएवेति सिद्धं॥ अभ्यासो ध्याय समाप्तियोतनार्थः ५१ ॥ इति ॥ श्री॥
ब्रह्मसूत्रवृत्तौ ब्रह्मानन्दवर्षिण्यां तृतीयस्याध्यायस्य चतुर्थः पादः आध्यायश्च समाप्तः ६४३॥
पूर्वाध्याये साधिकरणे मोक्षे विशेषे नियमाभाव उक्तः संप्रति मोक्षहेतुज्ञानसाधनेषु श्रवणादि
ष्वावृत्त्यनुष्ठाननियममाह आवृत्तिरसकृदुपदेशात् १ पूर्वस्मिन्नध्याये परापरविद्यासाधना
यनविषयो विचारः कृतः अत्र तत्फलविचारः क्रियते अनयोरध्याययोः हेतुहेतुमद्भावः संग
तिः अत्र प्रथमे पादे श्रवणावृत्त्यादि निर्गुणोपासनया सगुणो वा ब्रह्मसाक्षात्कृतवतः प्रारब्धकर्मा
तिरिक्तपुण्यपापनिवृत्तिरूपा जीवतो मुक्तिः प्रतिपाद्यते द्वितीये पादे मृतिप्रमाणस्योत्क्रान्तिः तृती
ये पादे सगुणविदोऽस्तमयोत्तरो मार्गश्च प्रसंगान्निरूपते चतुर्थे पादे [illegible] ब्रह्म
विदो विदेहकैवल्यमुत्तरार्द्धेन सगुणविदो ब्रह्मलोकप्राप्तिश्च निरूप्यते इति तत्तद्विचाराणि

९८शि

काधिकरणानां तत्तत्पादसंगतिर्बोध्याः ॥ तदुक्तं चातुर्थ्ये जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तरा ब्रह्मप्राप्ति-
ब्रह्मलोकाविति पादार्थसंग्रहः ॥ पूर्वाध्याये साक्षात्कारसाधनविचारः कृतः इदानीं फलाध्याये प्रति-
लभ्यस्यावृत्त्यादेर्विचारस्तृतीयशेष एवाद्याष्टाधिकरणपर्यन्तं क्रियते तत्र साक्षात्कारसाधनत्वे-
न श्रुतश्रवणादिषु संशयः ॥ किं सकृदेव श्रवणादिकं कर्तव्यं उत श्रवणस्यावृत्तिरिति पूर्वपक्षे श्रव-
णादीनामदृष्टार्थत्वे फलं सिद्धान्ते यावत्फलमावर्तनीयत्वादवघातादिवद्दृष्टार्थत्वमिति बोध्यं ॥
तत्रैकवारमेव श्रवणादिकं प्रयाजादिवत्कर्तव्यमिति प्राप्ते ब्रूमः श्रवणाद्यावृत्तिरेव कर्तव्या कु-
तः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यसकृदुपदेशात् नन्वत्र श्रवणाद्यावृत्तिर्न श्रूयते इति
चेदुच्यते साक्षात्कारस्याविद्यानिवर्तनक्षमत्वेनादृष्टविभ्रमादौ दृष्टत्वात्स्वफलसाक्षात्कार-
रूपावृत्तिविशिष्टश्रवणादिसाध्यत्वस्य षड्जादिस्वरे दृष्टत्वात्तद्विज्ञेयात्मश्रवणादावपि संसा-
रानर्थमूलाविद्यानिवर्तनक्षमसाक्षात्कारायावृत्तिः कर्तव्या दृष्टे संभवत्यदृष्टकल्पनानु-
पपत्तेरिति तात्पर्यं ॥ एवमुपास्यसाक्षात्कारद्वारा फलहेतूपासनेष्वावृत्तिर्बोध्या दृष्टार्थत्वात् न वे-
द उपासीतेत्यावृत्तिश्रवणाच्च प्रत्ययप्रवाहस्यैवोपासनत्वात् वेदेत्यस्याप्युपासनार्थकत्वात् न-
यादिसंसर्गवर्जविद्यायां विदिनोपक्रम्य उपास्तिनोपसंहारो दृश्यते यस्तद्वेद यत्स वेद स मयैतदुक्त
इत्युपक्रम्यानुशाधि मां भगवो देवतां यां देवतामुपास्स इत्युपसंहारात् यन्तरैको वेदप्राण

तवं सत सर्वकर्मफलं प्राप्नोति एवं रैक्वादन्योपि यस्तद्रैक्ववेद्यं वेद सोपि तथैव फलं प्राप्नोति स एवंमु
तो रैक्वो मया एतदुक्त इत्यनुक्तिः इति हंसं प्रति हंसान्तरवचनं हे भगवो रैक्व यां देवतां त्वमुपास्से तां मे
ताम्मै अनुशाधि शिष्टत्युपगायथयथेति ज्ञानश्रुतिवचनं तस्मात्तत्साक्षात्कारसाधनेष्वावृत्तिसिद्धिः १
लिंगाच्च २ तथाहि उद्गीथोपासनं प्रकृत्यादित्य उद्गीथ इत्युपासनामेकपुत्रतादोषेणापोद्य र
श्मींस्त्वं पर्यावर्तयादिति रश्मिबहुत्वोपासने बहुपुत्रतायै विदधाति प्रत्ययावृत्तिं सूचयति त
थायेन साक्षात्कारसाधनेष्वप्यावृत्तिसिद्धिः हे पुत्र त्वं रश्मीनादित्यं च प्रत्येकं पर्यावर्तयात् तत्कारमं
तर्मीव्य पर्यावर्तयतादिति मध्यमपुरुषैकवचनमपात्स्वेत्यर्थः २ आत्मेति तूपगच्छन्ति ग्राहयं
ति च ३ पूर्वं श्रवणमनननिदिध्यासनानामावृत्तिरुक्ता नामुपजीव्य संदिह्यते किं निदिध्यास
नावसकाले प्रत्युक्तेनेश्वरध्यानेकत्वेव अजन्नभिन्नत्वेनेति पूर्वपदे श्रुतीनामभेदपराणां गौणत्वं
त्वमित्वं हि तेन अव्याप्यत्वं पयपमभेदश्रुतीनां प्रत्यक्षादिविरोधपरिहारात्मकमिदमधिकरणमविरो
धाध्याये प्रसंगतं तथाहि महावाक्यार्थविरोधपरिहारस्य समाधानं तरंगत्वादेव तन्नाद संगतिः त
त्राभेदस्य प्रत्यक्षेण सर्वज्ञत्वकिंचिज्ज्ञत्वादिविरुद्धधर्मवत्त्वलिंगकानुमानेन च बाधात् भिन्नत्व
न ध्यानमिति प्राप्ते ब्रूमः आत्मेत्येवेश्वरो ध्येयः तथाहि जाबाला आत्मत्वेनेश्वरमुपगच्छन्ति त्वं वा अ
हमस्मि भगवो देवतेऽहं वै त्वमसीति तथा ग्राहयन्ति चेश्वरमात्मत्वेन तत्त्वमस्यादिवाक्यानि न चैते

धो नामब्रह्मत्वादिवत् गौणार्थत्वं सति मुख्यार्थत्वसंभवे गौणत्वायोगात् नच प्रत्यक्षादिविरो
धात् संभवः तेषां मिथ्याभेदगोचरत्वेन पारमार्थिकाभेदविरोधित्वाभावादिति भावः ३ नप्र
तीके नहि सः ४ मनो ब्रह्मेत्युपासीत नाम ब्रह्मेत्यादिषु प्रतीकोपासनेषु संशयः किं प्रतीके म
नआदौ स्वस्यात्मत्वबुद्धिः कर्तव्या नवेति पूर्वपक्षे प्रतीकोपासीनां महं ग्रहोपास्तिभ्यो विशे
षासिद्धिः सिद्धान्ते तु विशेषसिद्धिरिति बोध्यं एतदारभ्याधिकरणत्रयस्य प्रासंगिकी पादसं
गतिः तत्र ब्रह्मणः स्वाभिन्नत्वाद्यथा स्वात्मत्वेन बुद्धिरेवं प्रतीकस्य ब्रह्मविकारत्वेन जीवाभि
न्नब्रह्माभिन्नत्वादुपासकजीवात्मत्वबुद्धिः कार्येति दृष्टान्तेन प्राप्ते ब्रूमः नप्रतीके स्वात्मबुद्धिः
कार्या नहि उपासकः आत्मत्वेन प्रतीकमनुभवती अत्रायं विकल्पः किमनभुवबलात्प्र
तीकस्यात्मत्वेन बुद्धिः कार्या उत श्रुतत्वात् अहोस्वित्स्वाभिन्नत्वाद्वा नाद्य इत्युक्तं नहि स इति न
द्वितीयः अश्रवणात् तृतीयः प्रतीकस्य स्वरूपेण ब्रह्माभिन्नत्वायोगात् प्रतीकस्य पृथक्त्व
स्यैवार्थे चोपासनाविधिर्भावप्रसंगादिति भावः ४ ब्रह्मदृष्टिरुत्कर्षात् ५ पूर्वोक्तप्रतीको।
पासनेषु ब्रह्मणो मनआदिदृष्टिः कर्तव्या उत मनआदौ ब्रह्मदृष्टिरिति संशयः पूर्वपक्षेनि।
कृष्टे उत्कृष्टबुद्धिकर्तव्येति न्यायानपेक्षा सिद्धान्ते तदपेक्षेति मतद्वयम् एकविषयत्वमवान्तरसंग
तिः तत्र ब्रह्मण एव मनआदिदृष्टिः ब्रह्मणः प्राधान्येनोपास्यत्वोपपत्तये कर्तव्येति प्राप्ते ब्रूमः

100

वे० सू० वृ०
१२..

मनस्यादावेव ब्रह्मदृष्टिः कार्या उत्कर्षात् उत्कृष्टदृष्टेर्हि निकृष्टे कर्त्तायां निकृष्टस्योत्कृष्टता
भवति यथा सामान्ये राजबुद्धिः फलाय नं तु राज्ञि अमात्यबुद्धिः न चैवं ब्रह्मणः प्राधान्याभावः दृ
ष्टत्वादिति भावः आदित्यादिमतयश्चाङ्ग उपपत्तेः ६ य एवासौ तपति तमुद्गीथमुपासीतेत्यादि
ष्वंगाश्रितोपासनानि संति तत्र संशयः किमादित्यादिषु उद्गीथादिदृष्टिः कर्त्तव्या उतोद्गीथा
दिष्वादित्यादिदृष्टिरिति तत्रोद्गीथादीनां कर्मरूपाणां फलहेतुत्वेनोत्कृष्टत्वादित्यादीनां सिद्ध
रूपाणां तदभावेन निकृष्टत्वान् पूर्वन्यायेनादित्यादिषूद्गीथादिदृष्टिरिति दृष्टान्ते न प्राप्ते ब्रू
मः उद्गीथादौ कर्माङ्गेषु आदित्यादिमतय एव कर्त्तव्याः कुतः उपपत्तेः यथा प्रोक्षणादिना
व्रीह्यादिषु संस्कृतेषु प्रकृतकर्मापूर्वमुत्पद्यते तथा कर्माङ्गेषूद्गीथादिष्वादित्यादिदृष्टिभिः सं
स्कृतेषु प्रकृतेभ्यः कर्मणः फलाधिकालक्षणा समृद्धिर्भवति अन्यथा न भवेदादित्यादीनां म
नंगत्वात् तथा च कर्मसमृद्धिरूपफलोपपत्तेरंगेष्वनंगमितिरित्यर्थः आदित्यादावुद्गीथा
दिमतिप्रत्यये पि फलासिद्धिर्नोद्गीथादीनामुत्कर्ष इति भावः ६ आसीनः संभवात् ७ किं
कर्माङ्गानाश्रितान्युपासनानीति ष्ठन्नासीनः शयानो वा कुर्यादित्यनियम उतासीन एवेति नियम
इति संशये पूर्वोक्तपक्षयोः पूर्वोत्तरकोटिसिद्धिरेव फलं निदिध्यासनादौ विद्यासाधने आस
ननियमोक्तेः पादसंगतिः तत्र पूर्वोक्तकर्माङ्गोपासनेष्विवानियम इति प्राप्ते ब्रूमः आसीन

एवं कर्मांगेषूपासनानि कुर्वीत कुतः समानप्रत्ययप्रवाहात्मकोपासनस्यासीन एवोपासके सं
भवान्नहि तिष्ठतः पुंसस्तदुपासनं संभवति शरीरधारणे प्रयत्नापेक्षायां चित्तविक्षेपात् नापि शया
नस्यापि निद्राप्रसंगात् अंगोपासनानां त्वंगपरतंत्रत्वात्प्रयुक्तस्तत्रानियम इति ७ ध्यानाच्च ८ उपा
सनस्य ध्यायत्यर्थध्यानरूपत्वात् ध्यायतेश्चासीनेषु बकादिष्वेकविषयदृष्टिषु प्रयोगादा
सीनोपासीतेत्यर्थः ८ अचलत्वं चापेक्ष्य ९ किं च ध्यायतीव पृथिवीत्यत्र श्रुतौ पृथिव्या अ
चलत्वमपेक्ष्य ध्यानोपचारो दृष्टः तस्मादपि लिंगादासीन एवोपासीत ९ स्मरंति च शुचौ
देशे प्रतिष्ठाप्य स्थिरमासनमात्मन इत्यादिनां स्मरणादासीन एवोपासीतेत्यर्थः १० यत्रैका
ग्रता तत्राविशेषात् ११ दिग्देशकालेषु संशयः किमंगानाश्रितोपासनेषु दिगादिनियमो
ऽस्ति न वेति तेष्वासननियमवदस्ति नियम इति प्राप्ते ब्रूमः प्राच्यादिदिक्प्रोक्षणादिनियमः
नदीतीरादिदेशनियमो नास्ति कुतः यत्र दिशि देशे काले वा चित्तस्यैकाग्रताप्रत्ययप्रवाहो भ
वेत् तत्रोपासीत दिगादिविशेषाश्रवणादित्यर्थः यद्वोपासनदृष्टाया एकाग्रतायाः सर्वत्राविशे
षादित्यर्थः समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिर्मनोनुकूले न तु च
क्षुःपीडने गुहानिवाताश्रयणे प्रयोजयेदिति श्रुतिरपि चित्तस्यैकाग्रसंपादके देशे उपासी
तेति दर्शयति शर्करास्तत्र पाषाणाः जलाशयवर्जने शाननिवृत्त्यर्थः चक्षुःपीडनं मशकादि

कं तस्मादुपासने दिगादिनियमो नास्तीति सिद्धं ११ आप्रायणात्तत्रापि हि दृष्टं १२ उपास्यसाक्षा
त्कारद्वारा फलहेतुषूपासनेष्वहंग्रहनामकेषु संशयः किं कदाचिदुपासनं कृत्वोपरमेत उत
यावज्जीवमुपासीतेति पूर्वपक्षे कदाचित्कृतप्रत्यावृत्तेरदृष्टद्वारान्तकाले ध्येयबुद्धिहेतुत्वं सि
द्धं ते धारावाहिकोपासनस्य साक्षादेव तद्धेतुत्वमिति विभागः तत्र देशादिनियमाश्रवणात्तदभा
ववद्यावज्जीवत्वापि मरणकाले यिसत्यावत्क्रतुरस्माल्लोकात्प्रैतीति श्रुत्या ध्येयप्रत्ययानुवृत्ते
र्नेदृष्टेन च तदृष्टस्यात्यं दृष्टे संभवति अदृष्टकल्पनानुपपत्तेः अतो सर्वनामार्यमुपासकः
कृत्वरुपासनं सदा नमनष्टेया इति सिद्धं १२ एवं ज्ञानसाधनानुष्ठाने यत्नाधिकार्यफलाध्याये
पि साधनानुष्ठानक्रमं विचार्य फलाध्यायस्य फलचिंतामुपक्रमते तदधिगम उत्तरपूर्वाघयो
रश्लेषविनाशौ तद्व्यपदेशात् १३ तथा चास्य फलविचारप्रतिबंधकस्याधनजिज्ञासाऽभावरू
पावसरसंगतिः लब्ध्वा किं ब्रह्मविद्यायां मनुत्पन्नायां विदुषो भविष्यत्पापसंबंधः पूर्वपापविना
शो भवतो न वेति संदेहे पूर्वपक्षे सत्यामपि विद्यायां पापफलभोगानंतरं विद्यातो मुक्तिः सि
द्धेति विद्योत्पन्नं तरमेव मुक्तिरिति वोर्थ्यं तत्र फलभोगं विनानु नास्ति विद्यायां पापनाश इति प्रा
प्ते ब्रूमः तदधिगमे ब्रह्मसाक्षात्कारे सति उत्तरपूर्वाघयोरश्लेषविनाशौ भवत एव कुतः तयोर्वि
दुषि श्रुत्या व्यपदेशात् यथा पुष्करपलाश आपो न श्लिष्यंते एवमेवं विदुषि पापं कर्म न श्लिष्य

नेइति श्रुतिर्विद्यावत उत्तरपापस्याश्लेषं दर्शयति तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पा
प्मानः प्रदूयंत इति श्रुतिः विद्यातः पूर्वस्य पापस्य विनाशं व्यपदिशति एवं निर्गुणविद्याया फल
वं व्यपदिशति क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादिका श्रुतिः तस्माद्ब्रह्मविद्यावतः पू
र्वोत्तरपापासंबंधः इति सिद्धं १३ इतरस्याप्येवमसंश्लेषः पातेन १४ पूर्वविद्यातः पापनाशा
संबंधवत्कौ तद्वत्पुण्यस्यापि नाशासंबंधौ भवतो न वेति संदेहे तत्र दानपुण्ययोः शास्त्रीयत्वे
न अग्निहोत्रदर्शादेर्विरोधाभावान्न भवत इत्यधिकाशंकायां पूर्वन्यायमतिदिशति इतर
स्यापि पापादितरस्य पुण्यस्याप्येवमश्लेषवदसंश्लेषो विनाशश्च ज्ञानाद्भवतः उभे ह्येवैष एते त
रति इत्यादिश्रुतिः पुण्यपापासंबंधवत्पुण्यासंबंधस्यापि व्यपदेशात् श्रुतावुपादेष्वर्थः एवं ब्रह्मसा
क्षात्कारवान्स्त्वेत्र तुशब्दोऽवधारणार्थः एवं ब्रह्मसाक्षात्कारवतः पुरुषधौरेयस्य पुण्यपाप
योर्बंधहेत्वोरभावाद्देहपाते मुक्तिरवश्यं भवत्येवेत्यधिकरणद्वयस्य फलमुक्तं अग्निहोत्रदर्श
योः विरुद्धफलत्वमुपाधिः असत्यानि देशत्वात् पृथक्संगत्याद्यपेक्षा १४ अनारब्धकार्ये एव
तु पूर्वे तदवधेः १५ पूर्वं ज्ञानात्कर्मध्वंस उक्तस्तस्य प्रारब्धकर्मव्यतिरिक्तविषयत्वेनात्रापवादा
त्संगतिः ज्ञानजन्यकर्मनाशः किमविशेषेण कर्ममात्रस्य भवत्युत प्रारब्धकर्मव्यतिरिक्तस्येति ॥
संशयः पूर्वपक्षे जीवन्मुक्त्यसिद्धिः सिद्धांते तत्सिद्धिरिति बोध्यं तत्र क्षीयंते चास्य कर्माणीत्यविशे

षेणाश्रवणात्कर्ममात्रस्य नाश इति प्राप्ते ब्रूमः येषु पुण्यपापेषु एतद्देहवच्छेदेन सुखदुःखानुभवार्थं
प्रवर्ततेते आरब्धकार्ये तद्व्यतिरिक्तेष्वनारब्धकार्येषु पूर्वेष्वनादिभवपरंपरायां ज्ञानोत्पत्तिपर्यंतं संचि
तेते एव लीयेते कुतः तदवधेः तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति देहपातावधि
श्रवणादित्यर्थः तथा च विशेषश्रुत्यनुसरात् विशेषश्रुतिर्न तत्वेति भावः ब्रह्मात्मनः साक्षात्कार
वान्यावन्न विमोक्ष्येन विमोक्ष्यते तस्य तावदेव चिरं तावान्नेव देहपातरूपो विलंबः अप्रारब्धकर्म
भोगाद्देहपातानंतरं संपत्स्ये ब्रह्म संपत्स्य इत्यर्थः १५ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् १६
एवमनारब्धकार्याणां कर्मणां ज्ञानात् लय उक्तः स किं नित्यनैमित्तिकातिरिक्तानारब्धकार्यकर्मवि
षयत्वेनात्रापवादास्संगतिः किं नित्यनैमित्तिककर्मजातमनारब्धकार्यकर्मवत् ज्ञानात् लीयते न
वेति संदेहः एवं प्रदेकामाकर्मणः इव ममक्षूणां नित्यनैमित्तिकयोरप्यननुष्ठानं पंकप्रक्षा
लनन्यायात् सिद्धांते तदनुष्ठानमिति बोध्यं तच्चानारब्धकर्मत्वाविशेषान्नित्यनैमित्तिककर्मजातं
ज्ञानात् लीयते इति प्राप्ते ब्रूमः अग्निहोत्रादि नित्यनैमित्तिकं कर्म तत्कार्यायैव तस्य ज्ञानस्यापि का
र्यं मुक्तिरूपं तस्मा एव सत्वशुद्ध्यादिपरंपरया कुतः तद्दर्शनात् यज्ञादिषु मोक्षज्ञानहेतुत्वदर्शना
दित्यर्थः तथा च ज्ञानरूपफलैकनाशात्वं नित्यनैमित्तिककर्मजातस्य नात्र पंकप्रक्षालनन्यायः॥
ज्ञानार्थत्वेनानुष्ठानसार्थक्यवत्वादिति भावः १६ ननु नित्यादेर्ज्ञानार्थत्वे तस्य पुत्राः दायमुपयंति

सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति विनियोगवाक्यं किंविषयकमित्यत आह अतोन्या
पि ह्येकेषामुभयोः १७ अग्निहोत्रादेर्नित्यादिरूपादन्यापि या काम्यरूपा साधुकृत्या तद्विषय
मिदमेकेषां शाखिनां विनियोगवाक्यं तस्याः ज्ञानानुपकारकत्वादुपकारकत्वमुभयोर्जैमिनिबा
दरायणयोराचार्ययोः संमतमित्यर्थः ननु तस्याः काम्यसाधुकृत्याया इतरस्याश्चैवयसंश्लेषे उक्तः पुत्र
नाशाद्युक्तः कथं तस्या विनियोग इति चेत् अत्र वक्तव्यं सुहृदः साधुकृत्यामुपयंतीत्यस्य को
र्थः न तावतामेव प्राप्नुवंतीत्यर्थः द्रव्यादिवत्तस्याः प्राप्त्यायोगात् आपि तत्फलं प्राप्नुवंतीत्यर्थः
शास्त्रफलं प्रयोक्तरीति न्यायविरोधात् अत्र च वैश्वानरेष्टित्यायश्रवणात् सुहृदोनदिश्य तच्च त
स्मादुद्दिश्य सेवा कर्तरि सहृदि विहित्रि यासा साधुकृत्यास्वनुसांजनयति स्वयं च ज्ञानात्त्र एतेन त्ववि
रोधः समानः पापकृत्यायाम् द्विषः अथवा दत्ताभ्यां तीव्राभिनिवेशेष्वत्वं १७ यदेव विद्ययेतिहि
१८ पूर्वं मम वक्षणात् ज्ञानार्थमित्यादिकमनुष्ठेयमित्युक्तं तत्किमंगाश्रितोपासनासहितमेव ज्ञाना
र्थमनुष्ठेयमिति नियमः उतोपासनासहितं केवलं वा तत्ष्ठेयमित्यनियम इति संशयः एकविषय
त्वसंगतिः पादसंगतिस्तु प्रासंगिकी बोध्यं पूर्वपक्षे केवलस्य नित्यादेर्ज्ञानहेतुतासिद्धिः सिद्धांते
तत्सिद्धिरिति बोध्यं तत्र नियमे प्राप्ते ब्रूमः नियमो न युक्त इति तथा हि यदेव विद्यया करोति त
देव वीर्यवत्तरं भवतीति श्रुतिर्विद्यासहितस्य कर्मणो वीर्यवत्तरत्वं ब्रुवती विद्याहीनस्य कर्मणो वी

103
वे. सू. वृ.
१०३

यं वद्यफलहेतुरूपं दर्शयति न च केवलकर्मणो नान्तरूपः फलहेतुत्वाभावो नयुक्तः स्यात्तस्मात्के
वलमपि कर्मज्ञानहेतुरित्यनियम इति सिद्धं १८ एवमनियमेनाग्निहोत्रादिकर्मणो ज्ञानार्थत्वा
च्चज्ञानेन तत्क्षय इत्युक्तं इदानीं प्रारब्धकर्मणामनारब्धकार्याणां वत्विमत्र ज्ञानाऽनिवर्त्यत्वेनोक्तानां
निवृत्तिप्रकारमाह भोगेन त्वितरे क्षपयित्वा संपद्यते १९ किं ब्रह्मसाक्षात्कारवान्देहपातानन्तरमपि
संसरति न वेति संदेहः पूर्वपक्षे साक्षात्कारस्य मुक्तिहेतुत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति विवे
कः तत्र देहपातात्पूर्वं यथा साक्षात्कारेऽपि संसारानुवृत्तिरेवं देहपातानन्तरमपीति अनारब्धा
धिकरणदृष्टान्तेन प्राप्ते ब्रूमः संचितकर्मणां पूज्ञानान्नाश उक्तः इतरेत्वारब्धकार्ये पुण्यपापे भोगे
न त्वक्षपयित्वा विद्वान्ब्रह्म संपद्यते अथ संपत्स्ये ब्रह्मैव सन्ब्रह्माप्येति इत्यादिश्रुतिभ्यो देहपातात्पूर्वं प्रार
ब्धकर्मणां सत्त्वात्कुलालचक्रभ्रमिन्यायेन मिथ्याज्ञानरूपनिमित्तनाशेऽप्यविद्यालेशानुवृत्ति
र्युक्ता तद्भोगानन्तरं कस्यचिदपि कर्मणो जन्ममरणलक्षणसंसारहेतोरभावान्न संसारः त
स्माद्भोगेन प्रारब्धकर्मनाशानन्तरं विज्ञानस्वरूपानन्दात्मनावस्थानलक्षणं स्वास्थ्यं मोक्षाख्यं
लभते इति सिद्धं ॥ १९ ॥ ॥ इति ॥ श्री ॥ ब्र
ह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां चतुर्थाध्यायस्य प्रथमः पादः १
॥ ॥ ॥ ॥ ॥ ॥ ॥

१०३

ओम्॥१॥ पूर्वपादांत्याधिकरणे उत्क्रांत्याऽनपेक्षा निर्गुणप्राप्तिरुक्ता इदानीं सगुणब्रह्मविद्या
फलभूतस्य ब्रह्मलोकस्योत्क्रांतिं विना प्राप्त्ययोगात्तत्फलं निरूपयिष्यन्नेव तद्धेतुभूतामुत्क्रांतिं निर्गु
णब्रह्मविद्व्यतिरिक्तसर्वजनसामान्यां निरूपयितुं पादमारभते वाङ्मनसि दर्शनाच्छब्दाच्च १ अ
स्त्युत्क्रांतिक्रमबोधिका श्रुतिः अस्य सौम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्ते
जसि तेजः परस्यां देवतायामिति प्रयतो म्रियमाणस्येत्यर्थः तत्र वाङ्मनसि संपद्यत इत्यत्र सं
शयः किं वृत्तिमत्या वाच एव मनसि लयात्मकः संपत्तिरुच्यते उत वाग्वृत्तेरेवेति पूर्वपक्षे सोपा
दाने स्वस्य लय इति न्यायाऽसिद्धेः सिद्धांते तन्निवृत्तिरित्यर्थः तत्र श्रुतिवशाद्वाच एव मनसि लय इ
ति प्राप्ते ब्रूमः उपक्षीणवागिति भाववत्त्वमत्या वाक्शब्देन वाग्वृत्तिरुच्यते मनोवृत्तौ सत्यामेव मनसि वाग्वृ
त्तिः संप्रलीयते कुतः दर्शनात् मनोवृत्तौ सत्यामेव लोके वाग्वृत्तिलयस्य दर्शनात् नहि वाङ्म
नसीति श्रुतेः क्षीणातिरिति तत्राह शब्दाच्चेति स्वोपादाने इत्यबाधितन्यायानुसारेण वाक्शब्दोऽह
ति वृत्तिमनोरभेदोपचारेण भाववत्त्वमत्या वार्थापरत्वर्थः ननु अनुपादाने वृत्तिलयो वाक्प्यसि।
ति चेन्न नाग्निवृत्तिलयस्यानुपादानदर्शनादिति १ उक्तश्रुतौ वाच एव श्रवणादिंद्रियांत।
राणां चक्षुरादीनां मनसि वृत्तिलयो नास्तीति भ्रमं वारयति अत एव सर्वाण्यनु २ यत एव।
मनसो वागुपादानत्वाभावान्मनसि वाचो वृत्तिलयमात्रं मत एव सर्वाणि चक्षुरादीन्यपि तान्युपा

पानेमनसिसिसवृत्तिकेस्ववृत्तिलयमात्रेणानुवर्तनेप्रलीयंतेननुस्वरूपेणेत्यर्थः तस्मादुपशांततेजाः
पुनर्भवमिंद्रियैर्मनसिसंपद्यमानैरितिश्रुतिः सर्वेषामिंद्रियाणांमनसिवृत्तिलयावोधिकाद्दृष्टत्वात
स्तोत्क्रमणादूर्ध्वउपशांतदेहोस्तः पुनर्जन्ममनसिस्थितैरिंद्रियैः प्राप्नोतीत्यर्थः २ एवंवाङ्मनसी
तिवाक्यंविचार्यमनः प्राणइत्युत्तरवाक्येकिंसर्वेंद्रियवृत्तिलयाधारस्यमनसः प्राणेस्वरूपलयोवृत्तिल
योवेतिसंशये अन्नमयंहिसोम्यमनआपोमयः प्राणइतिश्रुतेःप्राणमनसोरन्नविकारत्वश्रवणा
दंऽवन्नयोश्चोपादानोपादेयभावात्स्वरूपलयइतिप्राप्तेसिद्धांतयति तन्मनःप्राणउत्तरात् ३
सोपादानत्वाद्विकाराभावात्सर्वेंद्रियाणांमनसिवृत्तिलयः ३ इतत्मासत्वात्तस्वरूपलयइतिप्र
सुदाहरणसंगतिः अतिदेशात्संगत्यनपेक्षावातत्सर्वेंद्रियवृत्तिलयाधिकरणंमनोपिप्राणेस्व
वृत्तिलयेनैवलीयतेनस्वरूपेणेतिमनः प्राणइत्युत्तराद्वाक्यादवगतंत्यंतसुप्तिमूर्छावस्थयोः स
वृत्तिकेप्राणेसत्येवमनोवृत्तिलयदर्शनादितिहेत्वनुषंगः नह्यन्नयोरुपादानोपादेयत्वमात्रेण
तद्विकारयोरप्युपादानोपादेयभावेयुक्तः हिमघटयोस्तदर्शनादितिभावः ३ एवंमनः प्राण
इतिवाक्यंविचार्यप्राणस्तेजसीत्युत्तरवाक्येकिंप्राणस्यवृत्तिलयस्तेजस्युतजीवइतिसंदेहे श्रुति
वलात्तेजस्येवेतिप्राप्तेसिद्धांतयति सोध्यक्षेतदुपगमादिभ्यः ४ वाक्यक्रमादर्थक्रमाद्वाधिकर
णक्रमोवोध्यस्तः प्राणोध्यक्षेकार्यकरणसंघातस्वामिनितत्साक्षिणिवाजीवेस्ववृत्तिः स

त्रैवतिष्ठते कुतः तं जीवं प्रति उपगमनाद्यपगमनानुस्थानेभ्यः यथा राजानं यात्रेच्छवं तं सर्वे भृ
त्या अभिमुखं विनायन्ति एवं एवेमात्मानमन्तकाले सर्वे प्राणा अभिसमायन्तीति श्रुतौ तेंद्रियाणां
मुख्यप्राणसहितानां जीवं प्रत्याभिमुख्येन गमनं दर्शयति तमुत्क्रान्तं प्राणो नूत्क्रामतीति श्रुतिर्ग
च्छन्तं प्रत्यनुगमनं प्राणस्य दर्शयति सविज्ञानो भवतीति करणमुत्यसाविज्ञानशरीरवाच्य इन्द्रियजात
सप्राणसहितस्य प्राप्तव्यकर्मफलज्ञानं वतिजीवे तस्यानं दर्शयति तस्माज्जीव एव प्राणस्य
वृत्तिलयः ४ ननु कथं तर्हि प्राणस्तेजसीति श्रुतौ रित्यत आह भूतेषु तच्छ्रुतेः ५ तच्छ्रुतेः
प्राणस्तेजसीति श्रुतेः सहचारिणाविद्यमानेषु तेजः सहितेषु उत्तरदेहारंभकेषु पंचभूते
षूपाधिरूपसहितत्वेन विद्यमाने जीवे प्राणस्य वृत्तिलय उत्पत्त्यवगंतव्यम् उपगमादिश्रुतं तरानुसा
रात् तथा चोयसहितजीवप्राप्तौ प्राणस्योपाधि तेजस्त्वभिमत प्राप्तेरर्थसिद्धत्वात् प्राणस्तेजसीति
श्रुत्युपपत्तिरित्यर्थः ५ ननु प्राणे तेजसीत्येकस्यैव तेजसः श्रवणात्कथं तेजः सहितेषु भूते
षु वृत्तिरुक्तमित्यत आह नैकस्मिन्दर्शयतो हि ६ नैकस्मिन्नेव तेजसि जीव उत्क्रांति समये ना
वतिष्ठते उत्तरदेहस्य पांचभौतिकत्वेन पंचभूतेषु स्थिते एव प्रपकत्वात् दर्शितो हीममर्थं रंहत्यधि
करणे व्याख्यातेष्वम्ब्रनिरूपणे यद्वा श्रुतिस्मृती ममर्थं दर्शयतः पृथिवीमय आपोमयो वायु
मयस्तेजोमय इत्याद्या श्रुतिः अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ताभिः

105
वे॰सू॰र॰
१०५

साईमिदं सर्वे संभवन्तु त्वम् सर्वं शर इति स्मृतिः अत एव स्वकामीयं ते इति मात्राः प्राक्मोक्षात् विनाशिनो
दृश्यादीनो पंचानां भूतानामित्यर्थः ननु जीवस्योत्क्रांतिकाले भूताश्रयत्वं तौ हि चतः कर्म हैव तदूचतुरि
ति कर्माश्रयत्वबोधकश्रुतिविरुद्धमिति चेन्न कर्मणो वंधनिमित्तत्वेनाश्रयत्वं भूतानां देहोपादानत्वे
नाश्रयत्वमित्यविरोधात् तौ याज्ञवल्क्यार्तभागौ यज्जीवाधारभूतमूचतुः तत्कर्मैवेति श्रुतेर्वचनं
६ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ७ पूर्वोक्तामुत्क्रांतिमुपजीव्य संदिह्यते किमुत्क्रां
तिरविदुष एवोत विदुषोपि दहरादिसगुणब्रह्मोपासकस्यापि तत्र तयोर्ध्वमायन्नमृतत्वमेतीति
दहरोपासकस्य मोक्षश्रवणादविदुष एवोत्क्रांतिरिति प्राप्ते ब्रूमः सृतिः सरणं तदुपलोदेवयानमा
र्गस्तदुपक्रमात्पूर्वं भाविनी योत्क्रांतिः सा सगुणब्रह्मविदविदुषोः समानैवास्योसौम्य पुरुषस्य प्र
यतो वाङ्मनसि संपद्यत इत्यादिसामान्यश्रवणात् ननु कथं तर्हि सगुणविद्यायाममृतत्वश्रवण
मिति तत्राह अमृतत्वं चेति उपदाह्य इति यानीरिदं रूपं अनपोष्य निरागादिक्लेशादग्ध्वे वैदमा
पेक्षिकममृतत्वं ब्रह्मलोकं प्राप्तिलक्षणं न मुख्यो मोक्षः अत एवैतयोर्ध्वमायन्निति मूर्धन्यनाडी
द्वारोत्क्रांतिपूर्वकत्वममृतत्वस्य दर्शितं तस्माद्विदुषविदुषोः समानैवोत्क्रांतिरिति सिद्धं ७ त
दुत्क्रांतिः समानेत्यमृतत्वमृतस्य स्वरूपत एवासंते ब्रह्मसंपत्तेरित्यदेपेरूढमारभ्यते तदापी
तेः संसारव्यपदेशात् ८ तेजः परस्यां देवतायामित्यत्र तेजः स जीवस्येंद्रियसंतानं प्राणमनः स

हितांभूतांतरसंहितंपरमात्मनिसंपद्यत ८ तेजः इतिसूक्ष्मशरीरस्यलयः श्रूयतेसलयः कि
मात्यंतिकउताहोनात्यंतिकइतिसंशयः पूर्वपक्षेतन्मात्रस्यमुक्तिः सिद्धांतेतदभावइतिबोध्यं त
त्रब्रह्मणः उपादानत्वादात्यंतिकएवलयइतिप्राप्तेब्रूमः तदुक्तविशेषणंसूक्ष्मंतेजः आपीतेरामो
क्षात्तिष्ठतेयोनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः स्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतमिति
संसारव्यपदेशात्तद्विहितत्वज्ञानेशास्त्रयोस्तन्मात्रस्यमुक्तावनर्थकंप्रसज्येत तस्मात्सुषुप्ता
विवानात्यंतिकोलयः ८ ननूक्तलक्षणंतेजोयद्यस्तितर्हिदेहान्निर्गच्छत्तस्यस्वरूपमुपलभ्येतप्रति
हन्येतचेष्वादिवत् मूर्तांतरेणेत्यतआह सूक्ष्मंप्रमाणतश्चतथोपलब्धेः ९ चकारः स्वरूपतो
स्वच्छत्वसमुच्चयार्थः उक्तंतेजः परिमाणतः स्वरूपतश्चसूक्ष्मंत्रसरेणुवच्च तस्यनाडीद्वारानिष्क्रमणं
श्रुतंतथासूक्ष्मत्वेनोपलब्धेः अत्रसूक्ष्मत्वेनैवस्वच्छत्वमुपलक्ष्यते तथाचानुद्भूतरूपत्वेन
सूक्ष्मत्वात्स्वच्छत्वाच्चोपलभ्यतेस्वच्छत्वान्मूर्तांतरेणनप्रतिहन्यतेस्वल्पत्वान्नाड्यादौसंचारोपपत्तिरि
ति ९ नोपमर्देनातः १० अतएवस्वच्छत्वलक्षणात्सौक्ष्म्यादेसूक्तरूपादस्यसूक्ष्मशरीरस्यस्थू
लदेहस्यदाहच्छेदादिनिमित्तेनोपमर्देनोपमर्दइत्यर्थः १० सूक्ष्मदेहसद्भावेचोष्मलिंगकम
नुमानमाह अस्यैवचोपपत्तेरेषऊष्मा ११ स्थूलदेहएषउपलभ्यमानः ऊष्मास्यैवसूक्ष्मदेह
स्यधर्मः सस्यैवस्थूलदेहेतदुपलब्धेस्तदभावेमृतदेहेतदनुपलब्धेरित्यन्वयव्यतिरेकाभ्यांतद्

मंत्रस्यैवोपपत्तेरित्यर्थः ११ आमृत्युपक्रमाधिकरणे मुख्यामृतत्वे उत्क्रांत्यभावो दर्शितः स न युक्त इ
त्याह प्रतिषेधादिति चेन्न शारीरात् १२ अवहिताधिकरणेनास्य संगतिः किं निर्गुणब्रह्म
विद उत्क्रांतिरस्ति न वेति अस्ति न वेति संदेहे अस्तीति प्राप्तं न तु यथा कामयमानो योऽकामो निष्काम आ
प्तकाम आत्मकामो न तस्य प्राणा उत्क्रामंतीति परब्रह्मविदः शरीरात्प्राणा उत्क्रांतेः प्रतिषेधान्ना
स्त्युत्क्रांतिरिति चेन्न शारीराज्जीवात् यं प्राणोत्क्रांतिप्रतिषेधो न शरीरात् तस्मात्प्राणा उत्क्रामंतीति
माध्यंदिनिशाखायां जीवादेव प्राणोत्क्रांतिप्रतिषेधश्रुतत्वात् तस्मात्प्राणसहितस्य जीवस्य पर
ब्रह्मविदोऽप्युत्क्रांतिरस्तीति पूर्वपक्षः श्रुत्यर्थस्तु मुक्तिप्रक्रमार्थो यः शब्दः बाह्यविषयकामनाशू
न्यत्वमकामत्वं मानसिकविषयकामनाशून्यत्वं निष्कामत्वं प्राप्तस्वरूपानंदत्वं सर्वं आप्तकामत्वं त
त्र हेतुरात्मकाम इति १२ सिद्धांतयति स्पष्टो ह्येकेषां १३ एकेषां काण्वानां शाखायां प्राणानां परब्र
ह्मदेहादुत्क्रांतिप्रतिषेधो हि यत उपलभ्यते अतो न तस्योत्क्रांतिरस्तीत्यर्थः तथाहि यत्रायं पुरुषो
म्रियत उदस्मात्प्राणाः उत्क्रामंत्याहो नेत्यार्तभागप्रश्ने द्वितीयमनुत्क्रांतिपक्षमाश्रित्य याज्ञवल्क्यो नो।
त्क्रामंतीत्युक्त्वा तर्हि प्राणोत्क्रांत्यभावे मृतो न भवेदित्याशंका अत्रैव समवलीयंत इति प्राणविलयं प्रति
ज्ञाय तत्सिद्धये उच्छ्वयत्याध्मायत्याध्मातो मृतः शेत इत्युत्क्रांत्यवयवे देहस्योच्छ्वयनादिकमाह एत
न्मामा माध्यंदिनिशाखायामपि तस्मादित्यनेन देहस्यैव ग्रहणं बोध्यं उत्पन्नात्मसाक्षात्कारस्य य

अयदाश्रयं स्थूलः प्रमत्तः पुरुषो देहे म्रियते सर्वचेष्टाशून्यो निःशीतलो भूमौ शेते तदास्माद्देहात्प्राण
उत्क्रामंत्यस्माद्देहोपदांतरे नात्रैव नाशयंतीति प्रश्नार्थः अत्र प्राणशब्देन सूक्ष्मदेहोक्तः संदेह उत्क्र
य इति उक्तो भवति नत्वयं रोगः कश्चिन्नेदं तस्माद्देहाद्ध्मायतीति वाय्वेन वायुना पूरितो विविधान्
शब्दान्नादं भेरीवत्करोति यतस्माद्ध्मानः शब्दवान्मृतो विलीनसूक्ष्मशरीरं सन्भूमौ शेते इत्यर्थः
तस्माज्जीवात्प्राणोत्क्रांतेरभावात्तत्वेन निषेधो योगादिहृद्देहादेव प्राणोत्क्रांतिप्रतिषेध इति न वि
दुषो मार्गोत्क्रांतिः सः १३ सर्वगेच १४ महाभारते मार्गोत्क्रांत्योरभावः सर्वभूतात्मभूत
स्य सम्यग्भूतानि पश्यतः देवा अपि मार्गे मुह्यंति अपदस्य पदैषिण इति पदशब्दः प्राप्यवाची स्वाति
रिक्तपदं यस्य ब्रह्मविदः पदैषिणो देवा अपि मार्गे मुह्यंति मार्गं न जानंति तदभावादित्यर्थः न
स्माद्विदुषः स्वरूपे ब्रह्मण्येव प्राणानां लयो नोत्क्रांतिरिति सिद्धं ननु ब्रह्मणि प्राणलयश्रुत्यु
क्तेः पृथिव्यादिषु लयश्रुतेर्विरोधस्तत्परिहारायेदमाह नाम्यपि परे तथा ह्याह १५ किं विदुषः प्राण
शब्दाभिधेयसूक्ष्मदेहलयः पृथिव्यादिषु उत परब्रह्मणीति संदेहे गताः कलाः पंचदश प्र
तिष्ठा इति विद्वद्विषयश्रुतेरेव पृथिव्यादिषु लयावगमात्तेष्वेव लय इति पूर्वपक्षः यद्यपि मनः
सहितानि दशेंद्रियाणि पंचभूतसूक्ष्मसहितानि पंच प्राणसहितानि वा षोडश कलाः संति त
थापि घ्राणमनसोरेकपृथिवीविकारत्वेनैकत्वविवक्षया श्रुतौ पंचदशत्वोक्तं प्रतिष्ठाशब्देन तत्त

के लोपादानानि व्योदोस्त्वं चैतेतानि कलागतानि लत्रलीनानीति यावत् तत्र सिद्धांतः तान्युक्तवि
शेषणानींद्रियाणि षोडशकलात्मकस्वस्वदेहरूपाणि ब्रह्मणि लीयंते तथा ह्याह श्रुतिः ए
वमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंतीति यथा नद्यः सम
द्रं प्राप्यास्तं गच्छंति पुरुषाश्रयास्तं प्राप्य लयं यांतीत्यर्थः स्वोपादाने स्वस्य लय इति व्याप्तिमल्ल
कव्यावहारिकप्रमाणानुमानापेक्षया पूर्वश्रुतौ पृथिव्यादिषु लिंगः शारीरलय उक्तस्तत्वावे
दकश्रुत्यपेक्षया ब्रह्मविवर्तस्य सर्वस्य ब्रह्मणि लयो द्वितीयश्रुतावुक्तः इत्यविरोधः स्वोपादानेषु प्र
लीनाः स्वोपादानैः सह ब्रह्मणि विनश्यंतीति श्रुतिद्वयतात्पर्यं १५ अविभागो वचनात् १६ सो
यं विद्वत् कलाविलयः किमविदुष इवानात्यंतिक उतात्यंतिक इति संदेहे एकविषयत्वं संग
ति पूर्वपक्षे मोक्षासिद्धिः सिद्धांते तत्सिद्धिरिति बोध्यं यत्र फलं नोच्यते तत्र पूर्वोत्तरपक्षसिद्धिः फ
लं मंतव्यं तत्रानात्यंतिकलय इति प्राप्ते ब्रूमः विदुषः कलानां ब्रह्मणा सहात्यंतिमविभाग एव
न सावशेषो लयः कलानां लयोक्त्यानंतरं पिधेते चासां नामरूपे इति कलानां शनात्मकनाम
रूपयोः पुरुषे लयमुक्त्वा स एषोऽकलोऽमृतो भवतीति वचनादित्यर्थः १६ परविद्याचिंतां प्रा
संगिकीं समाप्य प्रकृतामपरविद्याचिंतामनुसरति तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्या
सामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया १७ अस्मत्सुपक्रमाधिकर

णे सगुणं ब्रह्मविदामविदुषां च समानोत्क्रान्तिरित्युक्तं तत्र तद्विदुत्क्रान्तौ विशेषो वोच्यते तस्य लीन
वृत्तिकवागादिसमस्तस्योत्क्रमिष्यतो जीवस्यौकआयतनं हृदयं तस्य यदग्रं नाडीद्वारम्मुखं तस्य ज्व
लनं प्राग्गव्यकर्मफलज्ञानरूपं प्रद्योताख्यमादौ भवति तेन प्रद्योतेन प्रकाशितद्वारो विद्वानऽवि
द्वांश्च भवति । तस्य हैतस्य हृदयस्याग्रं प्रद्योतेन एष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो
वा शरीरदेशेभ्य इति तत्र संशयः किमविदुष इव विदुषोऽप्यनियतेन केनचिद्द्वारेणोत्क्राम
ति उत मूर्धन्यनाडीद्वारेणानियतेनैवेति तत्र विद्वत्कलानां वचनादविभाग वचनाच्च विदुषो वे
न्यानियमवचनादनियतेनेति प्राप्ते ब्रूमः दहरादिसगुणब्रह्मोपासकस्य मूर्धन्यानाडेव निष्क्र
मणं विद्यासामर्थ्यात् अन्यथा द्वारनियमाभावे विद्योत्कृष्टफलप्राप्तिर्न स्यादित्यर्थः ननु द्वा
राऽनियमेप्युत्कृष्टफलप्राप्तिर्भविष्यतीत्यत आह तच्छेषेति तस्याः सगुणविद्यायाः शेषभूता
या गतिः मूर्धन्यनाडीप्रभृतिमार्गस्तस्या अनुस्मृतिर्ध्यानं तद्विद्यानाश्च तेनैव ध्यानेन मार्गेण
निष्क्रमणं युक्तं अन्यथा द्वाराऽनियमे विफलप्राप्तौ मार्गध्यानविधिर्वैयर्थ्यं स्यात् तस्माच्छ्रिष्टेन
ब्रह्मणा सुपासितेनानुगृहीतस्तद्भावमापन्नो विद्वान् मूर्धन्ययैव शतनाडीभ्योऽधिकया निष्क्रामति
अविद्वांस्त्वितराभिर्नाडीभिः तथा च श्रुतिर्हार्दब्रह्मविद्यायां शतं चैका च हृदयस्य नाड्यस्तासां
मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति विष्वङ् नाना

108

वे.सू.वृ.
१०८

गतयः तस्माद्धृदयनाड्या मूर्धन्यया सूर्यरश्मिभिरेकीकृतया ब्रह्मनाड्या विद्वानुत्क्रामतीति
सिद्धं १७ रश्म्यनुसारी १८ हार्दे दहरब्रह्मविद्यायामेव ब्रह्मनाडीरश्मिसंबंधस्य छांदोग्ये पठितत्वात्तस्मा
च्छरीरादुत्क्रामतस्तैस्तैरेव रश्मिभिरूर्ध्वमाक्रमत इति पूर्वोक्तरीत्या ब्रह्मनाड्या निष्क्रामतो रश्म्यनुसा
रित्वमुक्तं तदाक्षिप्य संदृश्यते किं रश्म्यनुसारित्वमहन्यतस्यैव भवत्युत रात्रावपीति पूर्वपक्षे रात्रौ मृ
तस्य सूर्योदयापेक्षा सिद्धा तेन तदनपेक्षयैव ब्रह्मलोकप्राप्तिरिति फलं तत्राहनि रात्रौ वा मृतो रश्म्य
नुसारीति सिद्धान्ते प्रतिसिद्धान्तामाक्षिप्य समाधत्ते निशि नेति चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च १८
अहनि सूर्यरश्मिनाडीसंबंधस्य सत्वात्तत्रैव मृतो रश्म्यनुसारी निशि न भवति तदसत्वादिति चेन्न ना
डीरश्मिसंबंधस्य यावद्देहभावित्वात् यावद्देहभावित्वं च श्रुतिर्दर्शयति अमुष्मादादित्यात्प्रतायंते
ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायंते तेऽमुष्मिन्नादित्ये सृप्ता इति प्रतायंते विस्तृता भवं
ति रश्मयः सृप्ताः संबंधाः नन्वसंबंधः श्रुतो न तस्य यावद्देहभावित्वमित्यपेक्षायां प्रमाणं तत्सूच
कः सूत्रे चकारः प्रयुक्तः रात्रावप्योष्म्यस्य देहदर्शनाद्रश्मिसंबंधोऽनुमेय इति तस्मादहनि रात्रौ वा मृ
तो विद्वानविलंबेनैव रश्म्यनुसारीति सिद्धं १९ अतश्चायनेऽपि दक्षिणे २० किं दक्षिणायने मृ
तो विद्वान्विद्याफलं प्राप्नोति न वेति संदेहे उत्तरायणप्राशस्त्यप्रसिद्धेः भीष्मस्य तत्प्रतीक्षादर्श।
नाच्च न प्राप्नोतीति प्राप्ते अतिदिशति पूर्वन्यायमतश्चेति अत एव च कालांतरप्रतीक्षानुपपत्तेर्वि

श्री
१०८

यायानित्यवत्फलं संवंध श्रवणात् दक्षिणायने मृतो विद्वान्फलमाप्नोत्येवेत्यर्थः अविदुषा
मुत्तरायणप्रशस्त्यमित्यभिवदनरूपसदाचारे प्रवृत्त्यर्थं पितृप्रसादलब्धेच्छामरणज्ञापनार्थं
वा भीष्मस्याविदुषः उत्तरायणप्रतीक्षेतिभावः २० ननु भगवद्गीतासु यत्रकाले त्वनावृत्तिमावृ
त्तिं चैव योगिनः प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ इति कालं प्रतिज्ञायाहरादि विशेषकालस्याना
वृत्तये नियतत्वोपदेशात्कथं रात्रौ दक्षिणायने वा मृतो विद्वाननावृत्तिमाप्नुयादित्यत आह योगि
नः प्रति च स्मर्यते स्मार्ते चैते २१ योगिनः स्मार्तविद्योपासकान्प्रत्ययं अहरादिकालविशेषः स्मर्य
ते स्मार्तेन प्राणसंहतेन श्रौतदहराद्युपासमान्प्रति नन्वत्र योगो दहराद्युपासनमेवास्त्वत आह स्मा
र्तेति ब्रह्मार्पणबुद्ध्याकृतनित्याग्निहोत्रादिकर्मयोगः अनाश्रितकर्मफलमित्यादिस्मृतेः तयो
च एते योगसांख्ये स्मार्ते एव न श्रौतविद्यारूपे तथा च श्रुतिस्मृत्योरर्थभेदान्न श्रौतोपास्तिषु का
लनियमः यदि च श्रुतदेवयानपितृयानयोरेवात्र स्मृतावपि प्रत्यभिज्ञानात्स्मृतौ कालशब्दे
न तदभिमानिदेवताग्रहणं श्रुतिसमानार्थत्वाय क्रियते तदा दहरादिकालाभिमानिदेवतानो
त्तदासत्वान्न विदुषो मृतो कालनियमापेक्षेत्यनवद्यं तस्माद्यदा कदाचिन्मृतो विद्वान्विद्याफ
लं प्राप्नोतीति सिद्धं ॥ २१ ॥ २१ ॥ २१ ॥
इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां चतुर्थाध्याये द्वितीयः पादः ॥ २ ॥ शिव

एवं सगुणविद्याफलप्राप्तये देवयानमार्गं वक्तुं तदंगोत्क्रांतिश्चिंतिता संप्रत्यंगिनं देवयानमार्गं वक्तु-
मयं पाद आरभ्यते अर्चिरादिना तत्प्रथितेः १ अस्ति ब्रह्मलोकप्राप्तिहेतौ मार्गे श्रुतीनां विप्रतिप-
त्तिः नाडीसंबद्धरश्मिरूपो मार्गः क्वचिच्छ्रूयते क्वचित्तु तेऽर्चिषमभिसंभवंत्यर्चिषोऽहरित्यादावग्न्यादि-
रूपः अन्यत्र तु सूर्यद्वारेण ते विरजाः प्रयांतीति श्रुतेर्विरजाः विरजसः मार्गतत्प्राप्यफलविरोधि
विधुरा इत्यर्थः तत्र श्रुतिविप्रतिपत्त्या संशयः किं परस्परं भिन्ना एवैते मार्गा उतानेकविशेषणयु-
क्त एक एवेति पूर्वपक्षे येन केनचिन्मार्गेण गमनमिति विकल्पः सिद्धांते मार्गैक्याद्विकल्पाभाव
इति बोध्यं तत्र प्रकरणभेदान्मार्गभेदस्तथा च विदुषां स्मृतिकालाऽनियमवन्मार्गानियम इति
प्राप्ते ब्रूमः सर्वो हि ब्रह्मलोकप्रेप्सुरर्चिरादिनैवैकेन मार्गेण गंतुमर्हति कुतः तत्प्रथितेः तस्या-
र्चिरादिमार्गस्य पंचाग्निविद्याप्रकरणे ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवंतीति
पंचाग्न्युपासकस्येव तदितरस्यापि सगुणोपासकस्य श्रुतत्वादित्यर्थः न च प्रकरणभेदान्मार्गभे-
दः सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानादंतव्यब्रह्मलोकाभेदाच्च सर्वत्र सर्वविशेषणोपसंहारे-
णानेकविशेषणयुक्तमार्गैक्यावगमात्तस्माद्ब्रह्मलोकप्राप्तिहेतुर्मार्गः सर्वेषामेक एवेति १ वा-
युमब्दादविशेषविशेषाभ्यां २ सर्वेषां मार्गविशेषणानां ग्रथनप्रकारः कथ्यते स एतं देवयानं पं-
थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इंद्रलोकं स प्रजापतिलोकं स ब्रह्म-

लोकमिति कौषीतकिनो देवयानं मार्गमामनंति स विद्वांस्तल्लोकं प्राप्य स तल्लोकस्वामिनाऽग्न्यादिना
नीयत इत्यर्थः छांदोगास्त्वेवमथैयं तेनैव विषममिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्वमाण
पक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमिति उदङ्ङादित्योपान्त्यमासा
नेति तान्निरुक्तिनियोजनाय श्रुतिद्वयेप्यग्निरादौ पठितः अनंतरं च कौषीतकिश्रुतौ वायुश्रुतः सो
ऽर्चिरादिमार्गे कस्मादनंतरं ग्रथितव्य इति संदेहे सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानान्मार्गैकावट
स्मनंतरं वायुप्रत्यभिज्ञानात्तत्रैव तु तस्य प्रवेश इति प्राप्ते ब्रूमः अग्रहादान्संवत्सरादनंतरं आदित्यात्पू
र्वं वायुमभिसंविशंति गंतारः अविशेषविशेषाभ्यां कौषीतकिश्रुतौ वायोः कुत्रचिदानंतर्य
एवं वक्तव्यविशेषो न ज्ञायते नह्याचकयदाभावात् बृहदारण्यके त्वादित्यात्पूर्वत्वविशेषो दृश्यते य
दा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स
ऊर्ध्वमाक्रमते स आदित्यमागच्छतीति पुरुषोऽस्माल्लोकाद्देहः प्रैति तदेति शेषः तस्मै प्राप्ता
य स्थाने स वायुस्तत्रस्थात्मनि विजिहीते छिद्रं करोति यथा रथचक्रस्य छिद्रं तेन वायुदत्तेन छिद्रेणो
र्ध्वमाक्रमते स ध्यानाकऊर्ध्वस्तमाह आदित्यमिति तथा च तेनेति श्रुत्या आदित्यगमने हेतुद्वारहे
तोर्वायोः पूर्वत्वमादित्याद्वराभ्युपगम्य अनंतरं पाठः स वायुः अत्रैवक्रमेनिष्यत्त्रः नाडीरश्मिप्रवे
शानंतरमर्चिरादिसंवत्सरांतं गच्छतीति विद्वान् छंदोगपक्षत्वनुसारात्तु बृहदारण्यके मासानंतरं सं

वत्सरस्यैवानुप्रवेशास्तस्य मासावयवित्वान्योगत्वात्संवत्सरानंतरं देवलोकाद्वायोरादित्यस्यादित्या
चंद्रमसश्चंद्रात्तडिल्लोकस्य प्रवेशास्तथा च सूत्रे वायुपदं देवलोकोपलक्षकं अब्दादनंतरं देवलोक
सहितं वायुमागच्छतीति विहानिति सूत्रार्थः २ एवमग्न्यनंतरं श्रुतवायोः स्थानमुक्त्वा तत्रैव कौ
षीतकिवाक्ये श्रुतो वायनेनंतरं श्रुतवरुणादीनामर्चिरादिमार्गे स्थानमाह तडितोधिवरुणः सं
बंधात् ३ किं कौशीतकिवाक्ये श्रुतो वरुणोर्चिरादिमार्गे संबध्यते न वेति संदेहे स्थानबोधकमा
नाभावान्न संबंध्यत इति प्राप्ते ब्रूमः तडितदुपरि हि सजलामेघा हृश्यंते जलाधिपतिश्च वरुण
इति तडिद्वरुणयोः संबंधादित्यर्थः वारुणानंतरमिंद्रादेः प्रवेशः कौशीतकिनोपाठक्रमेवा
धकाभावादिति ३ एवमर्चिरादीनां क्रमं निरूप्य तेषामेव स्वरूपं निरूपयति आतिवाहिकास्त
ल्लिंगात् किमेतेर्चिरादयो मार्गचिह्नभूता उत गंतॄणां विदुषां भोगभूमयः आहोस्विदातिवा
हिका इति संशयः तत्रार्चिरादीनां लौकिकत्वादिवन्मार्गचिह्नत्वमग्निलोकं वायुलोकमित्यादि
लोकशब्दश्रवणाद्भोगभूमित्वं वेति प्राप्ते ब्रूमः एतेर्चिरादयोतिवाहिकाः कार्यब्रह्मगंतॄणां
विदुषां गमयितारः कुतः तल्लिंगात् आमानवः स एतान्ब्रह्म गमयतीत्यमानवपुरुषस्य वि
द्युल्लोकं प्राप्तानुपासकान्प्रति गमयितृत्वश्रवणादित्यर्थः न च यस्य गमयितृत्वं श्रुतं तस्यैव तडि
तो वाच्यं तस्य वाक्यस्यार्चिरादिमानवपुरुषसमभिव्याहारप्राप्तमानवत्वनिवृत्तिपरत्वेन सिद्धवद

मयितृत्वानुवादकत्वात् ततः सिद्धवद्गमयितृत्वदर्शनाल्लिंगात्सर्वेषामप्यर्चिरादीनां पुरुषाणां नेतृत्व
मिति नच लोकमात्रेणाभोगभूमित्वमिति युक्तं लीनेंद्रियाणां विदुषां भोगायोगात्तस्मादग्निस्वामिकं
लोकं प्राप्यैतेनाग्निनावाहकेनाऽहृष्टं वप्राप्नोति तेनच देवतांतरमिति योज्यं ४ ननु लिंगमात्रं
न पूर्वेषां नेतृत्वे गमकं न्यायाभावादित्यत आह उभयव्यामोहात्तत्सिद्धेः ५ यद्यर्चिरादयोऽचे
तनात्तदा विदुषामपि निर्देहानं लीनेंद्रियाणां ज्ञानाभावेनोभयोर्विहृतार्चिरादीनां व्यामोहादज्ञता
कार्यब्रह्मप्राप्तिर्न स्यात् लोके हि मूर्च्छितो पतिहीनो यथा वह्निरिव तनां नरैर्नीयते तेनाचेतनैः अ
तो यत्नहीनस्य तनां नरैर्नीयते इति न्याय सहितान्लिंगात्सर्वेषामर्चिरादीनां देवानां तत्सिद्धेर्नेतृ
त्वसिद्धेर्न स्यापद्येनं लिंगमर्चिरादीनां देवत्वे रात्र्योदक्षिणायनेवास्य तस्य विदुषो ब्रह्मलोकगतिर्युक्ता न
राभवति देवानां सदा सत्वादिति ५ ननु नार्चिरादीनां नेतृत्वं विद्युल्लोकादमानवपुरुषस्यैव नेतृ
त्वश्रवणाद्वरुणादीनां नेतृत्वायोगादित्यत आह वैद्युतेनैव ततस्तच्छ्रुतेः ६ अमानवः पु
रुषो विद्युल्लोकमागतो वैद्युतस्तेनैव ततो विद्युत्प्राप्तेरूर्ध्वं नीयमानाः विद्वांसः कार्यब्रह्म प्रा
प्नुवंति अमानवस्य ब्रह्मलोकान् गमयति विद्युल्लोकस्यानित्यमानवस्यैव गमयितृत्वश्रवणा
त् अमानवो यस्सर्जनेनैव न वरुणादीनां नेतृत्वं न प्राधान्येनार्चिरादिविद्युदंतानां तु प्राधान्येनैव
नेतृत्वं तस्मादर्चिरादयो नेतार इति सिद्धं ६ एवं गंतव्यप्राप्तिर्देवमार्गं निरूप्य फलभूतं गंतव्य

111

वे॰सू॰वृ॰

२२१

मपित्वात्तन्नवात्कत्वादतः सिद्धवद्गमयितृत्वं दर्शनाल्लिंगात्सर्वेषामप्यर्चिरादीनां पुरुषाणां नेतृत्वमि
ति न च लोकमात्रेण भोगभूमित्वमिति युक्तं लीनेन्द्रियाणां विदुषां भोगायोगात् तस्मादग्निस्वामिकं लो
कं प्राप्य तेनाग्निना वा वाहकेनाऽहं देवं प्राप्नोतीति तेन च देवं तान्तरमिति योज्यं ४ ननु लिंगमात्रेण
सर्वेषां नेतृत्वं गमकं न्याय्याभावादित्यत आह उभयव्यामोहात्तत्सिद्धेः ५ यद्यर्चिरादयोऽचेत
नास्तदा विदुषामपि निर्देहानां लीनेन्द्रियाणां ज्ञानाभावेनोभयोर्विदुषोर्चिरादयोर्व्यामोहादज्ञत्वात्का
र्यब्रह्मप्राप्तिर्न स्यात् लोके हि मूर्छितो यत्र हीनो यत्नवद्भिश्चेतनान्तरैर्नीयते नाचेतनैः अतो यत्न
हीनस्य चेतनान्तरैर्नीयत इति न्यायसहिताल्लिंगात्सर्वेषामर्चिरादीनं देवानां तत्सिद्धेर्नेतृत्वसिद्धेर्न
न्याय्यहीनं लिंगं अर्चिरादीनां देवत्वे रात्रौ दक्षिणायने वा मृतस्य विदुषो ब्रह्मलोकगतिर्युक्ता न राभ
वति देवानां सदा सत्वादिति ५ ननु नार्चिरादीनां नेतृत्वं विद्युल्लोकादमानवपुरुषस्यैव नेतृ
त्वश्रवणाद्वरुणादीनां तत्वायोगादित्यत आह वैद्युतेनैव ततस्तच्छ्रुतेः ६ अमानवः पुरु
षो विद्युल्लोकमागतो वैद्युतस्तेनैव ततो विद्युत्प्राप्तेरूर्ध्वं नीयमानाः विद्वांसः कार्यं ब्रह्म प्राप्नु
वन्ति अमानवस्य ब्रह्मलोकानयनं गमयति विद्युल्लोकस्थानिस्थमानवस्यैव गमयितृत्वश्रवणात् ॥
अमानवो यस्मिन्नत्वेन वरुणादीनां तत्त्वं तत्प्राधान्येनार्चिरादिविद्युतान्तानां तत्प्राधान्येनैव नेतृत्वं
तस्मादर्चिरादयो नेतार इति सिद्धं ६ एवं गन्तव्यप्राप्तिहेतुं मार्गं निरूप्य फलमस्तं गन्तव्यं निरू

१२१

पयतिकार्यंबादरिरस्यगत्युपपत्तेः ७ सगुणानुब्रह्मगमयतीत्यत्रसंशयः किंपरंनिर्गुणंब्रह्मग
मयत्यमानवः पुरुषउतकार्यंसगुणंब्रह्मेतिपूर्वपक्षेऽर्चिरादिगत्याब्रह्मलोकप्राप्त्यनंतरंवि
दुषोलिंगशरीरलयेनपरब्रह्मप्राप्तिः सिद्धांतेकार्यब्रह्मप्राप्त्यर्थमेवगतिः नपरब्रह्मप्राप्त्यर्थ
मितिमतंसूत्रकारस्तत्रपूर्वपक्षयिष्यन्नादौसिद्धांतमाह कार्यमितिकार्यमेवब्रह्मगमयतीतिबा
दरीराचार्योमन्यतेकुतः अस्यकार्यब्रह्मणः परिच्छिन्नस्यगत्युपपत्तेः प्रत्यग्रूपस्यापरिच्छि
न्नस्यपरस्यतदनुपपत्तेरित्यर्थः विशेषितत्वाच्च ८ ब्रह्मलोकान्गमयतीतिश्रुत्यंतरेबहु
वचनेनानुगंतव्यब्रह्मणोविशेषितत्वात्सावयवस्यावयवभेदेनभिन्नस्यब्रह्मणएवगंतव्यत्वंनत
न्निर्विशेषब्रह्मणः लोकशब्दाच्चभोगभूमेरेवप्राप्यत्वंनपरस्येतिचकारार्थः ८ ननुनपुं
सकस्यब्रह्मशब्दस्यपरस्मिन्नेवमुख्यत्वात्कथंकार्यब्रह्मणिब्रह्मगमयतीतिव्यपदेशस्तत्रा
ह सामीप्यात्तुतद्व्यपदेशः ९ तुशब्दोपनिरासार्थः परमेवहिब्रह्मसत्यकामत्वादिगुणंपु
नःकार्यब्रह्मेत्युच्यते तथाचकार्यब्रह्मणः कारणपरब्रह्मसामीप्यात्कारणेमुख्यस्यब्रह्म
ब्रह्मपदस्यकार्यव्यपदेशः लक्षणयाप्रयोगइत्यर्थः मुख्यासंभवादितिभावः ९ ननुका
र्यब्रह्मप्राप्तौतेषांनपुनरावृत्तिरितिश्रुतिविरोधस्तत्राह कार्यात्ययेतदध्यक्षेणसहातःपर
मभिधानात् १० कार्यब्रह्मलोकस्याऽत्ययेनाशेसति तदध्यक्षेणतल्लोकस्वामिनाहिरण्य

112

वे॰ सू॰ वृ॰
११२

गर्भेण सहातः कार्यब्रह्मणः परं ब्रह्म प्राप्नुवंतीत्युपन्नात्मसाक्षात्काराविद्वांस इत्युक्तं श्रुत्याभि
धानात् अवगंतव्यमित्यर्थः १० स्मृतेश्च ११ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृ
तात्मानः प्रविशंति परं पदमिति स्मृतिश्च ब्रह्मलोकप्राप्तानां क्रममुक्तिं दर्शयति अतोपि नाना
वृत्तिश्रुतिविरोधः प्रतिसंचरो महाप्रलयः तस्मिन् प्राप्ते परस्य हिरण्यगर्भस्यांते ऽधिकारसमा
प्तिः तदा कृतात्मनः शुद्धधियो ब्रह्मलोकवासिनः परं पदं प्राप्नुवंतीति योजना तस्मात्कार्यब्रह्म
प्राप्त्यर्थमेवार्चिरादिगतिः न प्रत्यग्रूपपरब्रह्मप्राप्त्यर्थं घटाकाशस्येव महाकाशप्राप्त्यर्थं ग
तेरफलत्वादिति सिद्धं ११ एवं सिद्धांतमुक्त्वा पूर्वपक्षमाह परं जैमिनिर्मुख्यत्वात् १२ ननु
सकब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वात्परमेव ब्रह्म गमयन्मानवइति जैमिनिराचार्यो मन्य
ते १२ दर्शनाच्च १३ तेषां न पुनरावृत्तिः तयोर्ध्वमायन्नमृतत्वमेतीति विमुक्तेर्गतिपू
र्वकत्वदर्शनाच्च परमेव गंतव्यमित्यर्थः १३ न च प्रजापतेः सभां वेश्म प्रपद्य इति स्मरण
काल उपासकस्य कार्यब्रह्मप्राप्तिसंकल्पश्रवणाच्च परं गंतव्यमित्याशंक्याह न च कार्ये प्र
तिपत्त्यभिसंधिः १४ अयं प्रतिपत्त्यभिसंधिः प्राप्तिसंकल्पः कार्यब्रह्मणा न कार्यब्रह्मविषयो
न भवतीति यावत् किंतु परब्रह्मप्राप्तिविषयक एव तेषां पदं तराले ह्यस्येति परस्यैव प्रकृतत्वात् न
नु प्रकरणं बलाहे इमं ब्रह्मप्राप्तिसंकल्पस्य परविषयकत्वेपि तस्याः प्राप्तेर्गतिपूर्वकत्वं क।

११२

यमिति चेदुच्यते तदपराजितापूर्ब्रह्मणः प्रभुविनिर्मितं हिरण्मयं वेश्मेति दहरविद्यायां हिरण्य
गर्भवेश्मप्राप्तेर्गतिपूर्वकत्वावगमात् सगुणापि परब्रह्मवेश्मप्राप्तेर्गतिपूर्वकत्वमनुमीयते वेश्मप्रा।
प्तिपतितत्वस्य सामान्यात् यद्वा प्रजापतेः सभां वेश्म इत्यत्रैव पदेः गत्यर्थत्वाद्गतेश्च मार्गसाध्य
त्वान्मार्गसाध्यगतिपूर्वकत्वं परवेश्मप्राप्तेरिति पूर्वपक्षः श्रुत्यर्थस्तु तत्र ब्रह्मलोके न केनाप्य
विदुषापराजितेत्यपराजिता पूरस्मिन् ब्रह्मणो हिरण्यगर्भस्य तेनैव प्रभुणा विनिर्मितं हिरण्मयं वे
श्म चास्तीत्यत्रास्ति पयनेब्रह्मचर्यसंपत्तिर्विहानिति अत्र पूर्वपदेसमन्वितत्वात् दर्शनाच्चेति देवतु द्वयं
पूर्वमेव दूषितं यत्तु प्रकरणाद्वेश्मप्राप्तेः संकल्पः परविषय इति तत्र प्रजापतेः सभां वेश्म प्रप
द्य इति वाक्यस्य श्रुतिमांद्दुर्बल प्रकरणविच्छेदेन वेश्मप्राप्तिसंकल्पस्य कार्यब्रह्मसभादिविषय
त्वावगमात् तस्तत्त्वर्थेनैवास्य परप्रकरणे कीर्तनं सगुणविद्याद्विगतिमपेक्ष्य प्रजापतिसभादिप्रा
प्तिफलहेतुरियं तत्परविद्यागतिनिरपेक्षैव निरतिशयफलहेतुरतो महीनो निस्तीति तस्मात्कार्य
ब्रह्मप्राप्त्यर्थैव गतिरिति सिद्धं १४ एवमर्चिरादिगत्यो गोवर्जं निरूप्य गेतह्निरूपयति अप्रती
कालंबनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च १५ किममानवः पुरुषः सर्वानुपास
कान्ब्रह्मलोकं प्रापयति उत प्रतीकोपासकभिन्नानिति संशयः तत्र नियामकाभावात्सर्वा

113

वे॰ सू॰ वृ॰
११३

नितिप्रातेः इमः प्रतीकोपासकभिन्नान्सर्वान्पाकाल्नयत्यमानवइतिवादरायणाचार्योमन्यते ननु तथाऽनियमः सर्वेषामित्यत्रसर्वोपासने भूमाभोगोपसंहारोक्तिविरोधस्तत्राह उभयथेति कांश्चिदुपासकान्नयति कांश्चिन्नेतुभयथा चाभ्युपगमेदोषाभावादित्यर्थः अनियमन्यायस्यप्रतीकभिन्नविषयत्वादितिभावः नियामकमाह तत्क्रतुश्चेतिकुतः उपासनं कार्यब्रह्मविषकः कल्पर्यस्योपासकस्याभिन्नमतत्क्रतुस्तथाच योयदुपासकः सतत्प्राप्नोतीतिश्रुतीन्स्मृतिसिद्धत्वात्तदुपासकानामेव कार्यब्रह्मप्राप्तिरित्यर्थः प्रतीकोपासनेषुनामेब्रह्मेत्यादिषुब्रह्मणः प्रतीके प्रतिविशेषणत्वेनप्रतीकस्यैवप्राधान्यात्रतदुपासकानांब्रह्मोपासकत्वंवाग्नयुपासकानांतत्त्वब्रह्मोपासकत्वेपिश्रुतिवलाद्ब्रह्मप्राप्तिरिति १५ विशेषंदर्शयति १६ किंचयावन्नाम्नोगतंतत्रास्ययथाकामचारोभवतीतिनामप्रतीकोपासनफलादुत्तरोत्तरवागाद्युपासनामुत्कृष्टफलविशेषंदर्शयतिश्रुतिर्वाग्वावनाम्नोभूयसीत्यादयश्चायंफलविशेषः प्रतीकानामतत्कार्यायत्कर्मैवतामुपास्यत्वेयुज्यतेननुपूर्वत्रैकस्यब्रह्मउपास्यत्वे तस्माद्ब्रह्मोपासकानामेवब्रह्मप्राप्तिर्नप्रतीकोपासकानामितिसिद्धं १६॥

॥ ॥ इति ॥ श्री ॥ ॥

इतिश्रीब्रह्मसूत्रवृत्तौब्रह्माऽमृतवर्षिण्यांचतुर्थाध्यायस्यतृतीयः पादः ॥३॥ राम

ओम् ॥१॥ एवं सगुणब्रह्मविदां प्राप्यमुक्त्वा निर्गुणब्रह्मविदां प्राप्यमाह संपद्याविर्भावः स्वेनशब्दा
त् १ एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रू
यते तत्र संशयः यथा सुकृतिनः स्वेन रूपान्तरेण फलेनाभिनिष्पत्तिस्तथा निर्गुणविदोऽभिनि
ष्पत्तिरुतात्ममात्रेणाभिनिष्पत्तिरिति पूर्वपक्षे स्वर्गमोक्षयोरविशेषः सिद्धान्ते विशेष इति फलं
अत्र फलनिरूपणादध्यायपादसंगती स्फुटत्वे तत्र स्वर्गवन्मोक्षस्याभिनिष्पत्तिः फलत्वावि
शेषादिति प्राप्ते ब्रूमः संपद्य स्वप्रकाशमात्मानं साक्षादनुभूयते नैवात्ममात्रेणाविर्भावः अव
स्थावान्भवति मुक्तः कुतः स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दादित्यर्थः फलत्वहेतुकान
मानं मोक्षादिनित्यत्वश्रुतिबाधितमिति ननु स्वरूपात्मकमोक्षस्य सदा सत्त्वात्कः पुनः पूर्वावस्थातो
विशेष इत्यत आह मुक्तः प्रतिज्ञानात् २ यः स्वरूपेणाभिनिष्पद्यते स सर्वानर्थविनिर्मुक्तः स्व
प्रकाशनिरतिशयानंदात्मना वर्तते पूर्वं त्ववस्थात्रयकलुषितः संसारीवेति विशेषः॥
ननु स्वरूपाभिनिष्पन्नो मुक्तिरिति कुतोऽवगम्यते तत्राह प्रतीति यः आत्मापहतपाप्मेत्युपक्र
म्य एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति सकलदोषमुक्तस्यैवात्मनो व्याख्येयत्वेन प्रतिज्ञानादित्यर्थः
ननु कार्यज्योतिरुपसंपन्नस्य कथं मुक्तत्वमित्यत आह आत्मा प्रकरणात् ३ अत्र ज्योतिरात्मै

114

वे॰ सू॰ वृ॰
११४

वनमौतिकं तेजः य आत्मापहतपाप्मेत्यात्मप्रकरणादित्यर्थः अविभागेन दृष्टत्वात् ४ परंज्यो
तिरूपसंपद्य मुक्तो विद्वानित्युक्तं तेन मुक्तः स्वात्मनो भिन्नं वा रयति अविभागेनेति निरतिशयानंदब्रह्मात्म
नैवावतिष्ठति मुक्तः कुतः दृष्टत्वात् ब्रह्मैव सन् ब्रह्माप्येति तत्त्वमसीत्यादिश्रुतिषु अभेदस्य दृष्टत्वादि
त्यर्थः ४ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ५ एवं सिद्धब्रह्माभिन्नत्वं मुक्तमपजीवस्य संदिह्यते स
मुक्तो ब्रह्मात्मकः किं सत्येन सर्वज्ञत्वादिप्रपंचेन सहावतिष्ठते उत शशविषाणवदसन्नेव सर्वज्ञता
दिरिति सच्चिन्मात्रेणावतिष्ठते आहोस्विदस्तु नाम प्रपंचो व्यावहारिकः सर्वज्ञत्वादिमानिति त्रि
त्रो ह्यु पूर्वपक्षमाह ब्राह्मेणेति ब्रह्मसंबंधिना सत्येन सर्वज्ञत्वादिना सहावतिष्ठते ब्रह्मात्मको मु
क्त इति जैमिनिराचार्यो मन्यते कुतः उपन्यासादिविधिव्यपदेशेभ्यः उपन्यास उद्देशः स च सोऽन्वेष्टव्य
इत्यादि विधिर्यानार्थमागतो य आत्मापहतपाप्मेत्यादिरूपो विधिरज्ञातज्ञापनं स च तस्य सर्वेषु
लोकेषु कामचारो भवतीत्यादिरूपः उद्देशविधिविलक्षणो व्यपदेशः स च सर्वज्ञः सर्वेश्वर इ
त्यादिरूपः अयं च न उद्देशः विध्यभावात् नापि विधिः सिद्धवन्निर्देशात् अतएभ्यो हेतुभ्यः स
प्रपंच एवात्मेति ५ अधुना द्वितीयपूर्वपक्षमाह चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः
६ जीवात्मनस्तदात्मकत्वाच्चिदेकरसत्वात् चितितन्मात्रेण चैतन्यमात्रात्मनावस्थितेर्मु

केब्रह्मात्मनिसर्वज्ञत्वइत्यादिशब्दानिरर्थकएवप्रयुज्यंतइत्यौडुलोमिराचार्योमन्यते सर्वज्ञत्वादीनां
धर्माणामसंभवाद्धर्मिस्वरूपादेतस्मातभिन्नत्वेऽभिन्नत्वेवातेषांगवाश्ववद्धर्मिवच्चधर्मत्वान
पपत्तेरितिप्राप्ते ६ सिद्धांतयति एवमप्युपन्यासात्पूर्वभावादविरोधंबादरायणः ७ ए
वमपिपारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेपिपूर्वोपन्यासादिभ्यः सर्वस्यब्रह्मस्वरूपस्य
सर्वज्ञत्वादेर्व्यावहारिकस्यभावात ब्रह्मणोमुक्तात्मनः सप्रपंचत्वनिष्प्रपंचत्वयोरविरोधंबा
दरायणआचार्योमन्यते आविद्यकत्वसर्वधर्माणांसर्वज्ञत्वादीनामुपपन्नेर्नतेषांतुच्छत्वमिति
अतएवसर्वात्मनांअविद्यानिवृत्तौविदेहकैवल्येनिष्प्रपंचमेवएतदभिप्रेत्योक्तंभगवताभाष्य
कारेणव्यवहारापेक्षयेतिनत्वौपनिषदानांसोऽपिव्यवहारितिमतामूलाभवादितिभावः ८
एवंपरविद्याफलमभिधायाऽपरविद्याफलंप्रपंचयितुमुपक्रमते संकल्पादेवतुतच्छ्रुतेः ९
दहरविद्यायांश्रूयते सयदिपितृलोककामोभवति संकल्पादेवास्यपितरःसमुत्तिष्ठंतीत्या
दितत्रसंशयः किंब्रह्मलोकस्थस्यविदुषोभोगहेतवः पित्राद्यः संकल्पादेवसिद्ध्यंतिउ
तयत्नांतरसहकृतात्संकल्पादिति तत्रलोकेभोगसाधनस्यप्रयत्नसाध्यत्वदर्शनात्तत्रापि
यत्नसापेक्षत्वात एवब्रह्मन तस्यविदुषोविभूतिसिद्धिः नकेवलेच्छातः इतिप्राप्तेब्रूमः सं
कल्पादेवास्यविदुषः पित्रादिविभूतिसिद्धिः कुतः साधनांतरनिरासकेवकारश्रुतेः श्रुत्या

चलौकिकानुमानस्य बाधः स्यादिति किंच यदि संकल्पः साधनांतरसापेक्षः स्यात्तर्हि तदभावे विदुषो
वैयर्थ्यसंकल्पस्य तायतो सत्यसंकल्पत्वं न स्यात् संकल्पानुगुणसाधनांतरमिष्टमेवेति ८ अ
त एव चानन्याधिपतिः ९ अत एव सत्यसंकल्पत्वादेव विद्वाननन्याधिपतिर्भवति यदिवि
दुषः कश्चनाधिपतिः स्यात्तर्हि तदधीनभोगस्य संकल्पमात्रादसिद्धेः सत्यसंकल्पत्वं
न स्यात्तस्मादीश्वरात्मकस्य विदुषस्तावन्मनोमात्रं वगतं शरीरेंद्रियाणि संत्युत न संति आ
होस्वित्संति न संति चेति संदेहे यथासंकल्पादेहेन्द्रियधारणं स्यात्साधनांतराभावस्तत्र
पक्षे बादरिराचार्यो शारीरेंद्रियाणामभावं मन्यते अत्र ह्येवमाम्नायुः मनसैतान्कामान्प
श्यन् रमते य एते ब्रह्मलोक इति यदि विदुषः शारीरादिकं स्यात्तदा मनसेति विशेषणमन्य
योगव्यवच्छेदकमवधारणपरं पीड्येतेति एकः पूर्वपक्षः १० पूर्वपक्षांतरमाह भा
वं जैमिनिर्विकल्पामननात् ११ शरीरेंद्रियाणां मनस इव भावं सत्तां जैमिनिराचार्यो मन्य
ते स एकधा भवति त्रिधा भवतीत्यादिना विदुषोऽनेकधाभावविकल्पामननात् न
हि शरीरभेदं विना कदाचिदेकधाभावस्याप्यनेकधाभावविकल्पः संभवतीति ११

सिद्धांतमाह द्वादशाहवदुभयविधं बादरायणोऽतः अत एव मनसेति विशेषणाद्विकल्पा
त्मकमननाख्येति लिंगाद्यदा कदाचिच्छरीरादिसंकल्पस्तदा शरीरेंद्रियवत्वं यदा तु तत्संकल्पाभावस्त
दा शरीरेंद्रियराहित्यमित्युभयविधं विदुषस्तत्स्वरूपं बादरायण आचार्यो मन्यते द्वादशा
हवत् यथा द्वादशाहमृद्धिकामा उपेयुरित्युपेयचोदनागम्यत्वात् द्वादशाहस्य सत्रत्वं द्वा
दशाहेन प्रजाकामं याजयेदिति यजिगामित्वस्य नियुजतिचोदनागम्यत्वादहीनत्वं चेत्युभ
यविधत्वं तद्वदित्यर्थः ननु विदुषः शरीराद्यभावे कथं भोग इत्यत्राह तन्वभावे संध्यवदु
पपत्तेः १२ तनोः इंद्रियशरीरस्याभावकाले संध्यवत् यथा स्वप्ने मानसिकविषयभोगो जा
ग्रद्भोगविलक्षणस्तद्भोगः ज्ञातः मनसैतान्कामान्पश्यन्रमत इति श्रुतेर्भोगसाधनान्तर
वारयत्या एवमेवोपपत्तेरित्यर्थः १३ ननु देहाद्यभावेपि भोगसत्वे सशरीरतांगीकारो व्य
र्थस्तत्राह भावे जाग्रद्वत् १४ देहादिभावकाले जाग्रद्वत् भोगः स्वप्नभोगविलक्षणो भ
वतीत्यर्थः १४ ननु विकल्पमननलिंगेन विदुषोनेकशरीराणि संतीत्युक्तं तन्नयुक्तं नि
रात्मकेषु तेषु भोगायोगादित्याक्षेपे इदमाह प्रदीपवदावेशस्तथा हि दर्शयति [illegible]
निरात्मकेषु तेषु भोगायोगादित्याक्षेपे यति १५ किं विदुषा सृज्यमानानि शरीराणि
दारुयंत्रवन्निरात्मकानि उतास्मद्देहादिवत्सात्मकानीति संदेहः सर्वथापि विदुषः ए

116 वे. स्तः
११६

कस्मिंन्नेवदेहेभोगः स्थितिहांते सर्वेष्वपीति बोध्यं तत्रयंतः करणपरिच्छिन्नस्यभोक्तुर्विदुषः श
रीरांतरेषुप्रवेशायोगान्निरात्मकानीतिप्राप्तेद्भमः विदुषास्रज्यमानेषुसेंद्रियमनः सवद्द
षुदेहेषुविदुषआवेशोऽभिव्यक्तिः विद्यासामर्थ्यात्दुपपद्यतेषुरानतनांतः करणपरिच्छे
दस्यविदुषांसंयोगसामर्थ्यात् व्यापकंप्रत्यक्ष्रंतेवंयकवोत्सदीपवत् यथाप्रदीपएकोनेक
वर्तिषुप्रविशति नहहिद्वानेनकांगंनकांतः करणद्वारादेहेषुप्रविशति तथाहिदर्शयति
शास्त्रंएकधाभवतित्रिधाभवतिपंचधासप्तधानवधेत्यादिद्ययधिविदुषः सर्वेषुदेहेषु
कवंदीपानांवभिन्नत्वमितिवैषम्यमस्तितथाप्युत्पादकदीपगनैकांसादृश्याद्युत्पन्नदीपेष्व
पचयंनरतिसाम्यंबोध्यं तस्मात्सर्वाणिशरीराणिसात्मकान्येव १५ ननुविदुषोनशरीरव
वियुक्ते तत्केनकंपश्येदिति नतनतद्वितीयमस्तिततोन्यद्विभक्तंयत्पश्येदितिचविशेषविज्ञा
नाभावश्रवणादित्यतआह स्वाप्यसं

Brahmamrit Sutar Briti
Vedant by Hirday Ram

5